प्रस्तावना.

आ श्रीवासुपूज्यस्वामीनुं चरित्र अनेक प्रकारना रसोथी परिपूर्ण छे. कर्तानी कवित्वशक्ति पण अद्भुत छे. संस्कृत भाषाना अभिलाषीओने हृदयना हार जेवुं छे. आ चरित्रना ४ सर्ग छे. ते सघळा अनुष्टुप् काव्यवाळा छे. तेना तथा प्रशस्तिना मळीने ५४७४ श्लोक छे.

आ चारित्र प्रथम श्री ज्ञानप्रसारक मंडळे छपाववा मांडेलुं हतुं, परंतु केटलाएक कारणसर अपूर्ण रहेवाथी वकील केशवलाल प्रेमचंदनी प्रेरणाथी अमे ताकीदे संपूर्ण करावावानुं स्वीकार्यु हतुं; पण प्रेसनी ढील्यथी तेमज प्रुफो दूर प्रदेशमा मोकलवाना होवाथी आ चरित्र बहार पडवामां विशेष विलंब थयो छे.

आ ग्रंथनी एक कोपी रोम शहेरनिवासी डॉक्टर एम्ब्रोजीयो बेलीनीए तैयार करीने मोकलावी छे तेथी तेमनो अने आना प्रुफ डॉ. हरमन जेकोबीए तपासी आपेला होवाथी तेमनो अत्र आभार मानवामां आवे छे.

परस्पर संबंध जोडी देवा विगेरे कार्यमां वकील केशवलाल प्रेमचंदे पण सारो प्रयास कर्यो छे तेथी तेमनो पण आभार मानवामां आवे छे.

आ चरित्र सांद्यंत वांचवाथी अनेक प्रकारनो बोध थई शके तेम छे, तेथी ते प्रकारनी भलामण करीने आ टुंकी प्रस्तावना समाप्त करवामां आवे छे.

संवत १९६६ वैशाख

श्री जैनधर्म प्रसारक सभा
भावनगर.

INTRODUCTION.

From the prasasti of the *Vasupujya-charita* (वासुपूज्यचरित), we learn that its author, *Vardhamanasuri*, (वर्धमानसूरि) belonged to the Nagendragachchha (नागेन्द्रगच्छ). His spiritual descent is the following: (1)

1. Virasuri — वीरसूरि
2. Chachchiga — चच्चिग
3. Vardhamana (of the Paramara family) — वर्धमान
4. Ramasuri — रामसूरि
5. Chandrasuri — चन्द्रसूरि
6. Devasuri — देवसूरि
7. Abhayadevasuri — अभयदेवसूरि
8. Dhanesvara — धनेश्वर
9. Vijayasinha — विजयसिंह

Devendracharya (देवेन्द्राचार्य) — Vardhamanasuri (वर्धमानसूरि)

The *prasasti* adds, furthermore, the origin of the poem and gives the date of its composition.

---

(1). This descent corresponds precisely with

narrate the edifying exploits of King Padmottara who in his next existence became Vasupujya. The last two sargas describe the birth, life, and spiritual career of Vasupujya. With this groundwork of our poem, however, are interwoven a number of *Kathas*, nineteen on the whole, in order to exemplify some of the fundamental doctrines of the Jains, a demonstration of which is given either in the principal narration or in the several *Kathas* themselves.

In the table of contents of these Kathas(1) I enumerate them with such particulars as the reader may desire to have. It may be added that I have given a detailed analysis in Italian of the contents of the Vasupujyacharita in the first and second Volumes of *Rivista degli Studi Orientali, Rome 1907–08.*

(1). Of these *Kathas*, the first (I, 66–612: the King **Punyadhya**) treats of *merit* (*punya*) the second, intercalated in the first (I, 423-567; **Hamsa** and **Kesava**) on the importance of the vow *not to eat during the night* (*bhojanirati*), the third (II, 12–600: **Ratisara**) on *liberality* (*dana*); the fourth (II, 607–1369: **Sanatkumara** and **Sringarasundari,**) on exercises in the *moral* restraints (*sila*), the fifth (II, 1375-1528; **Samvara**) on *austerities* (*tapas*), the sixth (II, 1534–2170: **Chandrodara**) on the *meditations* (*bhavana*); the seventh (IV, 24–176. **Vikrama**) on *true faith* (*samyaktva*), the eight (IV, 182–

The *Vasupujyacharita* is written throughout in Sloka, except the last stanzas of each of the four cantos, which are in Vasantatilaka. The style is fluent, abounding in poetical conceits, and aiming at different kinds of alliteration (अनुप्रास) wich seems to have been greatly relished by Jain authors and readers. The language is correct on the whole and altogether not different from what we meet with in other Jain Kavyas of the same character and period.

---

244 **Sura and Chandra**) on the vow *not to kill* (*ahimsa*), the ninth (IV, 250-320: **Hamsa King of Rajapuri**) on *sincerity* (*satya*); the tenth (IV, 325-400: **Laksmikunja**) on the vow *not to steal*, the eleventh (IV, 405-466: **Nagila**) on the vow of *chastity* etc; the twelfth (IV, 471-523: **Vidyapati**) on the vow of *limitation in possession* (*aparigraha*, *parigrahapramana*); the thirteenth (IV, 537-593: the **Simha merchant**) on the vow of the *directions* (*digvrata*); the fourteenth (IV, 599-631: the **Dharma child**) on vow of concerning the *continence in enjoyment of food etc* (*bhogopabhogavrata*); the fifteenth (IV, 637-699: The **Surasena and Mahasena princes**) on the vow to *refrain from unnecessary injury* (*anarthadandavratavrata*); the sixteenth (IV, 701-761 The **Kesarin prince**) on the vow with regard to *time* (*samayika*); the seventeenth (IV, 765-820 the **pious minister Sumitra**) on the vow of "*drawing closer or contracting every day the limits already laid down to the range of tra-*

The present edition of the *Vasupujyacharita* is based on the following Mss.

A. a modern, fairly correct Ms. 182 leaves, 12 lines on a page, dated Samvat 1915.

B. an old and good Ms. but it omits frequently verses or parts of verses; 107 leaves, 17 lines on a page. It bears no date, but, judging from its appearance and the form of the letters, it may be 300-400 years old.

C. a bad Ms, written by an ignorant scribe. Besides the text it contains an interlineary Guzerati Tata, 303 leaves. Dated Samvat 1859, Saka 1724, Magha Sudi 9 Monday.

D. a carefully written Ms; though it is younger than B, it has the advantage of containing no lacunae. Not dated, but apparently older than C.

All these Mss. have kindly been lent me by *Vakil Keshavlal Premchand B.A., L.L.B* of Ahmedabad. To his well known endeavours in the interest of Jain Literature it is due that this edition of the Vasupujya Charita could be undertaken

---

vels." (Bhandarkar Rep. 1884 p. 111f) (*desavakasikavrata*); the eighteenth (IV, 824-887): the **Mitrananda minister**) on the vow of fasting (*paushadhavrata*); the ninteenth (IV 890-970: **Sumitra**) on the vow of giving food and shelter to Ascetics (*atithisamvibhaga*).

In conclusions I have to thank my respected teacher Professor *Doctor Hermann Jacobi* of Bonn, who has revised my manuscript before sending it to the press and has assisted me in reading the proofs

Rome, DR. AMBROGIO BALLINI.

April 1910.

A TABLE OF CONTENTS OF KATHAS NARRATED IN THE WORK

VARIOUS READINGS OF THE VASUPUJYACHARITA.

पाठान्तर.

I.

26aB पस्य ॥
52aB मुद्रा ॥
56bB न किम् ॥
85bA अवध्यन ॥
86bB घासानद्रावपम् ॥
109aB घात्यानर्गवय्रमन्।
„ bB लोल्पामास ॥
116aA महोन्सवमयम् ॥
123bBC मंसर्गं ॥
141aB तन्क चेत्तु सः ॥
142bB कार्यमाचार्यवर्य-
मावर्ज्य
171bB साधितम् ॥
174aB पन्द्रिकद्म्बेन ॥
„ bB तूर्यनादेन ॥
195a M-. सौर्यलक्ष्मी-
नदीनाया०
217bA कृत्वानानिम् ॥
219bA निर्ममो निर्मम
सोऽयम् ॥
228bB अम्राघे ॥
231aA शिवसौख्यानाम्
238aA इति तस्य ॥
240aA राज्यं घापि तत:
क्षणं ॥
247bB कमण्डुघकापा०
261aB मेदमुच्चनाम् ॥
325aA हु ॥
349bB यत्तु स्यात्सुर्यम्
358bB न मन्थनीयो ॥
„ aB (अ)नवधिज्ञान-
निधिः ॥
435bA कस्याधिकरो-
त्ययम् ॥
472bB गुक्तमित्युक्त
सताम् ॥
496aB किंच ॥
517bA पनुजोज्वल
541bB पारणक्षणम्
578bA स्वसमाम
· पाश्रमः ।

659aBD तत्पूज्यो न्यस्य मन्मोहं स्वपौत्रे मघवत्यपि ।
मां प्रतायानुमन्येथामिहार्थे ऽस्मि कृताञ्जलिः ॥
667bA मुधैव स्त्रियसे ॥
668aBD स्थितम् ॥
690aD यतो यतो भवाभिलषः ॥
702aBD मिनोऽहात्पाणिनेपथ्यं सर्वसन्नप्रहादरैः ॥
711BCD मधुः मयेदं चा स्त्रि कृत° ॥
734bA विश्वं सर्वे ०गुणा इव ॥
761bBC याचते ॥
805bBD पश्चनाम् ॥
929aBC ऽपिपूर्वैर्भजिरे ॥
1052bD दार्ह्यमान ॥
10?3aA नगुहम्र° ॥
1094aAC क्रिमदानुसूनेर° ॥
101bAC भीमद्रमुपु° ॥

IV

21bAC द्वादशनां तु सम्यक्तं जीवितं परमं स्मृतम् ॥
24aAC जम्बुद्वीपे ऽस्ति कुसुमसन्निभं कुसुमं सुरम् ॥
56aAC अन्येषु पीनःपुण्येन ॥
69a } BD omits
70b }
121bA स्तुतो B मुता: (sic) C स्तना: (sic D स्तुना ॥
152bC वयम: D ज्वः ॥
168bA चिरं विराग° ॥
186aD हरिरपि कल्पिता॥
192 bAC विविक्तरागमद्राक्षीत् ॥
219aBCD निशितास्त्रोऽस्य ॥
244aBD: ममूं दृष्टान्तमाकार्ण्य सकर्णैः कर्णकार्पणम् ॥
" C मुक्तिसंपादितकार्यैनम् ॥

247bBD: सुधीभिर्धीमप- श्वेन ॥

259aAC: पूर्वकर्मवशा- त्कृशम् ॥

293aBCD: चिन्तापसौ चुम्बन् ॥

304bA: नृपचारेभ्यः ॥

321bA: शिववर्मनः ॥

322aA: आहृतं ॥

324aA: °पालननिश्चलः ॥

325aAC: °धर्मकर्मोर्मि° ॥

329aBC: विविधाभिर्वि°॥

409bACD: विवेकदीपं- ॥ (S. Sl. 425)

452bA स शङ्खास्यो ऽ यद्भुतः ॥

464aAC: मन्ते संतेजित- ध्यानो नागिलः सह नन्दया ॥

465aAC: भोगान्समं दिवः ॥

480bA: वक्ष्यसि प्रियाम् ॥

C: प्रिय ॥ ,,

510bA: विपुलश्रीमहाग्र- हान् ॥

608aD °चिन्ताग्रस्तस्यौ वौ° ॥

705aD °कदाप्पदः ॥

709aD इति ध्यात्वा स- पं तत्र ॥

724aA कोपतसं लोचन- योर्द्वयम् ॥

784bAC स प्रतिज्ञो महा- मात्यः ॥

838bD पवनेशेति नाम- तः ॥

861aA °विधाधेत्ता ॥

902aBD समालोककृता- दरः ॥

925aD अथासौ ॥

951aA यथाविधेषु पात्रेषु ॥

976A मघवा नामतस्त- स्यामवनीमघ- याभवत् । रेजेऽरिपु मुजा- दम्भादम्भोलिर्य- स्य भीषणः ॥

1061bD मुखमण्डनम् ॥

1077bA ०सर्वसर्वाङ्गक-
म्यमाक् ॥
1107bD दुःप्राक्रान्तः ॥
1116D पापी द्वीपो बभू-
वाय तृतीयां च
गतोऽय सः ।
नकुलीभूय द्वि-
तीयां बकोऽय
प्रथम[ा]च सः ॥
1125bA पुष्पपुष्पैश्च दुर्ग-
न्धः सुगन्धश्च ॥
1132bA सौख्यभागसौ ॥
1143bD पूजा तेन सप-
ग्राहि जग्रहेऽस्य
कलावलिः ॥
1151aBD विद्यते सुप्रभा ॥
1157bAC राधावेधविधा-
यिनः ॥
1169bBD वैरिगोत्रवना-
नलः ॥
1181aD ०ज्ञानिवचःस्म-
रन् ॥
1191bA भूधनेनानुधावन॥

1229bA तत्कथ्यतां मुधं ॥
1237aD धर्मरुचि ॥
1241bAC मुनिसुव्रतम् ॥
1248aA जातिज्ञानमवाप्य
1251bD वासुपूज्यपवित्रि-
ताम् ॥
1255bA नो केन नाम्बो-
केषु काङ्क्षितम् ॥
1256aA मध्येऽपि कं
रागं ॥
" " D मध्येऽधिकं रागं
नीरागान्तोऽपि नैव यः॥
1258aB ०जगद्भर्तुरुपदे-
शैः सुमी नृपः।
लघुं न्यस्य सुतं
राज्ये भेजे ।
" " D नृपः श्रुत्वा जग-
द्भर्तुरुपदेशं महा-
न्तधीः ।
राज्ये न्यस्य सुतं
सोऽस्य भेजे ॥
1269aA मृक्षीकृमनन्दी-
भिः साकशैक० ॥

1293bA स्मयते स्पृश्यते ॥
" " D अवादपंसत्ता सुसोश्चिकाः ॥
1331aA क्षीणकर्माय कर्तव्यो ॥
" bD जगद्गुरुः ॥
1363aD कौकासगणान् ॥

Sl.3aD भूरिर्भूरिगुणावृतः॥
Sl. 8-25A omits.
Sl.16aD श्रीमद्दाकाद्नो
BC श्रीमद्दाडाद्नोऽनाने metr mistaken !
" 29aD कृपा ॥



॥ वासुपूज्य चरितम् ॥

प्रथमः सर्गः

अर्हन्तं नौमि वासवेयं कल्याणकलशं सताम् ।
रेजुराग्रदलानीव यत्कर्णनिकटे जटाः ॥ १ ॥
भक्तिरागभृतानन्तभव्यस्वान्तस्थितेरिव ।
विद्रुमच्छायकायो ऽसौ वासुपूज्यः श्रियेऽस्तु वः ॥ २ ॥
स्वार्थे ऽर्दं कमठात्कष्टं सेहे भोगी तु मत्कृते ।
तन्मान्यो ऽयमितीवास्तु पार्श्वो मूर्ध्नावहन्मुदे ॥ ३ ॥
रणे ऽपि धीरा वीराः स्युर्महावीरस्त्वसौ मनः ।
देवीहावैर्भितो नेति यं स्तौतीन्द्रः स वो ऽवतात् ॥ ४ ॥
अन्यानपि जिनान्नौमि ध्यायामि श्रुतदेवताम् ।
प्रारब्धसिद्धिफलदाञ्श्रये कल्पतरून्गुरून् ॥ ५ ॥
सत्पात्रदानतो धर्मः सर्वलोकोत्तरस्थितिः ।
जीयाज्जन्तुसमुद्धारव्यापाररचिरश्चिरम् ॥ ६ ॥
देयाद्धर्मः स वः कामान्कामधेनुरपूर्वनः ।
यतस्ताः संनिधावन्ति बुद्धिश्रीवृद्धिसिद्धयः ॥ ७ ॥
परोपकारिणो भूयो धर्मं यत्रार्थितेषु यः ।
ददाति निर्वृतिं स्वस्य सत्पात्रमपि निःस्पृहः ॥ ८ ॥
जयन्ति जगदुत्सङ्गरङ्गद्गुणकीर्तयः ।
ते सन्तः सततं येषां धर्मे ऽस्मिन् रमते मतिः ॥ ९ ॥

चत्वारो ऽस्य सपर्यायाः पर्यायाः कृतिनां मताः ।
दानशीलतपोभावनामानः कामितप्रदाः ॥ १० ॥
ते तु भीमभवाम्भोधिसेतवः पुण्यहेतवः।
शुद्धिमद्भिर्विबुध्यन्ते महतां चरितश्रुतेः ॥ ११ ॥
अतः सत्पुरुषश्रेणिश्रवणामृतवर्षणम् ।
शर्मणः कार्मणं कर्ममालिन्यक्षालनक्षमम् ॥ १२॥
वासवानां हि यः पूज्यो वासुपूज्य इति श्रुतः ।
तस्य तीर्थेशितुश्चारु चरितं रचयाम्यदः ॥ १३ ॥ युग्मम् ॥

अस्ति स्वस्तिनिधिः स्वर्णशैलवर्ण्यान्तरावनिः ।
जम्बूद्वीप इति द्वीपो लक्षयोजनविस्तृतः ॥ १४ ॥
यस्योत्तरकुरुस्थानश्चित्ररत्नमयो द्रुमः ।
जम्बूर्भयति मायूरच्छत्रं द्वीपजयोच्छ्रितम् ॥ १५ ॥
यो ऽनन्तप्रतिमो ऽप्यत्र सर्वत्राप्रतिमः क्षितौ ।
अनादिनिधनो ऽप्युक्तः सप्तवर्षमयो बुधैः ॥ १६ ॥
सो ऽस्ति कङ्कणरूपेण लवणाम्बुधिना वृतः ।
द्विलक्षयोजनोन्मानो विस्तारेण निरन्तरम् ॥ १७ ॥
यो ऽन्तःकूटस्थचैत्येषु भक्त्या नित्यार्हतां पुरः ।
नृत्यत्यूर्मिभुजैर्नित्यं गायत्यूर्जितगर्जितैः ॥ १८ ॥
द्वीपो ऽस्ति परतस्तस्य धातकीखण्डसंज्ञकः ।
यः पृथुत्वे चतुर्लक्षयोजनानि समन्ततः ॥ १९ ॥
स्थानो ऽस्मदभिधानेन द्वीपो ऽयमिति नृत्यते ।
यत्र स्वमर्मर्मेलद्वयस्थधातकीद्रुमैः ॥ २० ॥
यश्चकास्ति चतुःषष्ट्या विजयैः पद्मिनीव ।
चतुरङ्गबलधृतफलकं नयधर्मयोः ॥ २१ ॥

जनस्यान्तरषड्वैरिजेतुस्तेजोयशःश्रियाम् ।
यत्रार्काः कुण्डलायन्ते द्वादश द्वादशेन्दवः ॥ २२ ॥
विद्यते तस्य कालोदजलधिः परिधिस्थितः ।
विस्तृतः सर्वतो योऽष्टलक्षयोजनमानभृत् ॥ २३ ॥
आतापत्रेषु गीर्नित्यमनन्तानर्हतां गुणान् ।
लिखत्स्वितीव यो धत्ते मषीभावं निजाम्भसि ॥ २४ ॥
द्वीपोऽस्ति परतस्तस्य श्रीपुष्करपराह्वयः ।
यो योजनानि विस्तारे लक्षाः षोडश लक्ष्यते ॥ २५ ॥
तस्य नामार्थमत्यर्थं मथयन्ति वरश्रियः ।
माद्यन्मधुपझङ्कारैः पुष्करैः पुष्कराश्रयाः ॥ २६ ॥
तस्यार्धे इष्टवान्भूभृदास्ते मानुषोत्तरः ।
नित्यार्हच्चारुचैत्यानि यस्यास्ते मुकुटः स्फुटः ॥ २७ ॥
तस्मादर्वाग्विभागेऽस्ति स्वर्णाद्रिर्भूविभूषणम् ।
यत्ताराः केसरायन्ते गगने नीलनीरजे ॥ २८ ॥
ततः पूर्वविदेहाख्यं क्षेत्रं प्राच्यां श्रियं सताम् ।
यत्रार्हद्वाक्सुधासेकाज्जायन्ते निवशालयः ॥ २९ ॥
तत्र सीतासरिद्वीचिसिच्यमानवनावनिः ।
अस्ति विस्तारिमङ्गल्यो विजयो मङ्गलावती ॥ ३० ॥
विभावर्यामपि जना विभावर्याङ्गभूषणैः ।
ध्वस्तध्वान्तभरा यत्र यान्ति मान्तरवर्त्मसु ॥ ३१ ॥
इन्द्रनीलमयं दाम शून्ये अपि पतितं पथि ।
भुजङ्गमभ्रमेणेव यत्र नादीयते जनैः ॥ ३२ ॥
तत्र पात्रं सुवर्णानां वर्णिन्यास्तिलकं भुवः ।
निःसपत्नत्रयश्रीत्वरं रत्नपुरं पुरम् ॥ ३३ ॥

सत्कृत्यामृतसिक्तानां यत्र भान्ति ध्वजाञ्चलाः ।
तीर्थेशवेश्मनां पुण्यद्रुमाणां पल्लवा इव ॥ ३४ ॥
वपन्तो धार्मिकाः सारं यत्र क्षेत्रेषु सप्तसु ।
पुण्यधान्यर्गरिष्ठं स्वं कोष्ठागारं सुविभ्रति ॥ ३५ ॥
यत्र स्त्रीश्रेणिवक्त्रोजवक्त्रेषु श्रीरहर्निशम् ।
वीरासिकुम्भिकुम्भाब्जवाससौख्येन खेलति ॥ ३६ ॥
धर्मेण स्वाजिता लक्ष्मीश्चापलं यद्गृहेषु यत् ।
कोटिध्वजाञ्चलव्याजात्तन्मूर्तमिव वीक्ष्यते ॥ ३७ ॥
तस्मिन्पद्मोत्तरो राजा प्रजापालनलालसः ।
अभूद्भूमिदोषाणां रोपाणामिव सन्मुनिः ॥ ३८ ॥
अंहिहस्तास्यनेत्राणि नलिन्याभान्ययं दधौ ।
अतो ऽस्य नलिनीगुल्म इत्याख्याभिदधे बुधैः ॥३९॥
स्वप्ने पद्मं महत्तस्मिन्गर्भस्थे ददृशे ऽम्बया ।
अतः सद्भिर्महापद्म इत्यस्य विदधे ऽभिधा ॥ ४० ॥
व्योममण्डलमालिन्यच्छलकज्जलमालिनः ।
बभौ छायेव यत्तेजःप्रदीपस्यारिदुर्यशः ॥ ४१ ॥
आपीय विमदं वैरिवनितानां स्मितामृतम् ।
उद्गारवद्यशोभारं यस्यासिः शाश्वतं व्यधात् ॥ ४२ ॥
स देहद्युतिनिर्दोहसंदेहितविभूषणः ।
सभायां भूधनो ऽन्येद्युर्भद्रासनमभूषयत् ॥ ४३ ॥
श्रीकेल्दिदीर्घिका संसद्य हंसकुलैरिव ।
रेजे राजपदाम्भोजसेवाहेवाकिभिर्नृभिः ॥ ४४ ॥
अमान्यान्तर्विनिर्यान्त्या सितया पलितच्छलात् ।
बुद्ध्या विमलबोधाया रेजिरे तत्र मन्त्रिणः ॥ ४५ ॥

मुहुः प्रकम्प्य मूर्धानं सभ्यैर्निबिडपूर्तये ।
सेव्यमाणानि कर्णेषु तत्र सूक्तान्यवुर्बुधाः ॥ ४६ ॥
व्यवहारकृतस्तत्र देहार्चिर्याचकैरिव ।
रत्नैरन्योन्यसंघट्टवाचालैर्भूषिताः स्थिताः ॥ ४७ ॥
यत्तैन्यमोच्छलद्धूलीमये तिमिरसंचये ।
दधौ खद्योतपोतस्य द्युतिं प्रद्योतनः सदा ॥ ४८ ॥
उदैप्यतः प्रतापाग्नेर्धूमदण्ड इवोन्मुखः ।
यदासिर्युधि शत्रुस्त्रीणैर्मर्दृष्टो जलाविलैः ॥ ४९ ॥
कर्पूरपूरवधेर्षा यशो रोदःसमुद्गके ।
जज्ञे ऽरिदुर्यशःकृष्णागुरुसङ्गाश्चिरं स्थिरम् ॥ ५० ॥
स्वाम्यादेशघनावेशरसल्लालसचातकाः ।
उन्मुखास्ते ऽपि भूपालास्तत्र तस्थुर्यथास्थिति ॥ ५१ ॥
चतुर्भिः कलापकम् ॥
तांश्च भूमिभुजः स्वाँ च भुजौ पश्यन्मुहुर्मुदा ।
राजा पर्मोत्तरो हृष्यन्नुवाच सचिवेश्वरम् ॥ ५२ ॥
यदाक्रामति दिक्चक्रं भूचक्रो भुजविक्रमात् ।
तत्र चित्रं यतः सर्वबलेभ्यो दोर्बलं महत् ॥ ५३ ॥
यदासीदिममुक्तं पेशमीनां दक्ष शिक्षय ।
यन्मत्पितामहस्यापि सर्वशिक्षागुरुर्भवान् ॥ ५४ ॥
अथामात्यपतिर्दध्यौ नृपो ऽयं भुजदुर्मदः ।
ततस्तत्त्वविदां हन्तिरपहास्यं वदन्यदः ॥ ५५ ॥
नृपस्तं निरामित्यन्नाश्चिन्तयन्तमभाषत ।
किं न मद्वचसां किंचिद्रचयसीदृत्तमुत्तरम् ॥ ५६ ॥
एवं निशम्य मन्त्रीन्दुर्जगाद नृपतिं प्रति ।

दन्तेन्दुद्युतिभिर्दूरान्नृणां मोहतमो हरन् ॥ ५७ ॥
प्रभो ऽश्रुतं त्वयोक्तं यद्बलेभ्यो दौर्बल्यं महत् ।
तत्तु स्यात्सफलं येन तत्पुण्यं सफलं न किम् ॥ ५८ ॥
अथाह भूपो भूपानां शौर्यमैश्वर्यसाधकम् ।
तदाद्विनापि मन्त्रीन्द्र यत्पुण्यमिति किं नु तत् ॥ ५९ ॥
इत्युक्तिभाजि राजेन्द्रे मन्त्रीन्द्रो वदति स्म सः ।
भाग्यसंस्कारसारः पुण्यमेवोच्यते ऽर्हता ॥ ६० ॥
अथाद्भुतरसोल्लासः पृथ्वीन्दुरिति मन्त्रिणम् ।
सारागेनो ऽर्हतामद्मालिन्ये नु का प्रभा ॥ ६१ ॥
मुदं दृशिताचिन्त्यस्वादमस्य भूपतेः ।
ततः शुद्धगुणैर्मन्त्री सचिवेन यात ॥ ६२ ॥
शरणं शुद्धशीलस्य तेजसा च धर्मेण च ।
अवीगणाद् मातङ्गराजस्य ह नु गजते ॥ ६३ ॥
सूरेरतः शोभते भूरि धाम ध्याय च दन्तिनाम् ।
यद्दीनाममी यान्ति जाने धर्मो ऽत्र कारणम् ॥ ६४ ॥
नन्दी शीतो हर्षितो दुर्धीनो ऽपि नरपुङ्गवैः ।
यः पुण्यात्मनया ऽपि पुण्यं येन प्रदीप्यते ॥६५॥

प्रयाति त्रिवर्गाणि महत्त्वानि विपते ।
इत्यादिधर्मे धर्माणः सत्र यथार्थं पृथक् ॥ ६६ ॥
तत्र सर्वधर्मतन्त्राणामगन्तव्यम् मुनां विभुः ।
अनवद्यनाम्नोत्प्रेक्षयानस्त्याधनाधिपः ॥ ६७ ॥
दर्शनं सर्वस्य प्रतापी धनाकरः ।
सर्वार्थदर्शी कृती मुक्ताफलगुणैरिव ॥ ६८ ॥

भाग्याभोगेन भूपानां रत्नमेवेदृशं ध्रुवम् ।
इति दर्शस्तदा पुम्भिः ख्याते तत्कुम्भिगौरवे ॥ ६९ ॥
असामान्यो गुणैर्मान्यो ममायमिति तस्य सः ।
ययौ कुञ्जरराजस्य सम्मुखं राजकुञ्जरः ॥ ७० ॥ युग्मम् ॥
ननादाम्बुदनादेन प्रीतः प्रेत्य नृपं द्विपः ।
नृपस्त्वपूरि रोमाञ्चैर्दूर्वाभूरिवाङ्कुरैः ॥ ७१ ॥
वामं च दक्षिणं चाङ्गं शिरःकम्पनकैतवात् ।
मुहुरस्याङ्कुनं पश्यन्निवेति ध्यायति स्म सः ॥ ७२ ॥
द्रष्टुमैरावणमसौ तद्गुणग्रहधीरिव ।
ऊर्ध्वस्याशु नभोगभगतो ऽब्द इव गर्जति ॥ ७३ ॥
इन्द्रेभस्पर्धया शङ्के यशोभिर्निर्मदीभवन् ।
इन्द्रतायोग्यभाग्यानामेवायं याति यानताम् ॥ ७४ ॥
इति ध्यायन्धराजानिः सन्मान्य व्यवहारिणम् ।
विगतुं दन्तिनो मूल्यं तद्विदः स समादिशत् ॥ ७५ ॥
त्रिभिर्विशेषकम् ॥
निरीक्ष्य लक्षणान्यस्य द्विरदस्य विशारदाः ।
जगदीशं जगुर्मौल्यमौल्यः पुलकाङ्किताः ॥ ७६ ॥
शास्त्रोक्तानामशेषाणां सर्वसल्लक्षणभृताम् ।
हस्ती दृष्टो ऽयमेवात्र द्विरदानामुदाहृतिः ॥ ७७ ॥
भूपस्य यस्य कस्यापि स्यादसौ द्वारभूषणम् ।
संसाधयति दुःसाधानप्यरातीँल्लीलयैव सः ॥ ७८ ॥
पदं कृतयुगस्येव निरीतिः शुभैकभूः ।
एतद्दन्तिभृतो भूमिभर्तुर्देशो ऽपि शोभते ॥ ७९ ॥
वामिव स्यादमूल्यस्य मूल्यमस्य गजस्य तत् ।

याचते यद्वणिग्याहग्देयं देव तदेव हि ॥ ८० ॥
किं ते मूल्यं ददामीति राज्ञि प्रीते ऽथ पृच्छति ।
व्याहारि व्यवहारैकहारिणा व्यवहारिणा ॥ ८१ ॥
स्वामिन्विन्ध्याद्रिराजस्य युवराज इव द्विपः ।
अस्त्युत्तमो ऽयं विख्यातः साम्प्रतं हस्तिवन्धिषु ॥ ८२ ॥
त्वद्वारिश्यद्रुमद्रोहकृते ऽसौ केन केन न ।
महोपायसहस्रेण धर्तुमारभ्यताभितः ॥ ८३ ॥
वितन्वतीभिः साम्यं वा वैषम्यं वा किमप्ययम् ।
बद्धुं शेके न वारीभिर्नारीभिरिव संयमी ॥ ८४ ॥
सम्यग्मत्वैनमग्राह्यं गन्धेभं गन्धवाहवत् ।
अवल्यत विलक्षेण लक्षेण करिबन्धिनाम् ॥ ८५ ॥
अथाहमधिकोत्साहः सुस्वप्नशकुनव्रजैः ।
अस्य बन्धाय विन्ध्याद्रिं गत्वा वासमदापयम् ॥ ८६ ॥
कथं ग्राह्यः स हस्तीति चिन्ताचकितचेतसः ।
मम प्रमोदरोमाञ्चप्रचयं रचयन्नथ ॥ ८७ ॥
मुक्तिस्पृहमसम्यक्त्वमिव मामेतदर्थिनम् ।
सतां महसतां चित्ते चमत्कारं प्रपञ्चयन् ॥ ८८ ॥
मृदुगर्जितवाद्येन मदपट्पदगीतिभिः ।
श्रियमग्रे निजक्रीडानर्तकीमिव नर्तयन् ॥ ८९ ॥
वनदेवीभिरप्येष वीक्ष्यमाणः कुतूहलात् ।
शनैर्वनान्ममागारमगात्नागाधिपः स्वयम् ॥
चतुर्भिः कलापकम् ॥ ९० ॥
आश्चर्योन्मत्तचित्तेन मयोत्थाय रयादथ ।
असावपूजि मत्पक्षं स्वभाग्यस्येव दैवतम् ॥ ९१ ॥

नमतो मम तोषेण सुप्रसन्नः करी करम् ।
सुस्वामीव दधावेष पृष्ठे कमलकोमलम् ॥ ९२ ॥
भूभर्तृणां विरागीव भूभृतामवनीं प्रति ।
संचचालाथ संप्राप्य हस्ती हस्तेन मामसौ ॥ ९३ ॥
अथैनं पृथिवीलीलाचारिणं वारणेश्वरम् ।
वयं प्रीत्यान्वगच्छामः विवेकमिव सद्गुणाः ॥ ९४ ॥
दूरतो राजधानीनामुपकण्ठमपि त्यजन् ।
क्रमोन्कैः भूभृतां सहं लङ्घमानो बलादपि ॥ ९५ ॥
मयानुगम्यमानो ऽयमेत्य नित्यप्रयाणकैः ।
इह स्वगृहवत्तस्थौ यूथनाथो ऽथ सुस्थितः ॥ ९६ ॥
युग्मम् ॥
रक्ता कोपाश्रितेव जज्ञे पान्येषु राजसु ।
प्रमोददुग्धधौतेव धवला त्वयि सास्य दृक् ॥ ९७ ॥
तन्नूनमपमानिन्ये त्वद्भाग्यैरेव वारणः ।
ममैनदनुगामित्वान्मद्भाग्यैरसि दर्शितः ॥ ९८ ॥
ततः स्वसुकृतक्रीतं गृहाणैनमिभं विभो ।
अहं कृतार्थ एवात्र भवद्भालनिभालनात् ॥ ९९ ॥
अथ वाग्भिः सुधापानपुण्यैः कर्णेन्द्रियप्रियः ।
प्रीतो महीन्दुर्मन्त्रीन्द्रसुस्वरसंमुखदृग्जगौ ॥ १०० ॥
अमूल्यमेनमानिन्ये वन्येभमयमेकतः ।
अमूल्यमेकतो ऽयोचद्वचनं बन्धनोज्झितम् ॥ १०१ ॥
तदमूल्यद्वयीदातुरस्मै सर्वस्वमप्यहं ।
दत्त्वाप्यस्यानृणीभावं न गच्छामि करोमि किम् ॥ १०२ ॥
इति स्थिते नरेन्द्रे ऽथ व्याहारि व्यवहारिणा ।

स्वामिन् गजस्तवैवोक्तो मूल्यं गृह्णे ऽस्य न ध्रुवम् ॥१०३॥
इत्यस्मै निश्चयवते सचिवानुमतो नृपः ।
दत्त्वा बलेन राज्यार्धं तं द्विपेन्द्रमुपाददे ॥ १०४ ॥
ततः कृतेभरत्नाभिमङ्गल्यो ऽयं महीपतिः ।
चक्रे यात्रां जगत्कम्पहेतुं जेतुं द्विषो ऽखिलान् ॥१०५॥
निस्वानध्वानधूलीभिर्बधिरान्धारिविक्रमम् ।
संकटीभूतभूगोलं लोलं प्रास्थित तद्बलम् ॥ १०६ ॥
स गन्धसिन्धुरो बद्धरक्तपट्टः पुरो ऽचलत् ।
मूर्धोर्ध्वभ्रान्तकोपाग्निरिव लोपाय विद्विषाम् ॥ १०७ ॥
न नेमुः सर्वतो गर्वकुञ्जीभिः कीलिता इव ।
ये पुरा वैरिणस्तेषु स तत्याज कृपां नृपः ॥ १०८ ॥
रणेषु वारणेन्द्रस्तु स वात्यावर्तवद् द्रुमान् ।
लोडयामास विद्वेषिचमूस्तृणसमूहवत् ॥ १०९ ॥
द्विपेन्द्रः मेक्षकाभूतसकलस्वबलोच्चयः ।
शत्रून् स त्रासयामास द्रुतमद्दानिवानिलः ॥ ११० ॥
दन्तघातदलद्वप्रकपाटः पाटयन्भटान् ।
अरीन्करीन्द्रश्चक्रे ऽसौ दुर्गस्थानपि दुर्गतान् ॥ १११ ॥
इत्येष समरे ऽजैषीद्दन्तलक्षीकृतान्द्विपः ।
लक्षीकृतं तदश्वैः स्वं गतिवेगाद्लङ्घयन् ॥ ११२ ॥
दिशामन्तेषु मिथ्यान्वख्यातान्प्रेक्ष्येव दिग्गजान् ।
जिनकाशी स कुम्भीन्द्रो ववले ऽनुचलद्बलः ॥ ११३ ॥
शक्तिसाधितदुःसाधे सिन्दुरे जयसिन्धुरे ।
तस्मिन् सविस्मयप्रेम रेमे भूमीशमानसम् ॥ ११४ ॥
तमेवेभमिवेभं भूपजयश्रीमङ्गलागतः ।

पदे पदे ऽर्च्यमाप पुरं नागपुरन्दरः ॥ ११५ ॥
महोत्सवमहो भूपवेश्मानिलपतध्वजम् ।
सार्थविभ्रान्तपुरं चक्रे सर्वेषामपीप्सितास्पदम् ॥ ११६ ॥
आलोकैकामवामाक्षीमाल्यमालितजालकम् ।
काश्मीरनीरनीरन्ध्रच्छटाछोटितभूतलम् ॥ ११७ ॥
व्योमापगां जयन्तीभिर्वैजयन्तीभिरद्भुतम् ।
उत्तुङ्गतोरणस्तम्भानद्धभद्रसिन्धुरम् ॥ ११८ ॥
कृतावलम्बमिवानल्पैरुच्चस्थानागतैर्जनैः ।
सहासमिव दन्ताभमुक्तातोरणकान्तिभिः ॥ ११९ ॥
दुर्जयारिजयारोहन्नरोहन्मोदसंमदः ।
तत्पुरं प्रविवेशाथ नृपस्तद्द्विपगंगनः ॥ १२० ॥

चतुर्भिः कलापकम् ॥

मौनिर्गारैर्मुहुः पौरैः स्तूयमानः पदे पदे ।
निबन्धकरी करेणोर्वी सविलास इवैक्ष्यत ॥ १२१ ॥
खेलन् सोल्लसमनं करोग्रेणायमग्रहीत् ।
ध्रुनो ऽप्यहात्लसरीरलण्डं यौनं धर्मतरोरिव ॥ १२२ ॥
कराग्रनटिकायग्डः शुण्डारः स व्यराजत ।
स्वर्गदण्डाग्रसर्गिसोमव्योमनस्तोपमः ॥ १२३ ॥
किं कर्तानेन कस्टी सरोजखण्डेन सम्प्रति ।
इत्यसौ विस्मयस्मेरैः प्रेक्ष्यमाणः पुरीजनैः ॥ १२४ ॥
आवनागारमङ्गल्यः प्रतिस्थानं मतङ्गजः ।
लीलालसगतिः प्राप भूपालभवनाङ्गणम् ॥ १२५ ॥

युग्मम् ॥

भूयमाणो महाश्चर्यानिश्चलैः खेचरैरपि ।

स गुणी सगुणीकृत्य कृत्यवित्खटिकामिमाम् ॥ १२६ ॥
चतुष्पंक्तिं भवचतुर्गतिनिर्गतिमार्गवत् ।
श्लोकमेतन्नृपागारद्वारभित्तौ द्विपोऽलिखत् ॥ १२७ ॥
युग्मम् ॥
अविज्ञाततत्त्वीतत्त्वो मिथ्यासत्त्वोल्लसद्भुजः ।
हा मूढः शत्रुरोपेण मित्ररोपेण हृष्यसि ॥ १२८ ॥
श्लोकमालोकयन्नेनमनेनसमसौ नृपः ।
अज्ञानन्नर्थमर्थज्ञानपृच्छन्मित्रमन्त्रिणः ॥ १२९ ॥
श्लोकः कथंचिद्बुबुधे बुधैरपि तैर्न सः ।
अतिदीर्घोऽपि न पुमान्पदाभ्यां लङ्घते ऽर्णवम् ॥ १३० ॥
मुखाग्रे तोरणीकुर्वन्नथ दन्तांशुतोरणीम् ।
न्यवीविशन्नृदेवो ऽसौ वाग्देवीं रसनासने ॥ १३१ ॥
मदिष्टदेवता कापि मयि दत्त्वा जगत्त्रयम् ।
श्लोकं शिक्षाविशेषाय लिलेख द्विपरूपभाक् ॥ १३२ ॥
तदस्यार्थमविज्ञाय न विशामि निवेशनम् ।
अमित्रमित्रसंदेहे कास्तु देहे ऽपि निर्वृतिः ॥ १३३ ॥
तदित्युदीर्य काव्यार्थं हृल्लेखादीर्यमाणहृत् ।
तत्रैवास्थानमास्थाय विभुर्निर्विविशे विशाम् ॥ १३४ ॥
संहताः सूरयः सज्ञावज्ञातसुरसूरयः ।
तैरप्यभेदि न श्लोकटङ्कं वज्रमणिर्यथा ॥ १३५ ॥
श्लोकार्थं लोकसार्थेषु समन्तान्मतिगर्विताम् ।
धर्माचार्यानथाकार्यापृच्छत्पृथ्वीपतिः क्रमात् ॥ १३६ ॥
अर्थेष्वघटमानेषु तेषामप्युक्तियुक्तिभिः ।
विषादपात्रं धात्रीनः किंकर्तव्यजडो जगौ ॥ १३७ ॥

श्रीवेतानेन कनकाचलेनेव प्रकम्पनाः ।
सर्वज्ञमानिनः सर्वे गर्वेण रहिताः कृताः ॥ १३८ ॥
अद्यापि विद्यते क्वापि को ऽपि मद्दम्यनास्पदम् ।
न वेत्ति वदति स्माथ सचिवेन्दुरवोचत ॥ १३९ ॥
अद्याप्येको विवेकोर्मिसमुद्रो न समेति सः ।
आनन्दचन्द्रसूरीन्द्रो जिनशासनतत्त्ववित् ॥ १४० ॥
ऊचे ऽथ राजा नाद्यापि यदभ्यैत्तत्कथं नु सः ।
तथाप्याहूयतां सो ऽपि क्षीणशल्यो ऽस्तु संशयः ॥ १४१ ॥
अथ मन्त्री स्वयं गत्वा नत्वा विनयवामनः ।
निवेद्य कार्यमाचार्यवर्यमावर्ज्य हूतवान् ॥ १४२ ॥
ते कर्तुकामाः श्रीजैनशासनस्य प्रभावनाम् ।
राजमन्दिरमाजग्मुः सूरयो ऽथ नयोज्ज्वलाः ॥ १४३ ॥
मूर्तं शर्ममिवायान्तं तमेवस्य महामुनिम् ।
भूपस्तद्दर्शनो हर्षी नमश्चक्रे मुदा नदन् ॥ १४४ ॥
देवांशः को ऽप्यसौ कुम्भी मोहशुम्भी ननाम यम् ।
किं मुनीन्द्रं निम्नक्रा नमामो वयमप्यमुम् ॥ १४५ ॥
इति ध्यायन्समुत्थाय भद्रपीठाद्विभुर्भुवः ।
नमश्चकार सपरीवारः संसारतारणम् ॥ १४६ ॥
सूरिं सिंहासने ऽध्यास्य निविश्याग्रे ऽतिभक्तिभाक् ।
तं श्लोकं दर्शयन्निच्छ्यामर्थं पप्रच्छ पार्थिवः ॥ १४७ ॥
दन्तच्छविच्छलान्मुक्तिशिलादीपितवर्णिकाम् ।
दर्शयन्निव भक्तेभ्यो गुरुर्गिरमथाकिरत् ॥ १४८ ॥
यो देवगुरुधर्माणां त्रयीं जानाति तत्त्वतः ।
रमते तन्मतिः सत्त्वे स जिनाजिनभेदवित् ॥ १४९ ॥

वीतरागप्रभुर्देवो गुरुस्तत्त्वोपदेशकः ।
धर्मश्च करुणारम्यस्त्रयीतत्त्वमिदं विदुः ॥ १५० ॥
तत्सत्त्वं यद्भवाम्भोधिः क्रममात्रेण लङ्घ्यते ।
मिथ्या सत्त्वं पुनः कर्मस्विन्यन्मार्यमारणम् ॥ १५१ ॥
रिपवो रागरोषाद्या मुहुर्देहं दहन्ति ये ।
मूलादुन्मूलनीयास्ते समन्तात्तेन धीधनैः ॥ १५२ ॥
मित्राणि प्राणिवर्गस्तु यो द्विषन्नपि कर्मठः ।
कामं क्षामयितव्योऽसौ क्रुधा दीप्तः शमामृतैः ॥ १५३ ॥
कषायविषयाञ्शत्रून्परिपुष्यन्ति मित्रवत् ।
सुहृदोऽसुमतः शत्रूकृत्य निघ्नन्ति धिग्जडाः ॥ १५४ ॥
राजन्को ऽप्यवधिज्ञानी तव पूर्वसुहृत्करी ।
सूत्रयानया दत्तां शिक्षां मुक्तराज्यस्य संयमे ॥ १५५ ॥
इति विज्ञाय सूक्तार्थं चमत्कुर्वन्गुरोर्गिरा ।
मेदिनीजानिरानन्दहृष्टरोमपदो ऽवदत् ॥ १५६ ॥
अद्य मे फलवज्जन्म यद्भवान्भवपारदः ।
अलभ्यत गुरुर्गौरगुणगौरवभाजनम् ॥ १५७ ॥
त्वत्प्रसादेन संसारसारासारविचारवित् ।
जाने ऽधुना धुनास्युर्वीभोगान्भोगानुरक्तधीः ॥ १५८ ॥
प्रभो पीयूषसदृशा दृशा मां वीक्ष्य दीक्षय ।
विलीयन्तां भवोत्थाना देहदाहज्वरोर्मयः ॥ १५९ ॥
इत्युदीर्य पदद्वन्द्वमद्वन्द्वस्थिरमानसः ।
आनन्दचन्द्रसूरीणामग्रहीदाग्रही नृपः ॥ १६० ॥
श्लोकार्थज्ञानसंविग्नाः परेऽपि बहवो जनाः ।
दत्ता दीक्षामयाचन्त मुनिमानम्य तं तदा ॥ १६१ ॥

अयं करात्तकल्याणकलशः करिशेखरः ।
अभिषिञ्चति यं राज्ये स्थाप्यः कामं स मामके ॥ १६२ ॥
इत्यादिश्य तदा मन्त्रिवृन्दं वृन्दारको नृणाम् ।
मुक्तिश्रीशाश्वतिभुवं दीक्षामादत्त संमदी ॥ १६३ ॥ युग्मम्॥
तेऽपि शुद्धधियो धीराः क्षीराब्धिस्फूर्तिकीर्तयः ।
कति नाददिरे दीक्षां भवक्षोदविनोदिनीम् ॥ १६४ ॥
जिनप्रवचनप्रौढप्रभावपृथुभावनः ।
अथानः सपरीवारो विजहार महामुनिः ॥ १६५ ॥
मङ्गल्यकलशं तस्य करे न्यस्य करीश्वरः ।
परिता मन्त्रिणस्तत्र ततः प्राञ्जलयो जगुः ॥ १६६ ॥
गजेन्द्रराज राजत्वं विराजयति यो गुणैः ।
तस्मै कस्मैचिदैश्वर्यं वितीर्य विजयी भव ॥ १६७ ॥
ततो मतङ्गजस्वामी चामीकरविभूषणः ।
मन्द्रगर्जितवाचालदिक्चक्रः प्रचचाल सः ॥ १६८ ॥
रङ्कान्राज्ञश्च राज्याय पुरोऽसौ परिपालिनः ।
सदर्शय दृशा पश्यन्मार्गेविज्ञानपल्यत ॥ १६९ ॥
गर्ले गर्ले गच्छन्मदागनिरिव द्विपः ।
न तस्यां नगरारामग्रामोर्वाव्यपि न कश्चित् ॥ १७० ॥
कालेन दन्ती गन्तव्यमित्यन्तश्चिन्तयातुराः ।
तं मन्त्रिणोऽन्वगुर्मन्त्रप्रभावा इव साधितम् ॥ १७१ ॥
रत्नार्थीव पुमानब्धिं पुंरत्नार्थी स वारणः ।
दुःप्रवेशं विवेशाथ दूरदेशाटवीपथम् ॥ १७२ ॥
सुप्तं तरुतले कंचिच्चीरच्छन्नशरीरकम् ।
तथाभ्यषिञ्चदम्भोभिः कुम्भी कल्याणकुम्भजैः ॥१७३

ततो वन्दिकदम्बेन कृते जयजयारवे ।
दूरमापूर्यमाणे च तूर्यक्काणेन दिग्गणे ॥ १७४ ॥
अयमुत्थापयांचक्रे यावद्राज्याय मन्त्रिभिः ।
दृष्टस्तावद्विसंकोचिहस्ताद्यवयवः पुमान् ॥ १७५ ॥ युग्मम् ॥
प्रत्यक्षलक्षितस्थापलक्षणो ऽपि दृशा महान् ।
नैष पद्भ्यां गतौ शक्तो न पाणिभ्यां तृणग्रहे ॥ १७६ ॥
किमीदृशो ऽपि राज्ये स्यादिति ध्यायिषु मन्त्रिषु ।
करेणारोप्य तं पृष्ठे पुराय प्रययौ द्विपः ॥ १७७ ॥
नूनं ज्ञानी गजो ऽनेन राज्यं वर्धिष्णु वीक्ष्यते ।
प्रवेशोत्सवमित्यस्य विचित्रं मन्त्रिणो व्यधुः ॥ १७८ ॥
अज्ञातकुलशीलस्याप्युन्मीलद्भाग्यशालिनः ।
राज्याभिषेकमङ्गल्यं मेनिरे ऽस्य नरोत्तमाः ॥ १७९ ॥
राज्यप्रधानपुंवर्गस्तं ननाम च नाम च ।
पुण्यर्द्धिभावनस्तस्मिन्पुण्याढ्य इति निर्ममे ॥ १८० ॥
राज्यार्धस्वामिनागर्वादर्थवस्तु धनावहः ।
पद्मं नाम नमामीति निर्ययौ नगराद्बहिः ॥ १८१ ॥
तद्राज्यार्थमलं तस्य सामन्तेशाः परे ऽपि च ।
विधुराङ्गतया शीलवैराग्येण तपस्यगुः ॥ १८२ ॥
सार्धमन्तःपुरैर्हस्तिपकैः सतुरङ्गैस्तुरङ्गिभिः ।
नृपमुक्तस्यार्थीशैरप्यमानव्यगम्यत ॥ १८३ ॥
वन्दीयान्नयनीत्येष नियोगिभिरपि श्रितः ।
वहित्रबुधकल्पेन नागरैरप्यगामि सः ॥ १८४ ॥
अपि हस्तिपकैर्नीवृत्तो हस्तिपतिस्तु सः ।
एव एव वहित्रनागाधिपायेषु कृ तादृशः ॥ १८५ ॥

अभूत्पुण्याढ्यभूपस्य भूपसद्मैव केवलम् ।
यया राज्यं समस्तं तदर्धराज्यहरे नरे ॥ १८६ ॥
भटासैनिकभक्तान्या मध्ये ऽपि भुजभृद्गणः ।
को ऽपि स्यादिति संनद्धवर्मजालश्चचाल सः ॥ १८७ ॥
आधोरणाग्रणीस्तस्य वारणाधिपतेस्तदा ।
प्राञ्जलिर्जगतीजानिं विजयाय व्यजिज्ञपत् ॥ १८८ ॥
जयत्येव रणोत्साहसंगतो ऽसाविभो विभो ।
अस्मिन्नारूढनाथाशु मुञ्चतामाशुहृद्गणैः ॥ १८९ ॥
एवमस्मिन्निति जल्पन्तं गोपमारोपयद्द्विपे ।
हस्तिपालस्तदाकाल इव पूर्वाचले रविम् ॥ १९० ॥
अथायमचलच्छोद्धुमचलश्रीरिभप्रभुः ।
अंवेपिनो भटाः के ऽपि पट्टभक्ताः पुरो ऽभवन् ॥ १९१ ॥
शौर्यलक्ष्मीनटीनाट्यारम्भसंभ्रमभृत्तनः ।
अमिलत्तुमुलोत्तालं तालवद्बलद्वयम् ॥ १९२ ॥
विपक्षासिप्रहाराणां हाराणामिव पातिनाम् ।
सज्जीचक्रुः शरीराणि वीरश्रीलम्पटा भटाः ॥ १९३ ॥
गायत्कोदण्डदण्डज्यो नदद्द्विरदमर्दलः ।
नृत्यद्वीरकबन्धो ऽयं बन्धुरो ऽभूद्रणक्षणः ॥ १९४ ॥
भग्नपुण्याढ्यभूभर्तुः क्षणेनाथ द्रुमानिव ।
उन्मूलयद्भिः भग्नं द्विट्पूरैः सिन्धुपूरवत् ॥ १९५ ॥
हस्ती न हन्त हन्तव्यः पटुरेवैष हन्यताम् ।
इत्यूर्ध्वपाणिरवदत्तदा वीरान्धनावहः ॥ १९६ ॥
क्षीणोपान्तस्वसैन्यो ऽपि दुर्धर्षो ऽथ करीश्वरः ।
रिपुसैन्यं ममन्थासौ दधि मन्थानको यथा ॥ १९७ ॥

करी सर्वाभिसारेण ततो ऽरोधि विरोधिभिः ।
रजनीसमयेऽश्रान्तैर्ध्वान्तैरिव वियत्पथः ॥ १९८ ॥
इत्यस्मिन्संकटे तिष्ठन्पुण्याढ्यनृपतिर्जनैः ।
किमध्यासि करीशेण राज्ये ऽसावित्यशोच्यत ॥ १९९ ॥
तृणमप्यात्महस्तेन कुरु शस्त्रं रिपुञ्जय ।
तदेत्युवाच पुण्याढ्यमदृश्या भाग्यदेवता ॥ २०० ॥
तदैव दैवतस्तस्य मारुतेरितं करे ।
आरोह्य तृणं शस्त्री शस्त्रमित्याक्षिपच्च सः ॥ २०१ ॥
अथाशु स्फूर्जद्गर्जस्विस्फूर्जथुस्फोटिताम्बरम् ।
लोलत्कीलाकुलोद्धृत्यथगाहिग्मण्डलोदरम् ॥ २०२ ॥
कम्पमानानलचयं भयभुग्नजगत्त्रयम् ।
तृणमप्यभवद्वज्रं व्योम्नि पुण्याढ्यपुण्यतः ॥२०३॥ युग्मम्॥
यो न नंस्यति पुण्याढ्यं तत्र वज्रं पतिष्यति ।
इत्यभूच्च नभोवाणी भूपभाग्याधिदैवतात् ॥ २०४ ॥
इत्युदन्तेन दन्तेषु तृणानीशास्तृणान्यधुः ।
नृपं नेमुश्च पुण्याढ्यमहो पुण्यमहोदयः ॥ २०५ ॥
दासस्ते ऽस्मीति जल्पन्तं कम्पयन्तं मुहुः स्तुतिम् ।
लुठन्तं भूतले भूपो ऽनुजग्राह घनाहवम् ॥ २०६ ॥
पुरं प्रविशतस्तस्य राज्ञो ऽथ जिनशासिनः ।
मर्यादानीरधारो ऽपि परिवारो ऽभवत्तदा ॥ २०७ ॥
पुण्याढ्यभूपतेराज्ञां राज्ञां मूर्धन्यनन्यनाम् ।
मागधानामसमानासु कुर्विन्दं विस्मयन्यदः ॥ २०८ ॥
इत्यम्बरगिरा साकं साकम्पभुवनत्रयम् ।
दूरादसंख्यदेशेषु दिवि तद्यशमभ्रमत् ॥ २०९ ॥ युग्मम् ॥

मद्गाभिन्यवैमानैः पूर्वीनाथाग्रमितस्ततः।
भ्रमितो नागु भीमागु भीमार्णवमस्फुरन् ॥ २१० ॥
अन्यायवानतोऽपि यथकं दृष्ट्वा च तत्पुरि ।
संसारात्पथःअपन्यायकरज्ञापभित् ॥ २११ ॥
मन्त्र विप्रांऽनेन्यासाभावातुरां च सर्वपुरीम् ।
आत्म दृष्टि दृष्ट्वं कार्यं सर्वमासस्तिर्मिर्नृपैः ॥२१२॥
प्रभातेत्यागनिधिन्नो यदुत्तमदीपतिः ।
श्रीपुन्याद्भ्यः गुरुं नम्याविन्धं स्वर्गं हरिर्यथा ॥ २१३ ॥
दुष्पवेन्यायनीपालं धर्नीपाल्यः कदापि नम् ।
अपर्गर्गाभयपाणिपङ्कजर्थाव्यनिवेपत् ॥ २१४ ॥
स्वामिभेऽनन्पुरन्ताभ्यो नपनन्नपानि स्थितः ।
आजगाम नदारामभवपिज्ञानभानुमान ॥ २१५ ॥
इत्याकर्ण्य प्रियः कर्णाभरणं धरणीपतिः ।
मुदितो दन्तिनगरं समागत्योद्यानमासदत् ॥ २१६ ॥
महामुनिमितानम्य निविष्टो हृष्टहृन्नृपः ।
कृताञ्जलिः करीन्द्रो अपि तस्थौ नयनगोचरे ॥ २१७ ॥
पुरस्य पुरभर्तुश्च प्रधानपुरुषैः प्रमात्र
दूरं मुनिसभापूर्णं भूमिभिर्धारितोऽञ्जुभिः ॥ २१८ ॥
ततः श्रुतसुधाम्भोधिशिविरस्तरीनिभाम् ।
निर्ममे निर्मदोऽसौ निर्मलां धर्मदेशनाम् ॥ २१९ ॥
इहानादौ भवे अनादिर्जीवो अनादिस्वकर्मतः ।
अव्यवहारराशौ स्याद्दुःसहबहुदुःखभाक् ॥ २२० ॥
असंख्या यत्र गोलाः स्युर्गोले असंख्यनिगोदकः ।
एकैकस्मिन्निगोदे स्युरनन्ता जन्तवः स्थिराः ॥ २२

अन्योन्यजन्तुसंवाससंमर्दोत्पीडपीडितः ।
जीवो ऽनन्तान्भवानेकेन्द्रिय एवात्र संवसेत् ॥ २२२ ॥
उत्पत्तिनाशैस्तत्रैवाकामनिर्जरया चिरात् ।
क्षिपेत्कानिचित्किंचित्कर्माणि कथमप्यथ ॥ २२३ ॥
एवं तेषु निगोदेषु सो ऽनुभूय महाव्यथाम् ।
आयाति व्यवहाराख्यराशौ दैववशादिह ॥ २२४ ॥
अत्यन्तस्थावरो ऽप्यत्र कथंचित्कर्मलाघवात् ।
मानुष्यमुत्तमं प्राप्य भवे तत्रैव सिध्यति ॥ २२५ ॥
प्रायेणान्यस्तु सर्वो ऽपि संसारे स्वस्वकर्मभिः ।
चतुरशीतिलक्षासु जीवो भ्राम्यति योनिषु ॥ २२६ ॥
तथाहि ।
जन्मानि सप्तलक्षाः स्युः पृथ्वीकाये शरीरिणः ।
जले सप्तानले सप्तानिले सप्त स्वकर्मतः ॥ २२७ ॥
द्विधा वनस्पतिर्ज्ञेयः प्रत्येकानन्तभेदतः ।
तत्राद्ये दशलक्षाणि द्वितीये तु चतुर्दश ॥ २२८ ॥
द्वीन्द्रिये त्रीन्द्रिये द्वे द्वे लक्षे चतुरिन्द्रिये ।
लक्षाश्चतस्रो नित्यं नरकत्रिदशालये ॥ २२९ ॥
लक्षाश्चतस्रस्तिर्यक्षु मनुष्येषु चतुर्दश ।
वर्णाद्यैः समवेतं तदुक्तं स्थानं तु यद्यपि ॥ २३० ॥
चतुर्भिः कलापकम् ॥
इत्थं भ्राम्यन्भृशं प्राप्य कथमप्येति भो नृणाम् ।
आर्यक्षेत्रसुगोत्रायुरक्षाद्यगुणान्विते ॥ २३१ ॥
न स्यात्तत्र गुरुप्राप्तिः सा चेज्जिनागमश्रुतिः ।
सापि चेत्तस्य जीवस्य हृदि श्रद्धा समुद्गमेत् ॥ २३२ ॥

चतुर्दशाब्ददेशीयाः कामं विरहकातराः ।
खेलन्ति स्म सहेलं ते पुरि पौरप्रियश्रियः ॥ २४५ ॥
ते सज्जनमनस्तोपकारितुल्यक्रियास्त्रयः ।
साधोर्मनोवचःकायमपञ्चा इव रेजिरे ॥ २४६ ॥
कदाप्युद्यानमेदिन्यां ते ययुः केलिलालसाः ।
ददृशुश्च कमप्युद्यत्कायोत्सर्गस्थितं यतिम् ॥ २४७ ॥
प्रीतिमन्तो नमन्ति स्म ते यतेः पद्योः पुरः ।
उत्क्रमन्ति स्म लोकाग्रं यावत्पुण्येन वर्त्मणा ॥ २४८ ॥
पयःकणो ऽपतत्पृष्ठे वामनस्य नमस्यतः ।
मुक्तिसीमन्तिनीमुक्तमौक्तिककर्कोपमः ॥ २४९ ॥
स चातक इवोत्पश्यः पश्यन्वारिद्विवागमम् ।
गलदश्रुजलं साधोरेकमीक्षणमैक्षत ॥ २५० ॥
निरीक्ष्य निपुणं दक्षः स्ववयस्यानुवाच सः ।
नेत्रं मुनेर्दुनोत्यस्य दृश्यतामेष कण्टकः ॥ २५१ ॥
मारुतोर्मिधुतो नूनमयमस्यापतद्दृशि ।
नाकृष्येत शरीरे ऽपि निरीहेणामुना पुनः ॥ २५२ ॥
अक्षमत्करो ऽल्पकायत्वाक्षितदम्बकचुम्बकः ।
तत्कथं कण्टकः क्रष्टुं शक्यो ऽरिष्टमिवात्मनः ॥ २५३ ॥
रामो वामनमाचष्ट सखे मा खेदमुद्वह ।
चतुष्पदीभवाम्येष पाणिस्पृष्टमहीतलः ॥ २५४ ॥
मत्पृष्ठदत्तपादाग्रो वामन त्वमवामनः ।
भव हर्षहृदं कर्ष कण्टकं मुनिनेत्रतः ॥ २५५ ॥
अथ जग्राह संग्रामो व्यामोहद्रोहहृद्वचः ।
सगे निर्मोहि कर्मद्रुमव्यग्रो मत्करग्रहात् ॥ २५६ ॥

[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥

ते ऽथ पातकपूरेण दूरिताः पूरितायुषः ।
यथा यथा समुत्पन्नाः शृणु भूप तथा तथा ॥ २६९ ॥
फलं मे पशुरूपत्वमिति हासोक्तिकर्मणः ।
स रामः सामजो जज्ञे नः पुण्यैर्ज्ञानवानयम् ॥ २७० ॥
मुनिरक्तस्कन्धाकर्षाद्राज्यं निष्कण्टकं भवेत् ।
इत्युक्त्या प्राप संग्रामजीवो ऽहं तादृशं फलम् ॥ २७१ ॥
मार्गश्रीरागतो नागवरो ऽसौ मामुपागतः ।
बोधितो ऽद्यमनेनेदं प्राक्कर्मफलमामदम् ॥ २७२ ॥
यस्त्वासीद्वामनः किंचिद्द्रोश्रगर्वाद्विवामनः ।
भूपस्वरूपमेनस्य शृणु शेषं विशेषतः ॥ २७३ ॥
अस्त्यवन्ती समस्तार्थानवन्ती नामतः पुरी ।
चारुलक्ष्म्या क्रीडतो ऽपीडं यस्यां जनमुखाम्बुजे ॥ २७४ ॥
तस्यां रम्यामशैलाग्रप्रस्थ्याख्यातिनिर्झरः ।
विरोधिरिभकुक्षाहुः सुबाहुरिति भूपतिः ॥ २७५ ॥
तस्य धार्मीपतेस्तद्वरः क्षिप्रसंज्ञकः ।
गृहिणी हरिणी तस्य हरिणीनयनानति ॥ २७६ ॥
गुरुर्ता वामनस्यात्मा गर्भे ऽस्याः समवातरत् ।
गर्भानुभावतो ऽपश्यत्तदा सा स्वप्नमद्भुतम् ॥ २७७ ॥
तत्क्षणं हरिणी त्यक्तनिद्रा चन्द्रमुखी मुदम् ।
पल्यङ्कादुत्थिता पत्युः सुप्तिनेति व्यजिज्ञपत् ॥ २७८ ॥
संमोदं स्वा गतेनाभिषेकं वितन्वती ।
देवभृङ्गे महालक्ष्मीः स्वप्ने ऽद्य दृष्टा मया ॥ २७९ ॥
अथावददतो नारीं क्षिप्रः शृणु सुन्दरि ।
सर्वोत्तमगुणोत्पत्तिसूचकः स्वप्न एष ते ॥ २८० ॥

सा पूर्णदोहदा तूर्णमन्तःसंतोषशालिनी ।
मुहुरानन्दसंदर्भाद्वपुः सपुलकं दधौ ॥ २९३ ॥
अथैन्द्रजालिको हर्षहारिणा च्छत्रधारिणा ।
कृतकृत्यः कृतः कृत्यविदा सर्वस्वदायिना ॥ २९४ ॥
अङ्गसंगतनिःशेषामुद्रसामुद्रलक्षणम् ।
सुतं सूते स्म कालेन साथ पाथोधिशायिनी ॥ २९५ ॥
पितृभ्यां निर्मितानेकमहाभ्यामहनि प्रिये ।
श्रीदत्त इति चक्रे ऽस्य नाम स्वमानुमानतः ॥ २९६ ॥
विकासिरक्तराजीवराजीसमकरक्रमः ।
अतन्द्रचन्द्रमश्छायाचौरगौरमुखच्छविः ॥ २९७ ॥
असावनन्यसामान्यसर्वावयववैभवः ।
बभौ मातृपितृस्वान्तानन्दनो नन्दनो ऽधिकम् ॥२९८॥युग्मम्॥
स क्रमादक्रमारूढगूढागूढगुणोच्चयः ।
अवाप कामं वामभ्रूनयनैकप्रियं वपुः ॥ २९९ ॥
ईदृग्लक्षणः क्षोणीपतिः स्यादिति मौक्तिकी ।
वक्तया पृथिवीनाथश्रुतिगोचरतां गता ॥ ३०० ॥
छद्मनैव निशम्यैषं वध्यः स इति भूपतिः ।
मदान्धाह भयात्कस्य न पापे रमते मतिः ॥ ३०१ ॥
ज्ञात्वेति नृपवृत्तान्तं सुहृदेकतो भयात् ।
श्रीदत्तस्तत्र एकाकी निरगान्नगरान्निशि ॥ ३०२ ॥
अहर्निशं निराहारविहारः सप्तभिर्दिनैः ।
प्राप्तश्रमोदरः श्रान्तः कान्तारं किंचिदाप सः ॥ ३०३ ॥
पनामपि संशोधनपरः पश्यन् ।
मपि मन्दार-च्छायायां स पर्यटन्ः ॥३०४॥

तद्रसस्याल्पभागस्यास्वादः संतुष्टिनाद्भुतः ।
द्विदिनानेन ॥ भवान्भुवनाधिपतिः कृतः ॥ १०५ ॥
यद्गोत्रगर्वतः साधोः पुरोऽल्पमपि चिन्तितम् ।
तद्रूपश्चो ऽसि पुण्यात्मन् किंचिन्नीचकुले किल ॥ १०६ ॥
मूकसंकोचिनाकृपि मस्तं यन्मुनिर्लोचनात् ।
समयेवाङ्गसंकोचो राज्यं प्राप्यन तत्त्वया ॥ १०७ ॥
तत्कर्मामपरत्वना भवता भाविना च यत् ।
तद्धेयमहत्त्वं ते राज्यं राजसत्तम ॥ १०८ ॥
कदापि क्वापि कस्यापि नैवाद्भुतकर्मणः ।
पुण्यादैन्यमनर्थं च नामवन्न भविष्यति ॥ १०९ ॥
तद्वितः स्पष्टदृष्टान्तामित्यं कर्मणि निर्मले ।
स्थातव्यं भवभैरवपारगैः पुरुषोत्तमैः ॥ ११० ॥
अथ पृथ्वीपतिः प्राह प्रभो भेषज संपदम् ।
संसारवारिधेः सेतुं केतुं धर्मपदीपनेः ॥ १११ ॥
अथाचष्ट गुरुः स्पष्टं मतिमैत्र्यादिकर्मसु ।
भवभो ऽसि समाभर्तैर्मनमस्तु गुणमय ॥ ११२ ॥
किं ते प्रश्नेन कष्टेन विशिष्टगुणताश्रय ।
अस्मिन्नेव भवे भावी भवतो ऽपुनर्भवः ॥ ११३ ॥
इत्युक्तो ऽप्यरमयः सर्गविस्मयः शास्त्रिणं नृपः ।
गुरुस्तुवाच किं मे स्याद्गृहिणो ऽप्यपुनर्भवः ॥ ११४ ॥
भगवान्वचनः प्राह शृणु पुण्यात्मभूपते ।
ते पञ्चदशभिर्भेदैः सिद्धाः स्मृतिह तथा ॥ ११५ ॥
सिद्धतीर्थंकरा ऽतीर्थाः प्रत्येकबुद्धकः ।
स्वलिङ्गः परलिङ्गश्च नरलिङ्गो नपुंसकः ॥ ११६ ॥

तीर्थसिद्धोऽतीर्थसिद्धः तीर्थसिद्धो बुद्धबोधितः ।
एकसिद्धोऽनेकसिद्धः स्वयम्बुद्धो गृही तथा ॥ ३१७ ॥
एकस्मिन्समये जीवाः सार्धशतद्वये अपि तु ।
एकमारभ्य सिध्यन्ति यावदष्टोत्तरं शतम् ॥ ३१८ ॥
सिद्धत्वे केवलज्ञानं कारणं कीर्तितं जिनैः ।
तत्तु कर्मक्षयादेव ध्यानात्कर्मक्षयो भवेत् ॥ ३१९ ॥
अन्तर्मुहूर्तमेकाग्रचिन्ता ध्यानमिदं पुनः ।
आर्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ॥ ३२० ॥
ऋतमित्युच्यते दुःखं तस्मादेतद्भवेदिति ।
आर्तं विदुरिदं ध्यानं तच्चाप्युक्तं चतुर्विधम् ॥ ३२१ ॥
इन्द्रियाभिमतवस्तूनां नाशो या दुःखितो भवेत् ।
अतीवविरहातीवोच्छेदचिन्तेदमादिमम् ॥ ३२२ ॥
द्वितीयं रुजि सत्यां तत्प्रतीकारैकचेतसः ।
तद्विप्रयोगतद्संप्रयोगातीवचिन्तनम् ॥ ३२३ ॥
तृतीयं लिप्सविषयनाशे संहृष्टचेतसः ।
चिन्ता तद्वियोगे च तत्सङ्गे च महास्पृहा ॥ ३२४ ॥
तुर्यं च चक्रिशक्रादिगुणर्द्धिप्रार्थनामयम् ।
निदानमधमं ज्ञानकाणिकामप्यविभ्रतः ॥ ३२५ ॥
हिंसादिक्रूरतायुक्तं रौद्रमाहुस्तदुद्भवम् ।
ध्यानमप्युच्यते रौद्रं चतुर्धा तदपीरितम् ॥ ३२६ ॥
वधबन्धननिर्दाहाङ्कनमारणकर्मणाम् ।
जीवेषु प्रणिधानं यन्निर्दयस्य तदादिमम् ॥ ३२७ ॥
द्वितीयं स्वतिसंधानसनिर्बन्धस्य मायिनः ।
असद्भूतभूतयातिकूटवाक्प्रणिधानमयम् ॥ ३२८ ॥

तृतीयं त्वतिदुष्टस्य भूरिक्रोधकलुषाहृदः ।
भूतघातपरद्रव्यापहारप्रणिधानमयम् ॥ ३२९ ॥
शब्दादिविषयापूर्तिहेतुषु द्रविणेषु यत् ।
रक्षिसंग्रहसंरक्षाप्रणिधा तत्तुरीयकम् ॥ ३३० ॥
उत्पद्यमानमप्येतद्द्वयं वार्यं शुभाशयैः ।
उपेक्षितं प्रमादात्तु महादुःखाय जायते ॥ ३३१ ॥
धर्मादनपेतं तद्धर्म्यं तत्तु चतुर्विधम् ।
आद्यं तत्र जिनाज्ञायाः पालनं तत्त्वनिश्चयात् ॥ ३३२ ॥
कषायविषयापायत्राणचिन्ता द्वितीयकम् ।
तृतीयं चिन्त्यते कर्मविपाकश्च शुभाशुभः ॥ ३३३ ॥
उत्पत्तिविगमध्रौव्यस्वरूपस्य नराकृतेः ।
अनाद्यन्तस्य लोकस्य चिन्तनं तच्चतुर्थकम् ॥ ३३४ ॥
अन्यथा वा चतुर्धोक्तं धर्म्यध्यानमिदं बुधैः ।
पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ॥ ३३५ ॥
देहस्थं ध्वस्तकर्माणं चन्द्राभं ज्ञानिनं सुधीः ।
यत्रात्मानं परिध्याय पश्येत्पिण्डस्थमत्र तत् ॥ ३३६ ॥
मन्त्राक्षराणि शारीरपद्मपत्रेषु चिन्तयेत् ।
गुर्वादेशेन यद्योगी पदस्थं तदिहोच्यते ॥ ३३७ ॥
सप्रातिहार्यं समवसृतिस्थं ज्ञानिनं जिनम् ।
तद्बिम्बं वा स्मरेद्योगी यत्तद्रूपस्थमिष्यते ॥ ३३८ ॥
यदमूर्तं महानन्दमयं सिद्धं निरञ्जनम् ।
ध्यायेद्योगी परात्मानं रूपातीतं दिशन्ति तत् ॥ ३३९ ॥
एवं संक्षेपतः प्रोक्तं धर्मध्यानं धराधिप ।
इह लोके ऽपि माहात्म्यमस्यानन्तं सतां भवेत् ॥ ३४० ॥

तीर्थसिद्धो ऽतीर्थसिद्धः लिङ्गसिद्धो बुद्धबोधितः ।
एकसिद्धो ऽनेकसिद्धः स्वयम्बुद्धः स्त्री तथा ॥ ३१७ ॥
एकस्मिन्समये जीवाः मार्गीयाले ऽपि तु ।
पुरुषारब्ध सिध्यन्ति मासस्योत्तरं शतम् ॥ ३१८ ॥
सिद्धत्वे केवलज्ञानं कारणं कीर्तितं जिनैः ।
तत्तु कर्मक्षयादेव ध्यानात्कर्मक्षयो भवेत् ॥ ३१९ ॥
अन्तर्मुहूर्तमेकाग्रचिन्ता ध्यानमिदं पुनः ।
आर्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ॥ ३२० ॥
ऋतमित्युच्यते दुःखं तस्मादेतद्भवेदिति ।
आर्तं विदुरिदं ध्यानं तच्चोक्तं चतुर्विधम् ॥ ३२१ ॥
इन्द्रियार्थैरसम्पूर्णा भामा या दुःखिनो भवेत् ।
अतीवविरहातीवोच्छेदचिन्तेदमादिमम् ॥ ३२२ ॥
द्वितीयं रुजि सत्यां तन्मतीकारैकचेतसः ।
तद्विमयोगतदसंमयोगातीवचिन्तनम् ॥ ३२३ ॥
तृतीयं त्विष्टविषयनाशे संहृष्टचेतसः ।
चिन्ता तद्वियोगे च तत्सङ्गे च महास्पृहा ॥ ३२४ ॥
तुर्यं च चक्रिशक्रादिगुणर्द्धिमार्थनामयम् ।
निदानमधमं ज्ञानकणिकामप्यविभ्रतः ३२५ ॥
हिंसादिक्रूरतायुक्तं रौद्रमाहुस्तदुद्भवम् ।
ध्यानमप्युच्यते रौद्रं चतुर्धा तदपीरितम् ॥ ३२६ ॥
वधबन्धननिर्दाहाङ्कनमारणकर्मणाम् ।
जीवेषु प्रणिधानं यन्निर्दयस्य तदादिमम् ॥ ३२७ ॥
द्वितीयं त्वतिसंधानसनिर्बन्धस्य मायिनः ।
असद्भूतभूतघातिकूटवाक्प्रणिधानमयम् ॥ ३२८ ॥

तृतीयं त्वनिशं दुष्टस्य भूरिस्तेयक्रियादृढः ।
धूर्तज्ञानपरद्रव्यापहारप्रणिधानमयम् ॥ १२९ ॥
शब्दादिविषयाप्तिहेतुषु द्रविणेषु यत् ।
स्वभिसंग्रहसंरक्षाप्रणिधा तत्तुरीयकम् ॥ १३० ॥
उत्पद्यमानमप्येतद्द्वयं वार्यं शुभाशयैः ।
उपेक्षितं यतस्तत्तु महादुःखाय जायते ॥ १३१ ॥
धर्मादनपेतं तद्धर्म्यं तत्तु चतुर्विधम् ।
आद्यं तत्र जिनाज्ञायाः पालनं तत्त्वनिश्चयात् ॥ १३२ ॥
कषायविषयापायत्राणचिन्ता द्वितीयकम् ।
तृतीयं चिन्त्यते कर्मविपाकश्च शुभाशुभः ॥ १३३ ॥
उत्पत्तिविगमध्रौव्यस्वरूपस्य नराकृतेः ।
अनाद्यन्तस्य लोकस्य चिन्तनं तत्तुर्यकम् ॥ १३४ ॥
अन्यथा वा चतुर्धोक्तं धर्म्यध्यानमिदं बुधैः ।
पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ॥ १३५ ॥
देहस्थं ध्वस्तकर्माणं यत्रात्मं ज्ञानिनं सुधीः ।
यथात्मानं परंध्येयं तत्पिण्डस्थमत्र तत् ॥ १३६ ॥
मन्त्राक्षराणि शारीरपद्मपत्रेषु चिन्तयेत् ।
गुर्वादेशेन यद्योगी पदस्थं तदिहोच्यते ॥ १३७ ॥
सप्रातिहार्यं समवसृतिस्थं ज्ञानिनं जिनम् ।
तद्बिम्बं वा स्मरेद्योगी यत्तद्रूपस्थमिष्यते ॥ १३८ ॥
यदमूर्तं महानन्दमयं सिद्धं निरञ्जनम् ।
ध्यायेद्योगी परात्मानं रूपातीतं विदन्ति तत् ॥ १३९ ॥
एवं संक्षेपतः प्रोक्तं धर्मध्यानं धराधिप ।
इह लोके अपि माहात्म्यमस्यानन्तं सतां भवेत् ॥१४०॥

सूक्ष्मैर्निर्विपाकुमैः शुभे [illegible]: ।
[illegible] ध्याने वदन्ति [illegible] ॥ ३४१ ॥
पूर्वके ऽपि पदार्थानामनुमान[illegible]: ।
[illegible] ॥ ३४२ ॥
[illegible] पदार्थे विज्ञाने [illegible] ।
[illegible] ॥ ३४३ ॥ युग्मम् ॥
[illegible] निरर्थः ।
[illegible] ॥ ३४४ ॥
[illegible] केवलज्ञानसंयुतम् ।
[illegible] ॥ ३४५ ॥ युग्मम् ॥
निरुद्धे बादरयोगानां [illegible] केवलिनः प्रभोः ।
[illegible] ॥ ३४६ ॥
श्वासोच्छ्वासक्रिया सूक्ष्मा यत्र यत्र निवर्तते ।
तृतीयं कथ्यते सूक्ष्मक्रियं तदनिवर्तकम् ॥ ३४७ ॥ युग्मम् ॥
अङ्गत्यागे ऽपि यत्रात्मा शैलेशीकरणस्थितः ।
[illegible] न मुञ्चति ॥ ३४८ ॥
[illegible] मुक्तश्वासोच्छ्वासादिकक्रियम् ।
अनिवर्ति च तत्प्राहुस्तुर्यं व्युपरतक्रियम् ॥ ३४९ ॥ युग्मम् ॥
आत्मकार्मविकल्परूपं कर्मक्षयोदितम् ।
केवलज्ञानकाले स्याद्ध्यानं शुक्लं तु योगिनः ॥ ३५० ॥
एतद्ध्यानं स्वतो जातं सद्गुरोर्वोपदेशतः ।
वज्रऋषभनाराचदेहस्यैव स्थिरं भवेत् ॥ ३५१ ॥
इदं स्थिरत्वमापन्नं कृत्वा कर्मक्षयं क्षणात् ।
जनयेत्केवलज्ञानं योगीन्द्रस्य शिवप्रदम् ॥ ३५२ ॥

सिद्धा भविष्यति ॥ १५३ ॥
ाह्मनमण्डनम् ।
ारिष्यति सर्वथा ॥ १५४ ॥
व धर्म मम प्रभो ।
श्रद्धापूरितचेतसा ॥ १५५ ॥
द्वादशमन्त्रभूषितम् ।
ानिलयोऽन्तरे ॥ १५६ ॥ युग्मम् ॥
ृशानाम्सं प्रदाय सः ।
पादिति तं नृपम् ॥ १५७ ॥
विधिज्ञाननिधिर्गजः ।
धर्मवान्यवनां गतः ॥ १५८ ॥
वि न किंचित्पीडयिष्यति ।
तस्येव सिद्धिर्सौख्यभाक् ॥ १५९ ॥
ःशेषनिमदोषहृत् ।
पि भूप चिद्रूपचेतनः ॥ १६० ॥
घर्मोन्मायरत्यामिमाम् ।
ाः स्वाचारमासदत् ॥ १६१ ॥
ुर्याम्राराजितम्नतः ।
ाधाम्यधारयत् ॥ १६२ ॥
पियास्य व्यधापयत् ।
न्धारानाराधिकक्रियाः ॥ १६३ ॥
न मन्तुकृपया द्विपः ।
तस्य मर्मेणैव धारणाः ॥ १६४ ॥

मर्यादायन्त्रिताहारविहारो विदधे ऽन्वहम् ।
शमजातमनःशैत्यः स चैत्यपरिपाटिकाम् ॥ ३६५ ॥
द्विपः स पर्वसूद्धर्वधर्मकर्मा विनिर्ममे ।
साधुश्राद्धौघमध्यस्थो जिनयात्रोत्सवादिकम् ॥ ३६६ ॥
इत्येष करिणामिन्द्रः करुणामुद्रिताशयः ।
समयान्गमयामास बहून्राज्ञा बहूकृतः ॥ ३६७ ॥
अन्येद्युर्गजवर्यस्तं गजमस्तंगतोद्यमम् ।
वीक्ष्य ज्वरभराक्रान्तं राज्ञे व्यज्ञपयद्द्रुतम् ॥ ३६८ ॥
राजन् राजति यो युष्मज्जीविनस्यापि जीवितम् ।
कुम्भी रिपुयशःकुम्भी सो ऽभवज्ज्वरजर्जरः ॥ ३६९ ॥
ततः पितुरिव भ्रातुरिव मातुरिव ज्वरम् ।
आकर्ण्य व्याकुलो ऽभ्यर्णे गजस्य स ययौ नृपः॥ ३७० ॥
अथाह पृथिवीजानिर्यः कुर्यान्नीरुजं गजम् ।
दद्यामद्यात्मनस्तस्मै राज्यार्धं राज्यमेव वा ॥ ३७१ ॥
किं राज्यैस्त्वत्प्रसादान्नः किमल्पमिति जल्पिनः ।
गजराजरुजश्छेदे वैद्याश्चक्रुरुपक्रमम् ॥ ३७२ ॥
स रिपून्परिपूर्णायुर्जेतु कर्माभिधान्पुनः ।
सार्धं रोगपरीतो ऽयं करी तोयं विमुक्तवान् ॥ ३७३ ॥
अस्यां रुजि न जीवामि जगृहे ऽनशनं मया ।
इति च क्ष्मापतेराख्यत्क्षितिन्यस्ताक्षरः करी ॥ ३७४ ॥
मध्ये पुरस्य न श्रेयो मरणं करिणामिति ।
जगाम सामजन्मायं शनैरुपवनावनीम् ॥ ३७५ ॥
अधः क्षिप्स्विव कर्माणि प्रपेष्टुं प्रतिमल्लवन् ।
उपाविक्षद्सौ वक्षःस्पृष्टस्वपूतभूतलः ॥ ३७६ ॥

चन्दनागुरुकर्पूरकस्तूरीणां भरैरिमम् ।
अह्नि वह्निहुतं चक्रे शोकाश्रुप्लुतदृग्नृपः ॥ ३८९ ॥
तस्य कालोचितां धर्मवृद्धां वन्योरिव क्रियाम् ।
विधाय दुःखदीनात्मा ययौ धाम धराधिपः ॥ ३९० ॥
दुःखदीर्घं दिनमयं गमयित्वा कथंचन ।
नृचन्द्रश्चन्द्रशालायां निशि शय्यामशिश्रियत् ॥३९१॥
श्वासोच्छ्वासोल्लसच्छोकशङ्कुसंकुल्यमानहृत् ।
निद्रामलभमानो ऽयमित्यन्तः समचिन्तयत् ॥ ३९२ ॥
बहुदेशमहैश्वर्यश्रियापि मम किं तया ।
मृते ऽस्मिन्सिन्धुरे कृत्तधम्मिल्लेव बभूव या ॥ ३९३ ॥
तारयेव विना दृष्टिरात्मनेव विना तनुः ।
कीदृशी भाति मे भूमिस्तेनेभविभुना विना ॥ ३९४ ॥
दृगिन्द्रियेण किं मे ऽद्य किमु कर्णेन्द्रियेण वा ।
येन दृश्यं न तद्रूपं येनाकर्ण्यो न तद्ध्वनिः ॥ ३९५॥
भ्रमन्ती यत्र तत्रापि खिन्नेयं नयनद्वयी ।
तद्विलोकसुधापानं विना तस्य क्व शाम्यतु ॥ ३९६ ॥
पुरातनानि मे सन्ति यदि पुण्यानि कानिचित् ।
तैरध्वनि दृशोरेकवारमेतु स वारणः ॥ ३९७ ॥
इति क्षितिपतिर्ध्यायन्नेत्राग्रे गजमैक्षत ।
अल्पकल्पद्रुमपुष्पं पुण्यं पुण्यवतां यतः ॥ ३९८ ॥
शोकाश्रूण्यथ हर्षाश्रुकुर्वन्नुर्वीन्दुरुत्थितः ।
आलिङ्गद्धस्तिनस्तस्य हस्तं हस्तोरसा रसात् ॥ ३९९ ॥
ईर्ष्या च किं मयादर्शि स्वप्ने व्यसुरसौ गजः ।
मृत एवायवा जीवत्येष स्वप्नाचिरीक्षितः ॥ ४०० ॥

मृतो न जीवतीत्युक्तिर्जिनशासनसाक्षिणा ।
कथंचिदन्यथापि स्याच्चित् वा कालेन केनचित् ॥ ४०१ ॥
इत्यनल्पविकल्पार्त्तं जनन्याश्चित्तमीदृशम् ।
नृपं विज्ञः स्मेरविस्मयं दिव्यया गिरा ॥ ४०२ ॥
हहा महात्मन्मोहस्त्वां किं ध्वान्तोऽकृविचारिताम् ।
यदन्यथा जिनमतग्रन्थोक्तमपि मन्यसे ॥ ४०३ ॥
मृत एवास्मि नाजीवमहं साजीवयोगतः ।
विचार्यो भवद्वाक्यान्तर्जिनागमागतिः कुतः ॥ ४०४ ॥
दृष्टो ऽस्मि यन्मृतो यस्मै स्पर्धनमथ पश्यसि ।
अत्यमनुल्ये न स्वमादिर्मा स्वमः क आगतः ॥ ४०५ ॥
तदनल्पयशाःस्थित्य तल्पेनाङ्गमलंकृत ।
यथयापि यथा भूप स्वरूपमदचात्मनः ॥ ४०६ ॥
अथोदारस्वमन्त्राक्ष्मन्तवच धराधवः ।
श्रोतुं तस्यापि तत्त्वमवाप्यवणाद्यः ॥ ४०७ ॥
स्यानन्तरमृत्काराभोविगुणोर्मिनिभवागिभः ।
भगदन्तदण्डाभिरूपकान्ताःसंगमन ॥ ४०८ ॥
राजप्रासन्नमनिर्ध्यासमपानधर्मविधायिना ।
मृत्युक्षणे स्वधर्मेण मोहितो ऽस्मि चिन्तयम् ॥ ४०९ ॥
निस्तारेणकृपटत्वा न त्यापि ये हरन्ति ये ।
तान्यथान्यदिह पश्यामि तथापि यथाक्षयम् ॥ ४१० ॥
इति संक्षेपान्तरोऽपः पावित्र्ये तदा ।
मायस्थार श्रीधर्मस्वामिना आगतागतः ॥ ४११ ॥
परमेष्ठिनमस्कारप्रभाविभवाभिर्भरैः ।
नियतः सर्वसंकल्पे ऽहं स्मरणीयेऽस्मि निरन्तरम् ॥ ४१२ ॥

प्राप्य सौधर्मदेवत्वं ममेदग्व्यभवं कुतः ।
इत्याशु ध्यायतादर्शि तन्निमित्तं मया भवान् ॥ ४१३ ॥
तन्नागविरहार्तस्य सद्यः प्रीतिकृते तव ।
मुक्तोरुदिव्यरूपश्रीस्त्वामागां नागरूपभाक् ॥ ४१४ ॥
प्रभुत्वं स्वमसादस्य मयि पश्यति स द्विपः ।
तद्दिव्यं दर्शयामास स्वं वपूरविपूरस्त्रक् ॥ ४१५ ॥
जीवतो भोगदस्त्वं मे म्रियमाणस्य धर्मदः ।
तत्प्रभुश्च गुरुश्चासि शून्यहस्तेन नेक्ष्यसे ॥ ४१६ ॥
पारिजाततरोः स्वर्गलक्ष्मीलक्षणलक्ष्मणः ।
गृहाणेदं फलं राजन्नमृतजिह्मितामृतम् ॥ ४१७ ॥
सद्य एवेदमास्वाद्यं क्षाल्यो ऽस्य रसनिर्झरैः ।
भवद्भाग्यविधेः पङ्को वपुःसंकोचविप्लवः ॥ ४१८ ॥
इदं निगदता तेन तद्दत्तं त्रुसदा फलम् ।
आदाय नृपतिः प्रीत्या प्रत्याह स हसन्वचः ॥ ४१९ ॥
आसन्नमुक्तपश्रुतामुल्लमं मोहमुद्वहन् ।
किं विवेकिन्फलस्वादं निशायां दिशसि स्वयम् ॥ ४२० ॥
सुरमुख्य ममेदानीं वपुपः पाटवेन किम् ।
नेच्छाद्दिव्याभलोभे अपि जन्यं रजनिभोजनम् ॥ ४२१ ॥
आहतं दुःखपूराय विमुक्तं पुण्यपंक्तये ।
स्यान्निशाभोजनं हन्त हंसकेतवयोरिव ॥ ४२२ ॥
तद्यथा पृथिवीकान्ताकुण्डलं कुण्डिनं पुरम् ।
अस्ति मुक्तालसणाकारसाकारपरिवेषभृत् ॥ ४२३ ॥
तस्मिन्यशोधनो नाम यशोधवलिताबनिः ।
बभूव नवद्रव्योपार्जकचूडामणिर्वणिक् ॥ ४२४ ॥

सिन्वा तावूचतुर्मातः सन्मार्गः सन्यते पितुः ।
सुपुत्रैरपि किं कूपे प्रतप्तानो ऽनुगम्यते ॥ ४३७ ॥
नाहं सम्प्रति लप्स्येथ न युवां भोजनं सुतौ ।
मातृत्युक्तौ ततो मौनं कृत्वा तौ नगनुरदिः ॥ ४३८ ॥
श्रेष्ठिनः सुतयोर्वाक्ये मिथ्यादृष्टेरगतिप्रियम् ।
विशेषादोपकृज्जाते ज्वरातस्य हविर्यथा ॥ ४३९ ॥
भवत्या भोजनं देयं रजन्यामेव पुत्रयोः ।
इत्यमत्यर्थशर्वः श्रेष्ठी रम्भापवारयत् ॥ ४४० ॥
जनन्याथ रजन्यां तावागताद्यर्थिनावपि ।
न भोजनं महानन्दचक्रिणौ चक्रतुस्तदा ॥ ४४१ ॥
द्वितीये ऽह्नि शठश्रेष्ठः श्रेष्ठी तौ विशदाशयौ ।
क्रयविक्रयलीलासु न्ययुङ्क्त महतीष्वसौ ॥ ४४२ ॥
तथा लाभरसाभोगभङ्गीभिस्तौ विलेसतुः ।
वदेव कुर्वतोः कर्म यथागानिधनं दिनम् ॥ ४४३ ॥
तौ धाम यामिनीयामसमये समुपागतौ ।
अभुक्त्वापतुः स्वापं तदभिग्रहमाग्रहौ ॥ ४४४ ॥
इति व्यवहृतिं पित्रा कार्यमाणौ रसेन तौ ।
अजातभोजनावेव ममुक्षौ पञ्च शर्वरीः ॥ ४४५ ॥
षष्ठे ऽहनि निशारम्भे संभेजतुरिमौ गृहम् ।
आचष्ट च वचः श्लक्ष्णं विनयेन यशोधनः ॥ ४४६ ॥
वत्सौ यत्सौख्यदं मे स्यादिदं स्पष्टं वदेव वाम् ।
इति मत्यमतः किंचिद्वच्मि तच्च विरच्यताम् ॥ ४४७ ॥
निशाहारपरीहारं न वेद्मि युवयोर्ध्रुवम् ।
तदीदृशि भृशक्लेशे युवां कार्ये नियोजितौ ॥ ४४८ ॥

पञ्चमुखवर्गोर्मुख्यैः पुत्रयोर्मे भवन्त्यपि ।
अपाच्यामन्दभूत्पाप्य तपनाम्ः प्रयाम्यहम् ॥ ४४९ ॥
तद्वां पश्चात्तमन्धाना स्वसा शुशुभकोमला ।
अन्यान्यमभ्यमानाय विपन्नस्थाना विन्दोवयनाम् ॥४५०॥
स्नानिमस्याः शिलार्थीस्य कारणं मम पृच्छतः ।
भाग्यप्रभवद्गुणाश्चापूर्वं सर्वमपं मनः ॥ ४५१ ॥
मनुष्यता यथा कुत्रुकैः भवन्मानापि संपदि ।
कृपासारैः शिलोरम्भा सा धन्विताद्भिर्पूर्व्यता ॥ ४५२ ॥
पूर्वं निशायां यामार्धं मण्डपः कीर्तितं नृपैः ।
मन्तूपं पश्चिमे तेन सा निपासेति विश्रुता ॥ ४५३ ॥
इदानीं भोजनं मह्यं न निशाभोजनं भवेत् ।
यामिनीपरिवर्जनमपि नाद्यापि याति यत् ॥ ४५४ ॥
इति तामगिरा भिक्षुः क्षुधा च विधुरीकृतः ।
देवः हिमवतावेशः वेदवाचनर्मसत्त ॥ ४५५ ॥
इति ज्यायांसमुद्भाम्य भ्रातरं कृत्यकातरम् ।
व्याचष्ट केशवः कष्टमनर्थं जनकं प्रति ॥ ४५६ ॥
यस्मिन् गुणकरो भावः करोषि तमहं पितः ।
न ते गुणायते मन्त्रिः यस्मै पातकघातकम् ॥ ४५७ ॥
यस्मिन्नन्यादिवाल्लभ्यं तदलभ्यं धर्मकर्मणः ।
स्वकर्मफलभुग्वर्गः कः कस्यार्थे करोत्ययम् ॥ ४५८ ॥
मूढोऽसौ प्रौढ़ मुग्धे अन्ते च निशासमो निशागमः ।
तथापि न भोक्तव्यं निर्निवास्त्वधुना पुनः ॥ ४५९ ॥
तद्वारं वारयेत्तं न वार्या अहं भवता पितः ।
कार्ये उस्मिन्विहिते शान्ति क स्थे भवतापितः ॥४६०

अथनमेनगं धाता सत्पिना कुपितो ऽवदत् ।
स्फुरो यदि महानं मुञ्च मोननव्रतं नत् ॥ ४६१ ॥
ततो ऽथ विरभूद्वन्द्वकन्दरादिव मन्दिरात् ।
स निःससार संसारकारणं ममतां त्यजन् ॥ ४६२ ॥
हंसं समनुगच्छन्तं कृच्छ्राद्धृत्वा यशोधनः ।
सलोभ्य बहुभिर्वाग्भिर्भोजनाय न्यवीविशत् ॥ ४६३ ॥
पुरग्रामनगारामविलङ्घनघनक्रमः ।
स ययौ समये ऽप्यह्नि तथैवासेनरात्र्यपि ॥ ४६४ ॥
अटव्यटव्यां कुत्रापि निशीथसमये ऽथ सः ।
घनयात्राजनं यक्षायतनं किंचिदैक्षत ॥ ४६५ ॥
तत्र यात्राजना यक्षगृहे सज्जितभोजनाः ।
हृष्यन्तः समभाषन्त तमागच्छन्तमुत्सुकाः ॥ ४६६ ॥
एह्येहि भोज्यमादेहि देहि पुण्यानि पान्थ नः ।
पश्यामः कामतिथिं वयमारब्धपारणाः ॥ ४६७ ॥
कीदृग्वत व्रतं यस्य निशि पारणमित्यथ ।
केशवो विकसत्पुण्यसन्तानस्तानभाषत ॥ ४६८ ॥
ते ऽवदन्माणवाख्यो ऽयं यक्षो दक्षो जगन्मुदे ।
स्यादस्याद्य महायात्रा पुण्यपात्रायितस्थितिः ॥ ४६९ ॥
कृत्वोपवासं दिवसे निशीथे ऽतिथिमादरात् ।
भोजयित्वा विधातव्यं पारणं पुण्यकारणम् ॥ ४७० ॥
तदीदृक्षोपवासानां पारणायोचयस्पृहाम् ।
त्वं भवातिथिरस्माकमाकस्मिकसमागमः ॥ ४७१ ॥
स जगौ नेह भुञ्जे ऽहमंहःकारिणि पारणे ।
रजन्यां भोजनं न स्याद्युक्तमुक्तमिदं यतः ४७२ ॥

उपवासे ऽत्र जायेत गुणो गुणाल्पको न वा ।
ध्रुवं दोषस्तु दोषायां भोजने भूयसाधिकः ॥ ४७३ ॥
उपवासो ऽप्यसौ न स्याद्यद्यर्वं निशि भुज्यते ।
धर्मशास्त्रेष्वहोरात्राभोजने स हि कीर्त्यते ॥ ४७४ ॥
धर्मशास्त्रविरुद्धं ये नराः कुर्वन्ति दुर्धियः ।
ते यान्ति दुर्गतिं धूर्ताः कूटद्रव्यकृतो यथा ॥ ४७५ ॥
ते ऽप्यवंसन्नसावेव देवस्यास्य व्रते विधिः ।
युक्तैरपि न शास्त्रोक्तैर्निरच्यास्य विचारणा ॥ ४७६ ॥
अवश्यमतिथिं केचिद्भोजयित्वाद्य भुज्यते ।
इति तद्दर्शने ऽस्माकं रजनिर्विपुलाजनि ॥ ४७७ ॥
तत्पूर्णे पारणे ऽस्माकमस्मिन्भव पुरःसरः ।
इत्युक्त्वोत्थाय ते सर्वे तस्य पाणिपदे ऽलगन् ॥ ४७८ ॥
पुण्यदाः केशवर्धनमध्यवासीगणद्रूणम् ।
एकस्तदैव पश्चात्ताज्जीर्णाद्धो निर्भयो नरः ॥ ४७९ ॥
रे दूषयसि मे धर्मं मज्ज्ञानमवमन्यसे ।
मुञ्च शीघ्रं न चेत्तुण्डं शतखण्डं करोमि ते ॥ ४८० ॥
इत्याक्षिप्य गिरा तीक्ष्णरूक्षया मंक्षु केशवम् ।
सो ऽयमुत्थापयामास मुहूर्तं विकरालदृक् ॥ ४८१ ॥
हसन्नथ मातुलो ऽप्याह किं क्षोभयसि वत्स माम् ।
भवान्तरीयन्नुरिभावपद्मैर्मन्तुर्भीः क ये ॥ ४८२ ॥
आचचक्षे ऽम्बरिषे ऽत्र यतः स्वान्तिकदूरानिति ।
एतद्धर्मगुरुर्ज्ञात्वानीय यन्तो ऽस्य पत्तनः ॥ ४८३ ॥
अथान्तरीये कल्पानशुद्धिमान्निकर्षणेनम् ।
आनम्रोपमर्षिं धर्मघोषमपृच्छत केशवः ॥ ४८४ ॥

किं राज्यदानसत्केन नार्थी राज्यभृतः कृताः ।
किं भापयसि मां मृत्योः का भीर्निधनभाविनः ॥४९७॥
एवं नियमवाग्दत्तं यक्षो ऽयं शान्तिमानिव ।
महर्षे हृष्टरोमाञ्चिः समालिङ्ग्य जगाद तम् ॥ ४९८ ॥
साधु धिष धियो पात्र न स्यादेष गुणस्तव ।
मृता मया न जीवन्ति नैव राज्यं च दीयते ॥ ४९९ ॥
इत्यमुक्त्व ऽथ यक्षेन्द्रे सहासं सहसोत्थितः ।
मुनिरूपं परित्यज्य स्वं ययौ यक्षकिंकरः ॥ ५०० ॥
जग्मुः पश्चापि तत्रापि मैत्र्यपात्रमिमे ऽभवन् ॥ ३६२ ॥
क्रमात्समस्तमप्येते पीत्वा स्वर्गसुखामृतम् ।
तदनन्तरियंनोर्वीतले पुनरवातरन् ॥ ३६३ ॥
स जीवो विश्वसेनस्य रतिसार भवानभूत् ।
जीवस्तु क्षत्रपुत्रस्य सुबन्धुत्वमधारयत् ॥ ३६४ ॥
जयवीरकलासारजीवाः सौभाग्यमञ्जरी ।
प्रीयंवदा सुतारा च कन्याः संजज्ञिरे पुनः ॥ ३६५ ॥
चञ्चद्गुणप्रपञ्चानां पञ्चानामपि तेन वः ।
जयत्ययं पृथुस्थेमा प्रेमा प्राग्भवसंभवः ॥ ३६६ ॥
जयार्यपुनो दानं मायया मुसतं तदा ।

भाग्ये भोग्यस्य तुल्ये ऽपि क्षीतं तेषामिदं ततः ॥ ३६७
श्रमणा हृदयं तेषामज्ञानमयदानकृत् ।
आहारस्यान्तरायेण त्रिदिनं दुःखभागभूः ॥ ३६८ ॥
अर्घाहारे मुनीन्द्राय दत्ते यत्ते पुरस्तदा ।
कुमार त्वं कृपाधारः क्षुधार्तेषु नापरः ॥ ३६९ ॥
इति स्तुतिवचोभङ्ग्या क्षुधार्तं स्वं निवेदयन् ।
अश्वेतराजदानस्य निषेधं सत्रमूर्ध्यधात् ॥ ३७० ॥
सुबन्धोरर्धभुक्तैव तेन श्रीगुरुबन्धुना ।
पक्षिणः फल्गुनस्फारं विषादं ददती हृदि ॥ ३७१ ॥
त्रिभिर्विशेषकम् ॥
पल्लवद्भिर्भवध्वंसनक्रमपथसाधकम् ।
पङ्के विरम्मुनेरङ्गं सद्यो रूपर्द्धिरीक्षी ॥ ३७२ ॥
त्वमपत्यः पुरा दृष्ट्वा पटुष्ठानप्यदुष्टया ।
त्वया काम्मुखावदृष्टा पत्न्याज्या हन्त मन्ततः ॥ ३७३
तस्यां मत्यधुना को ऽपि विरोधं विदधाति न ।
ये च किंचिद्विकिरन्ति दधने युधि ते ऽप्यनाम् ॥ ३७४ ।
युग्मम् ॥
ददानि देहिनां पुण्यं कानि कान्यद्भुतानि न ।
अपि देवा यदेवाप्य भवन्त्याश्चर्यभूमयः ॥ ३७५ ॥
एवं भागवमाकर्ण्य रतिमारे रतिस्पृशि ।
भूपो भक्तिनमन्मौलिरित्यपृच्छन्मुनिप्रभुम् ॥ ३७६ ॥
लक्षणानि निरीक्ष्यन्ते क्षोणिरक्षाक्षमाणि ते ।
अथापि चारुतारुण्ये भगवन्भासते भवान् ॥ ३७७ ॥
वयमीह ततस्तत्तत्कर्णाकूणोचिते ।
अपि राज्यमभित्यज्य किमात्मा शमे ऽर्पितः ॥ ३७८ ॥

अथ सत्यां गुणैर्गौरवरमणा हरिनाशिर ।
अनर्घ्यपद्धिं स्कन्धसूद्धाम वर्णिभिः ॥ ३७९ ॥
मान्यं वा नरा यान्तु यान्ताः कल्पान्तः ।
गत वा गत वा कृष्णनामो हि हरिनाम् ॥ ३८० ॥
गतप्राणि भक्तिः क क न शक्ति विना नराः ।
दर्शितप्रलम्बो बोधं नयति मोक्षम् ॥ ३८१ ॥
भक्तिकार्याणि कार्याणि जातो प्रारभेत यः ।
तस्य भवत्येव वृद्धिः पश्चिमरक्षयात्मना ॥ ३८२ ॥
मुग्धो मामन्यथा मत्वा मान्या पश्चिमामयः ।
शास्त्रार्थिभिस्तथापि फलदा कस्य धर्मतः ॥ ३८३ ॥
संस्थलाद्यालनखर्गशिखा पुनः ।
सर्वाश्रमो न कश्चित् स्यात्कुरूपालिताञ्जलिः ॥ ३८४ ॥
अमुं मीमांसकदीपकं विवेकं केनापि मे ।
आगत्य वर्त्मना येन मद्पूर्वं निवेद्यते ॥ ३८५ ॥
श्रीसूर्यपुरमित्यस्ति पुरं यत्रास्तिको जनः ।
धत्ते धर्मनृपक्रीडाकल्पद्रुमवनश्रियम् ॥ ३८६ ॥
इहाजानि महीमानिर्महेन्द्र इति विश्रुतः ।
अन्तर्बहिर्द्विपक्षीयं शास्त्रं शास्त्रं च यो दधौ ॥ ३८७ ॥
कुलोचितासु विद्यासु गुरुभिः कारितश्रमः ।
तस्याहं नन्दनश्चन्द्रयशा इत्याभिधामधाम् ॥ ३८८ ॥
दधौ षोडशवर्षीयं सुधावर्षी गिरां भरैः ।
भवतापी कदापीदं मामुपांशु नृपो जगौ ॥ ३८९ ॥
राज्यं संसारकान्तारे शृङ्गाटो ऽयमत्रमिह ।
कलितस्खलितः श्रीभिः पिशाचीभिः सपात्यते ॥ ३९० ॥

वदन्ति मुनयो मोहमहीपमहदीपताम् ।
यल्लोभलोलुपा नाथः के पतन्ति पतङ्गवत् ॥ ३९१ ॥
निर्नीपतो भवाम्भोधिं वाधिर्बोहित्यताहिताः ।
त्यजन्ति दूरतो मध्यभूधरानिव सिन्धुरान् ॥ ३९२ ॥
भवाटवीकुरङ्गाणां तुरङ्गाणां चलात्मनाम् ।
मोहधीदग्विन्यासानां गोचरे नो चरेत्कृती ॥ ३९३ ॥
मोहभूमिभुजङ्गस्य जङ्गमास्थानमण्डपम् ।
छायाउल्लाघने व्याप्तं पातकैस्तस्य सेवकैः ॥ ३९४ ॥
छत्रं विवेकमार्तण्डप्रकाशप्रसरनाशकम् ।
न को अपि सेवते तादृग्महत्तापविलः कृती ॥ ३९५ ॥
युग्मम् ॥
रत्नान्यगाधवर्तीनि श्रियो भान्ति भवार्णवे ।
पुमान्मज्जत्यनुन्मग्नो यत्पाणिग्रहणाग्रही ॥ ३९६ ॥
एतदीदृग्विधं मोक्तुमशक्तः सकम्पः कृती ।
असक्त एव सेवेत शीतभीत इवानलम् ॥ ३९७ ॥
तदिदानीमहं मोहादस्मि निर्गन्तुमुद्यतः ।
राज्ञां राज्यभ्रमः सूनुर्यौवनान्तो हि नः कुले ॥ ३९८ ॥
ततो मामिव वत्स त्वां स्वस्थाने ऽभिषिञ्चेय तद् ।
मोहवीरस्य कारातः संसारावधिरये ऽधुना ॥ ३९९ ॥
इत्युक्त्वा नन्दनो राज्याभिषेकं विरचय्य मे ।
नृपो लघ्यतपोलक्ष्मीपीयावनं प्रययौ वनम् ॥ ४०० ॥
परिपालयतो राज्यं ममापि न्यायनिष्ठया ।
राज्ञी रत्नवती नाम प्राणेभ्यो अपि प्रियाभवत् ॥ ४०१ ॥
भवानुबन्धिनी ज्ञानध्यपि तां स्मरतं मनः ।

आक्रष्टुं न क्षमो ऽभूवं पङ्कमग्नमिव द्विपम् ॥ ४०२ ॥
लग्नं तस्यां तथा प्रेमवज्रलेपेन मन्मनः ।
न यथाकृपि राज्यश्रीधुरीणैरपि वारणैः ॥ ४०३ ॥
तस्यामुच्छृङ्खलं कामपिशाचेन मनो मम ।
गृहीतं हन्त नामोचि मन्त्रज्ञैरपि मन्त्रिभिः ॥ ४०४ ॥
तदेकायत्तचित्तस्य राज्यश्रीरीर्ष्यया मम ।
परहस्तं पती तस्थौ वृद्धामात्यह्रिया हृदि ॥ ४०५ ॥
मानसे मानसेविन्या तया नित्याश्रिते ऽविशन् ।
स्त्रीसंघट्टभयेनेव न धर्मगुरवो ऽपि मे ॥ ४०६ ॥
इत्यनन्यमना धन्यंमन्यस्तन्न्यस्तलोचनः ।
अमन्ये मान्मथं पर्व निर्वाणपदमप्यदः ॥ ४०७ ॥
अन्यदा मदनानन्दरसनिद्रावशंवदः ।
स्वप्नमपश्यमहं स्वप्ने मुक्तागिरिशिखरम् ॥ ४०८ ॥
तस्यामुन्निद्रनिद्रायामुन्निद्रो ऽहं सदा हृदा ।
अचिन्तयमिदं चिन्तान्तरावसरशालिना ॥ ४०९ ॥
स्वप्नः सर्वोत्तमस्माकमुक्तेर्लाभं दिशत्यसौ ।
किं तु कान्तायत्तहृदः क्व तत्संभावनापि मे ॥ ४१० ॥
किंकुर्वत्काञ्चना कान्तिस्तृणन्मत्तगजा गतिः ।
दासदृश्या दृगुद्गाराः कर्कस्मणयो नखाः ॥ ४११ ॥
चेटकर्पूरकस्तूरिगुम्यगन्धो मुखानिलः ।
यस्या रेणुकणद्विव्यदुकूला दशनद्युतिः ॥ ४१२ ॥युग्मम्॥
युक्तं नयरत्या हन्ते राज्यभोगे ऽर्धीकृतम् ।
एतद्भोगं ऽर्धीकर्तुं को ऽभ्युपायो ऽस्तु मे ऽधुना ॥४१३॥
किमस्या न महानीलकान्तिं दधतु कुन्तलाः ।

दुर्नीतिभिः कलुषितं मुखं मे सीतयारि यैः ॥ ४१४ ॥
विमृश्य मुखं नेन्दुपदवीं लाभयन्ति मम ।
विवेकमज्जनर्द्धास्य इन्द्रियाणि गते गुणैः ॥ ४१५ ॥
अस्या नीलाब्जसदृशो दृशो नित्यमुन्मिषिताः ।
शंसन्ति सर्वविज्ञानभावमुपस्थितं मयि ॥ ४१६ ॥
अधरे मधुमाधुर्यपूर्णे अस्या यदङ्गं भृशम् ।
सदर्पं मन्मनो अमुक्षन्तृष्णः स्पृहयेत् स्यात् ॥ ४१७ ॥
एतस्याः कम्बुकण्ठो गम्भीरमधुरस्वरः ।
कृन्तनानां मम कृत्यानां मयानायं कल्पितः ॥ ४१८ ॥
अस्यैतन्मृदुदोर्नालपाशबद्धं निजं मनः ।
नाहं मोचयितुं शक्तो विगलज्जलराग्रणीः ॥ ४१९ ॥
नीलाङ्केव विलङ्घ्य उदरं भवसागरीम् ।
तस्यामस्याम् दुर्नीते पतितस्तो हृदापि मे ॥ ४२० ॥
सर्वतो अपि भवाम्भोधिः सुगरः सुतरामसौ ।
इतिमाभिगम्भीरावर्तेऽयमस्तु दुस्तरः ॥ ४२१ ॥
एतन्निरञ्जनमञ्जीरगमनविलासविस्मृता ।
हंसस्येवामलाः पतन्ति विस्मयोऽपगतनिःसमाः ॥ ४२२ ॥
इत्यादिध्यानसंलीने मयि त्वं निःसरति स्वयम् ।
अपकर्म्मासहत्वाच्च तरं वैवाग्निका यतिः ॥ ४२३ ॥
निद्रां नरेन्द्र मुखानुबोधस्य समयो यसौ ।
हन्तुं नमोऽभ्ययाद्यातुः संमोहमिव सद्गुरुः ॥ ४२४ ॥
एतामुपश्रुत्य मुक्तिसूचिनीं वन्दिनां गिरम् ।
स्वप्नसंवादिनीं ज्ञानमानन्दमहमापदम् ॥ ४२५ ॥
ततः प्रसन्नज्ञानात् साश्रु मेऽस्य मां मयमोऽन्विषम् ।

ह्रीनम्रास्या वचः किंचिन्नोचे मयि चतूचितम् ॥ ४

अगाधबोधिदुग्धाब्धिसंमुखान्तरचक्षुषा ।
समभापि मयाप्येषा न किंचिन्नर्मभाषया ॥ ४२७ ॥

अथाग्रभागमागत्य प्रणिपत्य च मां मुदा ।
व्याजहार प्रतीहारी हारीकृतरदद्युतिः ॥ ४२८ ॥

देव विज्ञपयत्येवममात्यो मतिसागरः ।
चिराद्भवन्मुखालोककौतुकी सेवको जनः ॥ ४२९ ॥

इति तद्वचनान्ते ऽहं नित्यमत्यूपकृत्यकृत् ।
सेवितां सेवकस्तोमैः सभाभुवमभासयम् ॥ ४३० ॥

ततः प्रणमतः सर्वानुर्वीनायान्निरूपयन् ।
वीक्ष्य कस्यापि हस्ते ऽब्जं तामब्जदृशमस्मरम् ॥ ४३

वचोवीचीषु पीयूषसध्रीचीषु मनीषिणाम् ।
तदा तद्विरहोत्तप्तं न रेमे तत्र मे मनः ॥ ४३२ ॥

उत्कः क्षिपाम्यहं चक्षुर्यावदन्तःपुरं प्रति ।
तावद्यावत्तनुं कंचिदुदब्धदतुल्यद्युतिम् ॥ ४३३ ॥

गाढग्रन्थिपरीधानं कटिबद्धोत्तरीयकम् ।
अंसलम्बितनिस्त्रिंशमुरोबद्धासिधेनुकम् ॥ ४३४ ॥

बिभ्राणं दक्षिणे पाणौ ताम्बूलदलमण्डलीम् ।
वामे तया तु हर्षिण्या कृतहस्तावलम्बनम् ॥ ४३५ ॥

चक्षुर्पार्श्वपर्यवपूर्वेण पश्यन्तं मामवज्ञया ।
नरं निरूपयामास निर्गच्छन्तं द्रुतैः पदैः ॥ ४३६ ॥

चतुर्भिः कलापकम् ॥

क एष क नयस्येतामिति कोपारुणेक्षणम् ।
मामित्यूचे हसन्ती सा तं स्थिरीकृत्य सत्वरम् ॥ ४३७॥

अहं महापातकिना बन्दीचक्रे चिरं त्वया ।
ममापि संप्रति न्यस्य त्वदीयहृदये पदम् ॥ ४३८ ॥
ईश्वरतद्वचनक्रुद्धो भग्नानित्यहमभ्यधाम् ।
ध्रियतां ध्रियतामेष हन्यतां हन्यतामयम् ॥ ४३९ ॥
ततो मत्स्वरातारमचरच्चरणः क्षणात् ।
तया सह स हर्म्याग्रमङ्गद्वार्धिमहीम् ॥ ४४० ॥
एष यात्येष यातीति मत्वानैरनुधावताम् ।
पुरःस्था अपि पौरास्तं न धर्तुं शेकुराहताः ॥ ४४१ ॥
उत्फुल्लफेनया धावद्यानां सेनया मया ।
मनसेवेन्द्रियग्रामः सो ऽन्वगामि संवेगिना ॥ ४४२ ॥
पर्यन्ते पर्यटन्पुर्यास्तदन्वेषपरः पुरः ।
आलोकयं चमूं काञ्चित्काञ्चनोद्भासिभूषणाम् ॥ ४४३ ॥
तदन्तर्भद्रदन्तीन्द्रपृष्ठारूढस्य कस्यचित् ।
करे तेनार्पि सा सो ऽपि तां वामाङ्के न्यवीविशत् ॥ ४४४॥
सा च वाचः सुदूरस्थं मां वीक्ष्य हीत्वलक्षपत्रा ।
तदङ्कालिङ्गिनी वामकराङ्गुष्ठमनर्तयत् ॥ ४४५ ॥
तन्निरीक्ष्य विलक्षो ऽहमेनमेतदचिन्तयम् ।
अहो मदोदधिर्मोहमहिम्ना महिलाजनः ॥ ४४६ ॥
मदिराया गुणश्रेष्ठा लोकद्वयविरोधिनी ।
कुरुते दृष्टमात्रापि महिला ग्रहिलं जनम् ॥ ४४७ ॥
परापकारसंचारि किं विषं सन्ति हि स्त्रियः ।
यत्सेवनभवस्तापः परत्रापि न शाम्यति ॥ ४४८ ॥
स्त्रियां विपन्नां दृष्टा लक्षणाविपरीतिनः ।
सुधाकरार्पवैषम्यं ददस्तस्य जडा विदुः ॥ ४४९ ॥

विश्वासघातिनीर्मालिन्त्रं जानामि योषितः ।
नरकाब्धौ नरं मग्ना परिरभ्य क्षिपन्ति याः ॥ ४५० ॥
अबला इति न स्त्रीभिः कर्तव्यं हस्तमेलनम् ।
हरन्ति जीवितं पुंसां संशये च क्षिपन्ति याः ॥ ४५१ ॥
इयं हि मम रक्तस्य प्रतीचीव विवस्वतः ।
मानम्लानिं ददौ कां तु गतिं दानेति वेत्ति कः ॥ ४५२
धिग्मामेतद्वशित्वेन निर्वोढ्यनिरादरम् ।
घूकेनेवामिव ध्वान्तमिवत्वेनार्कनिःस्पृहम् ॥ ४५३ ॥
एतद्वैराग्यतो नैतद्वैरं मुञ्चे ऽधुना पुनः ।
कुलस्यापि कलङ्कः स्यादपमानो हि मानिनाम् ॥ ४५४ ॥
यः मद्दत्ते हृदि पदं तमूर्ध्वं गिलति क्षणात् ।
अपमाने ऽप्यनुद्योगी पङ्कादप्यधमः पुमान् ॥ ४५५ ॥
क्षुद्रोऽप्युपद्रवं कुर्यान्निकाममपमानितः ।
विदधुर्मधुहर्तारं विधुरं मधुमक्षिकाः ॥ ४५६ ॥
गृह्णन्तं रससर्वस्वं भास्वन्तं प्रत्यपक्रियाम् ।
कांचित्कर्तुमशक्तस्य पङ्कस्यापि स्फुटत्युरः ॥ ४५७ ॥
दूरे त्यजन्ति मानापि परावज्ञासहं नरम् ।
क्षममप्यक्षमैर्वृद्धं गजं विन्ध्याटवी यथा ॥ ४५८ ॥
तदेतस्यापमानाब्धेः पारं गन्तास्मि नौकया ।
संसारार्णवपाराय भविष्ये पोतवद्व्रतम् ॥ ४५९ ॥
अपमाने ऽपि चेद्गृह्णे व्रतं तन्मे निदर्शनात् ।
मत्पूर्वेषामपि भवत्येषा संभवना ऽत्र ॥ ४६० ॥
यावदित्युद्धतध्यानस्थानचित्तो ऽस्ति दुर्धीः ।
सैन्यसर्वाभिसारेण मन्मन्थी तावदागमत् ॥ ४६१ ॥

ततो ऽन्तरस्फुरद्दूतानिर्भूताद्भुतवैरयोः ।
मम तस्य च सेनाभिः समरः समवर्तत ॥ ॥ ४६२ ॥
रिपो रथो रथं नागं नागो ऽश्वो ऽश्वं भटं भटः ।
समियाय समीकाय स्वव्ययान्ययनिर्भयः ॥ ४६३ ॥
समनम्यन्त कोदण्डैः शाङ्गदण्डैरकम्पयन् ।
तत्र रौद्रे रणोद्रेके ननृतुः शौर्योद्भटैर्भटैः ॥ ४६४ ॥
पपुषो निखिलस्यापि जनता पुष्टिपवित्रया ।
हठयन्तः प्रहरणान्यादितान्याहरन्भटाः ॥ ४६५ ॥
तारशुद्धधिया धन्यंमन्यो मन्योर्वशं गतः ।
प्रहारेषु लगत्स्वङ्गं भटः कण्टकितं दधौ ॥ ४६६ ॥
विलुठत्तुरगश्रागं पतन्मातङ्गमण्डलम् ।
स्फुटच्छत्रसंधानमन्धं नृत्यत्कबन्धकम् ॥ ४६७ ॥
लोलत्कीलालकल्लोलमालिनीमण्डलं ततः ।
पक्षद्वयक्षयकरं प्रावर्तत रणक्षणम् ॥ ४६८ ॥ युग्मम् ॥
भ्राजिष्णुभूरिजनकैः क्रमात्सन्नूतनाः परैः ।
कर्शयामासिरे ग्रीष्मवासरैरिव रात्रयः ॥ ४६९ ॥
राजन्नागमथारुह्य जवादिभविभुं विभीः ।
अहं तेन सह क्रुद्धो द्वन्द्वयुद्धोत्सुको ऽमिलम् ॥ ४७० ॥
मयि मुञ्चति नागचर्चीचीर्दक्षेण रक्षितः ।
तेनात्मा च गजेन्द्रश्च तत्सर्गैश्च मार्गणैः ॥ ४७१ ॥
स तु निर्नाशयामास मार्गणानां गणैः क्षणात् ।
मद्बलं सकलं भानुर्भचक्रमिव भानुभिः ॥ ४७२ ॥
यद्यदस्त्रं मयामोचि तत्तदेष क्षणादपि ।
छेत्रश्चिच्छेद सम्यक्त्वं भवत्कर्मेव केवली ॥ ४७३ ॥

पतत्यथ तदस्त्रार्ते गजे क्षीणाखिलायुधः ।
अस्मयन्मुष्टिमुत्प्लुत्यागमं तद्दिभमूर्धनि ॥ ४७४ ॥
धृत्वाथ हस्तयोस्तेन क्षिपन्गाढाहतीरहम् ।
उत्क्षिप्तः पतितो दूरे यन्त्रोन्यग्रावगोलवत् ॥ ४७५ ॥
सहसा सह सेनाभिः प्राविशन्मत्पुरं स तत् ।
तन्वन्साकं तयोत्तालहस्ततालः कथा मिथः ॥ ४७६ ॥
एवमालोकमानो ऽहमपमानोच्चयाकुलः ।
इष्टमिष्टतमेभ्यो ऽपि गणयन्मरणं तदा ॥ ४७७ ॥
यद्यस्ति सुकृतं किंचिन्मम तत्तन्निदाननः ।
मा भूद्भवान्तरे ऽपि स्त्रीमङ्गः सत्पथभङ्गकृत् ॥ ४७८ ॥
इत्यालपन्पुरः प्रेक्ष्य कूपं तत्र पपात च ।
सभान्तर्भद्रपीठस्थं स्वं ददर्श च पूर्ववत् ॥ ४७९ ॥
ये युधि क्षुधि दुर्धर्षाः क्षताः सपत्निना मृताः ।
तानक्षतानहं संसत्यपश्यं पार्श्वतो मयान् ॥ ४८० ॥
ये दृष्टाः संगरे पिष्टास्तेषामश्रुणवं स्वयम् ।
हस्तिनां हस्तिशालासु वाजिशालासु वाजिनाम् ॥ ४८१ ॥
अन्तरन्तःपुरं यावत्क्षिप्ता दृक्तावदैक्ष्यत ।
तदाक्षिमाला नाहस्तत्प्रतिकर्मक्रियोन्मुखी ॥ ४८२ ॥
इत्यद्भुतभुवस्पान्ते मयि कान्तेन तेजसा ।
अर्क कर्करयन्कश्चिद्दाविरासीन्पुरः सुरः ॥ ४८३ ॥
तद्विलोकादहं मानजानिस्मृनिर्गचिन्तयम् ।
मारमार्ता धनधन्याख्यौ सुहृदावस्पेय च ॥ ४८४ ॥
अनेन सह संसारनिःसारत्व विचारयन् ।
व्रताभिरर्गस्वर्गाप्स्वर्गश्रीभोगपुराजयम् ॥ ४८५ ॥

अभ्यर्थितो ऽप्याश्लिष्य दिवः प्राक् च्यवता मया ।
उद्धर्तव्यस्त्वया सो ऽहं भवे मोहार्णवादिति ॥ ४८६ ॥
तन्नूनममुनैवाहं घटयित्वेति नाटकम् ।
बोधितो बोधदुग्धानामम्बुना बन्धुनाधुना ॥ ४८७ ॥
इत्युत्थाप्य मया नीत्वा सत्कृतः स तिरोभवत् ।
अहं च प्राव्रजं मङ्क्षु भवारण्यं विलङ्घितुम् ॥ ४८८ ॥

ईदृक्चरित्रश्रवणाद्भवभीतो भुवः पतिः ।
राज्ये जामातरं न्यस्य प्रव्रज्यातिभूरभूत् ॥ ४८९ ॥
नृपे विरतिसारे ऽथ रतिसारेण भूभुजा ।
व्योमेव व्योमरत्नेन तेन राज्यमराज्यत ॥ ४९० ॥
नृपाशाकलनध्वंसी नृपध्वंसीव दीप्यति ।
निरायुधं वधं राज्ञामाज्ञाभङ्गं विदुर्विदः ॥ ४९१ ॥
तन्मल्लोकद्रुहां तस्यो विपदो मद्वतामिव ।
भविष्यन्तीति देशान्तस्तेनाताड्यत डिण्डिमः ॥४९२॥युग्मम्॥
तत्तत्पुण्यप्रभावेण तद्देशाद्दूरगापदः ।
देशे तस्य परान्निभ्यो विन्यवर्तन्त जन्तवः ॥ ४९३ ॥
सर्वा अपि स्त्रियः सत्यः सत्यवाक्सकलो जनः ।
मलिम्लुचो न च क्वापि कार्पण्यं न च कस्यचित् ॥ ४९४ ॥
अपि केलिषु नो बालैर्बालैः कलहायितम् ।
पुनभिः स्नेहदोषे ऽपि कलहो गन्धहस्तिनः ॥ ४९५ ॥
तिर्यञ्चो ऽपि विषाणाग्रैर्न चक्रुः कस्यचिद्व्यथाम् ।
आत्मभोगास्पदं रोगा न च किंचिदलम्भत ॥ ४९६ ॥
न को ऽप्यास्कन्दि मार्गाद्भिर्व्यन्तरैरपि क्वचित् ।
शुष्केन्धनेष्वपि ज्वालाजिह्वो मर्यादया ज्वलन्॥ ४९७

[illegible] ।
[illegible] ॥ १९८ ॥
[illegible] ।
[illegible] ॥ १९९ ॥
[illegible] ।
[illegible] ॥ २०० ॥
[illegible] ।
[illegible] ॥२०१॥
[illegible] ।
[illegible] ॥ २०२ ॥
[illegible] ।
[illegible] ॥ २०३ ॥
इत्थं [illegible] निराधेव निराकम्पतान्वयम् ।
मदनानलज्वाले मग्नर्गामिनं भुवम् ॥ २०४ ॥
कराग्र कौतुकागारे विरला निपुणा भुवप ।
चित्रं [illegible] ॥ २०५ ॥
इत्युद्भवं मुखे भाति चान्दनं तिलकं न ते ।
विद्युत [illegible] कुचे कस्तूरिकामयम् ॥ २०६ ॥
इत्युक्त्वा मालिकाकल्पैरनल्पैरिन्द्रनीलकैः ।
मूर्ध्नि तूर्णं सौभाग्यसमुद्रायां चकार तत्॥२०७॥युग्मम्॥
अथापतिल्का नाकूद्भास्वदसरारि सा ।
अमन्दुः स्फारतारापि रजनीव रराज न ॥ २०८ ॥
पुण्ड्रेणैकेन हीनापि पश्चिःश्रीकेयमीक्ष्यते ।
तद्विशजेप्यने कीदृग्मुक्तनिःशेषभूषणा ॥ २०९ ॥युग्मम्

इति ध्यात्वा विरागोर्धिवर्मिनस्वान्तवार्धिना ।
नृपेण स्वकरेणास्याः क्रमाद्भूषापरो हृतः ॥ ५१० ॥
ततो हृतशिरोरत्नां निशि निर्दीपसद्मवत् ।
आहृष्टकुण्डलद्वन्द्वां द्यामिवास्तेन्दुभास्कराम् ॥ ५११ ॥
गतहारां सुरागारद्वारं निस्तोरणामिव ।
अकेयूरभुजां म्लानपद्मोर्मिसरसीमिव ॥ ५१२ ॥
अकङ्कणकरां दलिमुक्तस्तासां वनीमिव ।
क्वणन्मञ्जीरहीनाङ्घ्रिमदंसाब्जामिवाब्जिनीम् ॥ ५१३ ॥
एवं निरस्तनिःशेषभासमानविभूषणाम् ।
दग्धपुष्पफलस्तको फाल्गुनीयां लतामिव ॥ ५१४ ॥
तां पश्यन्नान्तरेणाक्ष्णा स दध्यौ नास्ति कुत्रचित् ।
अप्रशान्तितद्वाङ्गः को ऽप्यभूषितभासुरः ॥ ५१५ ॥ [redacted]
पञ्चभिः कुल

का वान्यस्य कथात्मापि घातकर्मावलीमलः ।
ज्ञानदर्शनचारित्रभानि रत्नैरलंकृतः ॥ ५१६ ॥
तद्दृश्यिकर्ममालिन्ये यत्परिष्करणं तनोः ।
विशुद्धपथाद्भ्रान्तं नाम्यवस्पेव नर्तनम् ॥ ५१७ ॥
नाहृत्य भूषणगात्मा भूष्यते ऽस्य तु भूषणैः ।
भूष्यते ऽसिन्यमप्यङ्गं नमो ऽर्हता करीव ॥ ५१८ ॥
तत्कार्यः कास्मान्मापमकर्मयन्तमण्डलः ।
ज्ञानदर्शनचारित्रभूषणः कायभूषणः ॥ ५१९ ॥
इत्यन्तर्ध्यानरतस्यात्मनि स्थिरतां दनः ।
अदीप्यत यथा दीपो निर्वाते वेश्मनि स्थितः ॥ ५२० ॥
शुक्लध्याने ऽवतीर्णे ऽथ घातिकर्मेन्धनानले ।

उत्पेदे केवलं लोकत्रयत्रैकाल्यदर्पणः ॥ ५२१ ॥
दत्तं शासनदेव्यैव मुनिवेषं समाश्रितः ।
तयैव विहिते तत्र काञ्चने ऽब्जे कृतासनः ॥ ५२२ ॥
त्वरायातैः सुरव्रातैः भणतः पुष्पवर्षिभिः ।
किमेतदिति साश्चर्यैः प्रेक्ष्यमाणः पुरीजनैः ॥ ५२३ ॥
अन्तःपुरीभिरेताभिरुद्भ्रान्तस्वान्तवृत्तिभिः ।
किमेतन्नाथ नाथेति मुहुरुत्तरमर्थितः ॥ ५२४ ॥
दशनांशुमिषात्पुण्यं मूर्तिमत्तन्वतीमिव ।
स जिनो वृजिनोच्छेदावेशिनीं देशनां व्यधात् ॥ ५२५ ॥
चतुर्भिः कलापकम् ॥

अहो महोदधेरेव भवसैन्धकजन्तवः ।
कर्मभिर्मर्मभिद्रूपैस्ताप्यन्ते सर्वथा कथम् ॥ ५२६ ॥
तानि जानीत हे सन्तः संगतानि सदात्मभिः ।
अष्टसंख्यानि संसारकारणं नामभेदतः ॥ ५२७ ॥
ज्ञानावरणं दर्शणावरणं वेदनीयकम् ।
मोहायुर्नामगोत्रान्तरायं तानीति नामतः ॥ ५२८ ॥
मतिश्रुतावधिमनःपर्यायकेवलाभिधैः ।
आवृतः पञ्चभिर्ज्ञानैराद्यं पञ्चविधं स्मृतम् ॥ ५२९ ॥
निर्मलापि यथा दृष्टिः पटच्छन्नाल्पदर्शरी ।
तथात्माच्छादितस्तेन तत्तत्पटसमं विदुः ॥ ५३० ॥
सागराणां स्थितिस्तस्य स्यात्रिंशत्कोटिकोटयः ।
ततो बध्नाति तत्कर्म पुनरात्मा सकल्मषः ॥ ५३१ ॥
दर्शनावरणीयं तु नवभेदमिति स्मृतम् ।
पञ्चनिद्राश्च चत्वारः स्युश्चक्षुर्दर्शनादयः ॥ ५३२ ॥

तत्र निद्रा भवेद्यत्र प्रबोधः स्वल्पहेतुना ।
निद्रानिद्रात्मनो यस्यां भवेद्दुःखेन जागरः ॥ ५३३ ॥
ऊर्ध्वस्थितस्य जायेत या जन्तोः प्रचला हि सा ।
प्रचलाप्रचला सा तु भवेद्या पथि गच्छतः ॥ ५३४ ॥
चिन्तितस्याह्नि कार्यस्य स्त्यानर्द्धिः साधका निशि ।
सा पुनर्जायते जन्तोरुदये क्लिष्टकर्मणः ॥ ५३५ ॥
चक्षुराच्छिद्यते येन तच्चक्षुर्दर्शनावृतम् ।
शेषेन्द्रियाणां वरणमचक्षुर्दर्शनावृतम् ॥ ५३६ ॥
अवधिः स्याद्रूपिवस्तुमर्यादा तेन दर्शनम् ।
करणानपेक्षो बोधरूपो यावधिरुच्यते ॥ ५३७ ॥
दर्शनं तेन सामान्यार्थग्रहो ऽवधिदर्शनम् ।
तस्यावरणमवधिदर्शनावरणं स्मृतम् ॥ ५३८ ॥
विश्वं केवलसामान्यं लोकालोकस्य दर्शनम् ।
यदावृणोति तत्प्रोक्तं केवलदर्शनावृतम् ॥ ५३९ ॥
यथा राज्ञः प्रतीहारो नाभीष्टस्य जनस्य गः ।
अपि वीक्षितुकामस्य न दत्ते नृपदर्शनम् ॥ ५४० ॥
दर्शनावरणीयेन बद्धो जीवो ऽप्यसौ तथा ।
न पश्येद्वस्तु तच्चेन प्रतीहारसमं विदुः ॥ ५४१ ॥ युग्मम् ।
समवस्थितिरस्यापि दर्शनावृतिकर्मणः ।
सागरोपमकोटीनां त्रिंशत्कोट्यः प्रमात् ॥ ५४२ ॥
सातासातभिदा वेद्यं द्विधा मुख्यं तयोः पुनः ।
असातं निरयगते सातं मर्त्यामरालये ॥ ५४३ ॥
मधुलिप्तासिधाराया लेहने सुखदुःखवत् ।

अत्रस्थितिरमुष्यापि वेदनीयस्य कर्मणः ।
सागरोपमिती[illegible] हि स्युस्त्रिंशत्कोटिकोटयः ॥ ५४५ ॥
मोहनीयं भवेद्द्वेधात्राद्यं दर्शनमोहकृत् ।
चारित्रमोहनीयं तु द्वितीयं परिकीर्तितम् ॥ ५४६ ॥
प्रथमं त्रिविधं सम्यग्मिश्रमिथ्यात्वभेदतः ।
द्वितीयं पञ्चविंशत्या भेदैस्तदिति कीर्त्यते ॥ ५४७ ॥
क्रोधमानमायालोभाः स्युः कषायाश्चतुर्विधाः ।
तत्रैकैकश्चतुर्भेदैर्ज्ञेयः संज्वलनादिभिः ॥ ५४८ ॥
पक्षस्थायी कषायोऽसौ स्मृतः संज्वलनाह्वयः ।
प्रत्याख्यानः पुनर्मासचतुष्टयकृतस्थितिः ॥ ५४९ ॥
अप्रत्याख्यानकः प्रोक्तः स्थितः संवत्सरावधिः ।
यावज्जीवं कृतस्थानः स्यादनन्तानुबन्धकः ॥ ५५० ॥
घ्नन्त्यमी वीतरागत्वं यतित्वं श्राद्धतां क्रमात् ।
सम्यक्त्वमपि संसेव्यमाना जन्तोर्भवान्तरे ॥ ५५१ ॥
अमरत्वं मनुष्यत्वं तिर्यक्त्वं नरकं क्रमात् ।
यच्छन्त्येवंस्वरूपाः कषाया इति षोडश ॥ ५५२ ॥
तथा हासो भयं शोको जुगुप्सा रत्यरत्यपि ।
पुंनारीक्लीबवेदाश्च नोकषाया इमे नव ॥ ५५३ ॥
इत्यष्टविंशतिर्भेदा मोहनीयस्य कर्मणः ।
… यात्मनामपि प्रायो दुर्जराः स्युश्चिरं स्थिराः ॥ ५५४॥
मद्यपानाद्यथा जन्तुः कृत्याकृत्यानि वेत्ति न ।
मोहनीयादपि तथा तत्तन्मद्यसमं विदुः ॥ ५५५ ॥
तत्तदेतस्य कर्मभ्यः सर्वेभ्योऽप्यधिका स्थितिः ।
भवेयुः सागराणां हि सप्ततिः कोटिकोटयः ॥ ५५६॥

आयुश्चतुर्धा नरकतिर्यग्नृसुरसंभवैः ।
दुर्भेदबन्धभावेन तद्बन्धनिगडोपमम् ॥ ५५७ ॥
आयुषः कर्मणोऽमुष्य स्थितिरित्थं प्रकर्षतः ।
सागरोपमैर्मिता हि त्रयस्त्रिंशद्भवेत् ॥ ५५८ ॥
नामोक्तं प्रथमं भेदैर्द्विचत्वारिंशता ततः ।
सप्तषष्ट्या त्रिनवत्या त्र्युत्तरेण शतेन वा ॥ ५५९ ॥
गतिजातिशरीराङ्गोपाङ्गबन्धननामकम् ।
संघातनं संहननं संस्थानं वर्णगन्धके ॥ ५६० ॥
रसस्पर्शागुरुलघु पराघातोपघातके ।
आनुपूर्वी तथोच्छ्वास आतपोद्योतमित्यपि ॥ ५६१ ॥
विहायोगतित्रसाख्यं स्थावरं सूक्ष्मबादरम् ।
अपर्याप्तं च पर्याप्तं प्रत्येकानन्तकायकम् ॥ ५६२ ॥
सुभगं दुर्भगं चैवं स्थिरास्थिरशुभाशुभम् ।
सुस्वरं दुःस्वरादेयमनादेयं ततः परम् ॥ ५६३ ॥
यशःकीर्त्ययशःकीर्तिनिर्माणं कीर्तितं ततः ।
नाम तीर्थकरं चेत्थं चत्वारिंशद्द्वयाधिका ॥ ५६४ ॥
गतिश्चतुर्धा नरकतिर्यग्नृसुरलक्षणा ।
एकद्वित्रिचतुःपञ्चाक्षभेदैर्जातिपञ्चकम् ॥ ५६५ ॥
औदारिकं वैक्रियकमाहारकमतः परम् ।
तैजसं कार्मणं चेति शरीरं पञ्चधा स्मृतम् ॥ ५६६ ॥
अङ्गोपाङ्गं त्रिधा शीर्षं पृष्ठं च हृदयोदरौ ।
ऊरुद्वयं करद्वन्द्वमित्यष्टावङ्गमुच्यते ॥ ५६७ ॥
अङ्गुल्याद्युपाङ्गं स्यादङ्गोपाङ्गं च तद्गताः ।
रेखाः स्युस्त्रयमेतत्तु भवेदाद्ये वपुस्त्रये ॥ ५६८ ॥

षोढा संहननं वज्रर्षभनाराचमादिमम् ।
तस्मादृषभनाराचं नाराचं तु तृतीयकम् ॥ ५६९ ॥
चतुर्थमर्धनाराचं कीलिकाख्यं च पञ्चमम् ।
सेवार्तं भवेत्षष्ठमस्थ्यन्तःस्पर्शलक्षणम् ॥ ५७० ॥युग्मम्
आद्यं समचतुरस्रमथ न्यग्रोधमण्डलम् ।
तदन्यथा पुनः सादि वामनं कुब्जकं तथा ५७१ ॥
हुण्डं चेति शरीरस्य संस्थानानि भवन्ति षट् ।
एतान्यौदारिकस्यैव नान्याङ्गानामसंभवात् ॥५७२॥युग्मम्
आनुपूर्वी चतुर्धेत्थं यजन्तोर्गच्छतो ऽन्तरा ।
भवेषु नरकाद्येषु परिपाटिर्भवेद्गतेः ॥ ५७३ ॥
स्याद्विहायोगतिर्द्वेधा शुभाशुभविभेदतः ।
उपघातपराघातातपागुरुलघु स्मृतम् ॥ ५७४ ॥
उच्छ्वासोद्योतौ चत्वारो वर्णाद्यास्त्रसविंशतिः ।
निर्माणं तीर्थकृच्चेति सप्तषष्टिरुदाहृता ॥ ५७५ ॥
बन्धनं पञ्चधा पञ्च संघाता वर्णपञ्चकम् ।
अष्टौ स्पर्शा रसाः पञ्च गन्धद्वयमुदीरितम् ॥ ५७६ ॥
कृष्णो वर्णेषु स्पर्शेषु गुरुस्तिक्तो रसेषु च ।
गन्धयोः सुरभिश्चैते भेदास्त्वाद्याः पुरोदिताः ॥ ५७७ ॥
प्रागुक्तायाः सप्तषष्टेरस्याः षड्विंशतेरपि ।
मेलने जायते सेयं नवतिस्त्रिभिरुत्तरा ॥ ५७८ ॥
पञ्चदशबन्धनेभ्यः पञ्च भेदा पुरोदिताः ।
शेषैस्तु दशभिः क्षिप्तैर्जायते त्र्युत्तरं शतम् ॥ ५७९ ॥
औदारिकौदारिकं तथौदारिकतैजसम् ।
औदारिककार्मणकं तुर्यमेतत्रयोद्भवम् ॥ ५८० ॥

वैक्रियवैक्रियाख्येन ज्ञेयं बन्धचतुष्टयम् ।
इत्यमाहारकाहारकादिदेहचतुष्टयम् ॥ ५८१ ॥
तैजसतैजसं गात्रं ततस्तैजसकार्मणम् ।
कार्मणकार्मणं चेति बन्धाः पञ्चदश स्मृताः ॥ ५८२ ॥
त्रिभिर्विशेषकम् ॥
रम्यारम्याणि रूपाणि कुर्याच्चित्रकरो यथा ।
तथा नामापि जीवानां तच्चित्रकरोपमम् ॥ ५८३ ॥
एतस्य स्थितिरुत्कृष्टा भविनां नामकर्मणः ।
विंशतिः कोटिकोटीनां सागरोपममानतः ॥ ५८४ ॥
गोत्रं द्विधा भिया लक्ष्म्या हीनो ऽप्यर्हो भवी भवेत् ।
तद्युक्तं सहितो ऽप्याभ्यां नाच्यों नीचं तदुच्यते ॥ ५८५ ॥
यथा कुलालान्मृत्पिण्डः पूर्णकुम्भः सुरापटी ।
स्तुत्यो निन्द्यस्तथातः स्यादात्मा तत्तेन तत्समम् ॥ ५८६ ॥
आत्मनि स्थितिरेतस्य गोत्रसंज्ञस्य कर्मणः ।
सागरोपमसंबद्धा स्यात्कोटिविंशतिः ॥ ५८७ ॥
अन्तरायाभिधं कर्म भेदैः पञ्चभिरष्टमम् ।
स्याद्दानलाभभोगोपभोगसामर्थ्यलक्षणैः ॥ ५८८ ॥
दानं विनीतादत्ते राड्भाण्डागारिको यथा ।
तथास्मादपि जीवो ऽ तस्तद्भाण्डागारिकोपमम् ॥ ५८९ ॥
अन्तरायाभिधानस्य स्थितिरेतस्य कर्मणः ।
सागरोपमसंख्यायां स्युस्त्रिंशत्कोटिकोटयः ॥ ५९० ॥
इत्यल्पं जल्पितो ऽनल्पकाल्यः कर्ममहागदः ।
शुद्धध्यानौषधप्राणैः सद्भिः शाम्यो ऽप्रमादिभिः ॥ ५९१ ॥
शुद्धं ध्यानमपि प्राप्यं कषायविषयोज्झनैः ।

संतोषरसिकैर्लोकैः स तु बीजं सुखस्य यत् ॥ ५९२ ॥
न सद्वाक्यात्परं वश्यं न कल्यायाः परं धनम् ।
नाहिंसायाः परो धर्मो न संतोषात्परं सुखम् ॥ ५९३ ॥
सेव्यसारस्य तस्यापि जननी विरतिर्ध्रुवम् ।
सापि केवलिभिः प्रोक्ता सर्वतो देशतो ऽपि वा ॥ ५९४
तदस्यां विरतौ सद्भिर्मतिमद्भिः सुखार्थिभिः ।
स्तुत्यकृत्यमहाविघ्नः प्रमादः कार्य एव न ॥ ५९५ ॥
आयुषः क्षण एको ऽपि नाप्यते रत्नकोटिभिः ।
तत्कथं हार्यते हन्त प्रमादरजसा नरैः ॥ ५९६ ॥
इति धर्मगिरं कर्मगिरिदम्भोलिसंनिभाम् ।
श्रुत्वा तत्त्वावबोधेन शुभः शस्यमनो ऽजनि ॥ ५९७ ॥
अन्तःपुर्यैः सुबन्धुश्च तदा भेजुर्महाव्रतम् ।
धनैश्चान्ये जैनस्तत्र जगृहे गृहिणां व्रतम् ॥ ५९८ ॥
इत्थं प्रबोध्य सुहृदो विहृत्य वसुधां क्रमात् ।
वितत्य धर्मं भगवान् रतिसारः शिवं ययौ ॥ ५९९ ॥
इत्यद्भुतस्य दानस्य प्रभावाद्भुक्तभूतलः ।
कुशलो दलयत्याशु संसारं रतिसारवत् ॥ ६०० ॥
इति श्रीरतिसारस्य सारपुण्यमयीं कथाम् ।
निशम्याभून्मुदां सद्म पद्मोत्तरमहीश्वरः ॥ ६०१ ॥
पात्रेण पार्थिवादिभ्यो दानं नादीयते क्वचित् ।
नित्यं शील्यन्तु शीलं तु सर्वसाधारणं बुधाः ॥ ६०२ ॥
धत्ते यः सततोन्मीलं शीलं लीलारविन्दवत् ।
सकामं मुक्तिकामिन्या कुतुकेन विलोक्यते ॥ ६०३ ॥
अतश्चिन्तामणिप्रायगुरुतमात्मये जनः ।

विधत्ते शुद्धधीः शीलसुधाम्भोनिधिमज्जनम् ॥ ६०४ ॥
अयनाशाद्भुतच्छाये शीले नीलेतरा गुणाः ।
समायान्ति सगुणाल्या मराला इव पल्वले ॥ ६०५ ॥
जनानुरक्तिर्भुक्तिश्च मुक्तिश्च नृषु शीलतः ।
सनत्कुमारशृङ्गारसुन्दर्योरिव जायते ॥ ६०६ ॥
तद्यथा सत्पथाश्रयधन्यपौरालिमालिनी ।
श्रीकान्तेति पुरी जम्बूद्वीपे भारतवर्षभूः ॥ ६०७ ॥
इह सिंह इति स्वाम्यमन्वयिन्युपतिर्नृपः ।
बभूव शुभ्रकीर्तिश्रीराजिराजितदिग्गणः ॥ ६०८ ॥
नित्यमुच्चगुणग्रामः कलाग्रहकृताग्रहः ।
सनत्कुमार इत्यासीत्कुमारस्तस्य कीर्तिभूः ॥ ६०९ ॥
अदूषणगणैर्लक्ष्यमाणस्तादृक्सलक्षणः ।
सहोत्थैः स गुणै रेजे शरीरावयवैरिव ॥ ६१० ॥
उपदेशायधिगाहूतस्तस्य सुहृत्तः ।
हृदि न स्थापितं चक्रुः स्निग्धा अप्यखिन्नाः कलाः ॥६११॥
रूपं निशम्य निःसीम तस्य सीमन्तिनीजनैः ।
तदङ्गसङ्गिसुरभीरजो बहुमतं स्वतः ॥ ६१२ ॥
उरसि भेषगां कामचित्राभ्यासापदेशतः ।
अलिख्यत विदग्धाभिः स रहो विरहोदये ॥ ६१३ ॥
तस्मिन्स्मरणसंमासन्नाणभृद्भवपञ्जरे ।
दोर्दण्डमण्डलच्छायामीयुश्चापचराः सराः ॥ ६१४ ॥
सोऽन्यदा क्षणदामध्ये वध्यमानस्य विद्विषा ।
निद्राणश्चन्द्रशालायां रावं शुश्राव कस्यचित् ॥ ६१५ ॥
अथ स रभसभ्रश्यन्निद्रोन्मुद्रदृगीदृशम् ।
खे वचः सचमत्कारः कारुण्यसदृणोऽशृणोत् ॥ ६१६ ॥
दुःखिनः परदुःखेन दीनानाथोद्धृतिक्षमः ।
अहो स कोऽपि कोऽप्यस्ति यः पापात्पाति मामितः ॥६

त्रिजगद्वीरजननीर्जननी येन सूनुना ।
हतास्मि स को ऽपीह यः पापात्पाति मामितः ॥६१८॥
स्मरन्पतिनिभिनःशस्त्रनारानिर्गेण गर्जन् ।
स को ऽप्यस्ति जगत्यस्मिन यः पापात्पाति मामितः॥६१९॥
प्रेमार्द्राभ्यः पिताभ्यो ऽपि ये प्रियां मन्वते सुतम् ।
तत्पुण्यः को ऽपि किं नास्ति यः पापात्पाति मामितः॥६२०॥
हा हा हतो हतो ऽहं मां त्रातुं को ऽपि न धावति ।
तदाकाशे शून्यं कस्य सत्त्वेनेदं जगत्त्रयम् ॥ ६२१ ॥
विभ्ये न सन्ति किं वीराः किं वा सन्तो ऽपि निष्कृपाः ।
किं वा धार्मिकभाजस्ते क्रन्दन्तं यन्न पान्ति माम् ॥ ६२२ ॥
निशि निद्रान्ति चेन्मर्त्यास्तदमर्त्यप्यभुक्तिषु ।
यत्ते ऽपि शक्तिमन्तो ऽपि न कृपां मयि कुर्वते ॥ ६२३ ॥
न मानवो न गन्धर्वो न गीर्वाणो न दानवः ।
को ऽप्यस्ति साहसी यो मां त्रायते हा हतो ऽस्मि हा॥६२४॥
अथाघचक्रक्रोपाक्षखण्डाद्रूपितमूर्धजः ।
क्ष्मापस्य मनुकम्पश्चाल्पयंश्चापमुत्थितः ॥ ६२५ ॥
विलक्ष्य खेचरं क्षोणिचारी रक्षितुमक्षमः ।
पक्षिणो ऽपि क्षणं धन्यान्सो ऽमन्यत खगामिनः ॥६२६॥
त्रैलोक्ये ऽप्यस्ति न त्राता वध्यमानस्य ते मया ।
मा क्रन्दीर्म्रियमाणस्तदित्यभूत्ते पुनर्ध्वनिः ॥ ६२७ ॥
हन्तुः स्वरानुसारेण शरासारं ततः कृती ।
साक्षेपं दिवि चिक्षेप स शरण्यशिरोमणिः ॥ ६२८ ॥
एको रिपुः कृपाणेन महतः सापतत्ततः ।
पुमान्कुमारनाराचताडितस्त्वपरः पुरः ॥ ६२९ ॥

अथ तां युवतिं वीक्ष्य विस्मिते भूपतेः सुते ।
उत्ततार नदीपारात् कापि ताराभ्रतो वधूः ॥ ६३० ॥
द्विषद्विपविनाशस्य पुरुषस्य पुरः स्थिता ।
घनानन्दमात्राभिरपरिक्रमरसकगद्गदा ॥ ६३१ ॥
किं परिजपितं चित्रमिति पृष्टाय तेन सा ।
ऊचे ऽवरोधं बिभ्रन्ती शुचा सुभ्रमसधुभिः ॥ ६३२ ॥
शोणरत्नप्रभापूरसिन्दूरचयचर्चितः ।
गिरिर्वैताढ्य इत्यस्ति श्रीनीचारत्नपदेश्वरः ॥ ६३३ ॥
तस्योपरि परिस्पन्दल्लक्ष्मीमन्दमल्लपुरा ।
विशालाख्या विशालाक्षीमुखचालेन्दुरस्ति पूः ॥ ६३४ ॥
तस्यां रत्नचूडाख्यो राजा खेलति खेचरः ।
अस्य विद्येव काश्मीरदेवीति प्रीतिभाजनम् ॥ ६३५ ॥
दुहिताचन्द्रपुरीभर्ता चन्द्राख्यो ऽयं तु खेचरः ।
मया स्मररहस्यानि याचमानो ऽवमानितः ॥ ६३६ ॥
रक्षिता कौमुदीवेन्दोस्तनैः पत्युः समीपगः ।
तेनाऽक्रूरेण क्रूरेण हृताहममुनाधुना ॥ ६३७ ॥
अवस्थेयं कृता तेन मन्त्रतन्त्रानुधावतः ।
दुष्परिग्रहफलं वीर त्वयास्येदं च दर्शितम् ॥ ६३८ ॥
इत्युक्तेयं कुमाराय प्रियमाणिक्यकङ्कणौ ।
आदिशद्दीपधीः सद्यो मूर्च्छाजालकलच्छिदः ॥ ६३९ ॥
अथैनमोषधिस्पन्दैरमन्दीकुरुते स्म सः ।
कुमारः कैरवस्तोममिव सोमः करोत्करैः ॥ ६४० ॥
ततः कृपावतारेण कुमारेणौषधीरसैः ।
चन्द्रो ऽप्यजीवि कारुण्यं महतां महत्तान्तरम् ॥ ६४१ ॥

ततो वर्णविवेकाब्धिमौक्तिकग्रथितां गिरम् ।
कुमारो हृदि चन्द्रस्य हारहृद्यामिति न्यधात् ॥ ६४२ ॥
न दत्ते निर्वृतिं हन्ति पुण्यं पुष्णाति पातकम् ।
अहो हृतं परस्त्रैणं कुथितान्नमिवाहृतम् ॥ ६४३ ॥
परस्त्रीपरिरम्भेण समारम्भः सुखस्य यः ।
शीताम्भःस्नपनेनेव ज्वरदाहव्यपोहनम् ॥ ६४४ ॥
परनार्यो विभावर्य इवाकीर्तितमःप्रदाः ।
अदृष्टसत्पथान्पुंसः क्षिपन्ति नरकावटे ॥ ६४५ ॥
घाताधःकारबन्धार्तिमदान्धैर्मुच्यते न कैः ।
व्रजद्भिः परनारीषु वारीष्विव मतङ्गजैः ॥ ६४६ ॥
ततः स्वदारसंतुष्टिः पुण्यपुष्टिरसायनम् ।
सेवनीया सदा पुम्भिः गुणकुम्भिमहाटवी ॥ ६४७ ॥
तचन्द्र चन्द्रचारूणां यशसां जलदोपमम् ।
परनारीपरीरम्भारम्भं निर्दम्भधीस्त्यज ॥ ६४८ ॥
समं च रत्नचूडेन चूडारत्न खचारिणाम् ।
मा स्म पापघटाजन्म वत्सरं मत्सरं कृथा ॥ ६४९ ॥
रत्नचूड त्वयाप्येतच्चेतनीयं यतो ऽभवत् ।
प्रत्यक्षं वां परवधूर्चायमात्सर्ययोः फलम् ॥ ६५० ॥
इति वाचं प्रतिश्राव्य तौ प्रीतौ खेचरौ मिथः ।
सनत्कुमारतेजोग्निसाक्षिकं सख्यमीयतुः ॥ ६५१ ॥
अदृश्यीकरणीं विद्यां गुरुवे गुरुदक्षिणाम् ।
दत्त्वा भूपभुवे विद्यां तौ गतौ यां तया समम् ॥ ६५२ ॥
कदाप्यथ सदःसद्मभूषणं सिंहभूभुजम् ।
अत्यातुरधरः कश्चिदेत्य विज्ञप्तवानदः ॥ ६५३ ॥

स्वामिञ्जगज्जयारम्भजृम्भमाणप्रयाणकः ।
भूरिभूरमणच्छेदभेदस्विन्नप्रसरन्मदः ॥ ६५४ ॥
नृपो रिपुद्विपक्रूरकेशरी शूरकेशरी ।
त्वां प्रत्युपैति काम्पील्यपुरायतनदेवता ॥६५५॥युग्मम्॥
इति वाक्श्रुतिसंक्षोभः स्कन्धावाराय दुर्धरः।
रथसिन्धुरगन्धर्वभटाध्यक्षान्नृपो ऽदिशत् ॥ ६५६ ॥
प्रयाणकम्बुनादेषु काममम्बरचुम्बिषु ।
सज्जमानासु सेनासु भटेषूत्कटकेतु च ॥ ६५७ ॥
तां मत्वा जयिनीं यात्रामेत्य सभाधिकोपमः ।
कुमारो मस्तकन्यस्तहस्तः स्वापं व्यजिज्ञपत् ॥६५८॥युग्मम्॥
तात मा तव तत्रारिकीटे ऽस्तु कटकस्पृहा ।
किं तृणोत्पाटने कुम्भी कुण्डलीकुरुते करम् ॥ ६५९ ॥
अहमेव करिष्यामि तज्जयं त्वत्प्रसादतः ।
हन्त्यनूरुस्तमःपूरं किं न सूरप्रभावतः ॥ ६६० ॥
बालकं यदि तथापि तत्रायातनुषे स्वयम् ।
मत्वा वात्सल्यदार्द्रो वा किं तापिपि करोषि तत् ॥ ६६१ ॥
अथाह पृथिवीनाथो नीतिप्रीतिसखीं गिरम् ।
रोमाञ्चितवपुः सूनोः शौर्येण विनयेन च ॥ ६६ ॥
लीलासु प्यान्ति शूरास्तनयं नयशालिनः ।
पुरः कुर्वन्ति भोगेषु रणाभोगेषु पृष्ठतः ॥ ६६३ ॥
हृदयानन्दनं दत्ता नन्दनं कुलदीपकम् ।
न प्रभञ्जनभूयिष्ठे भासयन्ति रणाङ्गणे ॥ ६६४ ॥
कुलाङ्कुरनये रत्नं भूरिभाग्यार्जितं सुतम् ।
कः क्षिपत्यभिकल्लोलैरपारे समरार्णवे ॥ ६६५ ॥

ततो मर्गौ विद्याविद्यौ कौतुकिनो गिरम् ।
कुमारो हरि चन्दन हारदत्ताविमो नगरान् ॥ ६४२ ॥
न हन्ते निर्वृतिं हन्ति पूर्ण पुण्यानि पातकम् ।
यदो इदं पारमेयं मुनिनामभिसारणम् ॥ ६४३ ॥
पारदार्यक्रमेण समारम्भः पुरस्य यः ।
दीनारम्भःस्वपनेनेव जगज्जारभ्योतनम् ॥ ६४४ ॥
परनार्यां निपातनं इहाऽमिनिमज्जनाः ।
प्रत्युतत्यातन्नुमः सिञ्चन्ति नरकानले ॥ ६४५ ॥
पापाचाः कायवन्मानिपतन्तिर्नुध्यन्ते न कैः ।
प्रजाद्भिः परनारीषु वारीष्विव मतङ्गजैः ॥ ६४६ ॥
ततः स्वदारसंतुष्टिः पुण्यपुष्टिरमापनम् ।
सेवनीया सदा पुम्भिः गुणकुम्भिपपदाल्ली ॥ ६४७ ॥
तमन्द्र चन्द्रचाडणा यनसां जल्दोपमम् ।
परनारीपरीरम्भारम्भं निर्दम्भधीस्त्यज ॥ ६४८ ॥
समं च रत्नचूडेन चूडामन्न खचारिणाम् ।
मा स्म पापवशाजन्म वन्मरं मन्मरं कृथा ॥ ६४९ ॥
रत्नचूड त्वयाप्येतच्चेतनीयं यतो ऽभवत् ।
प्रत्यक्षं वां परब्रचूर्यमात्सर्ययोः फलम् ॥ ६५० ॥
इति वाचं प्रतिज्ञाय तौ प्रीतौ खेचरौ मिथः ।
सनत्कुमारतेजोभिसाक्षिकं सख्यमीयतुः ॥ ६५१ ॥
अदृश्यीकरणीं शिक्षागुरवे गुरुदक्षिणाम् ।
दत्त्वा भूपभुवे विद्यां तौ गतौ द्यां तया समम् ॥ ६५२ ॥
कदाप्यथ सदःसद्मभूषणं सिंहभूभुजम् ।
अभ्यानुरश्वरः कश्चिदेत्य विज्ञप्तवानदः ॥ ६५३ ॥

मेनुगज्जयारम्भजृम्भगाणप्रयाणकः ।
भूरमणच्छेदभेदस्विन्नसरन्मदः ॥ ६५४ ॥
ो रिपुद्विपक्रूरकेसरी शूरकेसरी ।
ां मरुपति काम्पील्यपुरायनन्देवना ॥६५५॥युग्मम्॥
ति वाक्श्रुतिसक्रोधः स्कन्धावाराय दुर्धरः।
पसिन्धुरगन्धर्वभटाध्यक्षान्नृपो ऽदिशत् ॥ ६५६ ॥
प्रयाणकम्बुनादेषु काममम्बरचुम्बिषु ।
सज्जमानासु सेनासु भटेपूत्कटेषु च ॥ ६५७ ॥
तां मत्वा जयिनीं यात्रामेत्य तमाधिकोपमः ।
कुमारो मस्तकन्यस्तहस्तः स्मार्यं व्यजिज्ञपत् ॥६५८॥युग्मम्॥
तात मा तव तमारिर्कोटि ऽस्तु कटकस्पृहा ।
किं तृणोत्पाटने कुम्भी कुण्डलीकुरुते करम् ॥ ६५९ ॥
अहमेव करिष्यामि तज्जयं त्वत्प्रसादतः ।
इन्त्यनूरुस्तमःपूरं किं न सूरप्रभावतः ॥ ६६० ॥
यत्नकं यदि तत्रापि यात्रायातनुपे स्वयम् ।
धत्ते बालत्राणां वा किं रोपिणि करोषि तत् ॥ ६६१ ॥
अथाह पृथिवीनाथो नीतिमीतिसती गिरम् ।
रोमाञ्चितवपुः सूनोः शौर्येण विनयेन च ॥ ६६ ॥
क्षीण्यपु स्यान्ति शूरास्तनयं नयशालिनः ।
पुरः कुर्वन्ति भोगेषु रणाभोगेषु पृष्ठतः ॥ ६६३ ॥
हृदयानन्दनं दृशा नन्दनं कुमुदीपवत् ।
न प्रभञ्जनभूयिष्ठे भागयन्ति रणाङ्गणे ॥ ६६४ ॥
कुल्यालंकृतये रत्नं भूरिभाग्यार्जितं सुतम् ।
कः क्षिपत्यमितकोटिन्तरपारे समरार्णवे ॥ ६६५ ॥

वत्स मत्सरिणो जेतुं यामि तेनाहमाहवे ।
जगरो नगरस्यास्य भवान्भवितुमर्हति ॥ ६६६ ॥
अथाकिरद्गिरं गौरीमास्यगौरांशुकौमुदीम् ।
कुमारः कैरवाकारवीरमानसमोदिनीम् ॥ ६६७ ॥
त एव तात सत्पुत्राः स्वं मत्वा कवचक्षमम् ।
ये निर्बन्धात्पितुः स्कन्धादुद्धरन्ति धुरं युधः ॥ ६६८ ॥
शूरास्तानेव मन्यन्ते नन्दनान्कुलदीपकान् ।
येषां रिपुस्त्रीनिःश्वासैस्तेजः प्रत्युत वर्धते ॥ ६६९ ॥
कुलालङ्कारवत्नानि कुमारानुर्वरावरान् ।
उत्तेजयन्ति युद्धोर्व्यामसिपट्टपट्टाश्मपि ॥ ६७० ॥
तत्प्रभो मां दिश द्वेषिपेषायेति ब्रुवन्नसौ ।
अग्रहीदग्रहस्ताभ्यां चरणौ धरणीशितुः ॥ ६७१ ॥
उत्थाप्य परिरभ्याथ प्रमोदी मेदिनीपतिः ।
कुमारमग्रहद्वीरवराय स्वरमरपत् ॥ ६७२ ॥
कृतमाङ्गल्यिकः सो ऽपि रेणुगोपितगोपतिः ।
चचालोच्चचमूपूरः नृपकेसरिणं प्रति ॥ ६७३ ॥
भ्रमयन्तीं निजभारेण भुवं धर्तुमिवाग्रतः ।
अवलम्ब्यमानहस्ताग्रधाल्न्ति चलिभिर्द्विपैः ॥ ६७४ ॥
मा भूदस्मत्पुरापानैः स्तब्धः शोणितपल्वलम् ।
इत्युड्डीन इवाचाल्यघोणा हयसमुच्चयः ॥ ६७५ ॥
नर्तयन्रथिनां कीर्ति मूर्ती केतननर्तनवान् ।
पवनानामनुनासः प्रासद्भूपसंचयः ॥ ६७६ ॥
दृप्ताः कवलयन्तः खं ज्वलयन्तो दृशा दिशः ।
प्रर्गास्यरे स्थिरागोत्रं लोलयन्तो गतिभराः ॥ ६७७ ॥

इत्युपान्ते रिपोरापि कुमारः सारसैनिकः ।
क्वचिदप्यकृतस्थानैः प्रस्थानैः कैश्चिदप्ययम् ॥ ६७८ ॥
अथान्तरचरद्दूतस्यूतक्रोधविरोधयोः ।
तयोः सेनाद्वयं जज्ञे संपरायपरायणम् ॥ ६७९ ॥
आसदत्सादिनं सादी निषादी च निषादिनम् ।
रथिनं च रथी पत्तिः पत्तिं च प्रोद्धतक्रुधः ॥ ६८० ॥
असहिष्णुः परतेजस्तेजस्वी वीरसंचयः ।
खण्डयामास चण्डांशुभासः काण्डाग्रमण्डपैः ॥ ६८१ ॥
जयश्रीपरिरम्भाय स्फायमानमनोरथैः ।
हृष्यद्भिर्वीक्षितं वीरै रणे रेणुमयं तमः ॥ ६८२ ॥
सहुंकारैरथोदारैः महार्यैर्यन्त्रशालिनाम् ।
आलम्भि समरारम्भः स्फूर्जत्तूर्यहतश्रुतिः ॥ ६८३ ॥
स्फुलिङ्गैः स्फुरितं शस्त्रसंपातेन वर्मसु ।
राज्ञां निमज्ज्यमाणस्य प्रतापस्य कणैरिव ॥ ६८४ ॥
द्रवीभूयेव शूरेण रक्तपूरेण रेणवः ।
समरे समनीयन्त तमःसमरुचः शमम् ॥ ६८५ ॥
अश्वः को ऽप्यश्ववारं स्वं पतितं वर्मभारितम् ।
उपविश्यैनमारोप्य समुत्तस्थौ नृपोद्धतः ॥ ६८६ ॥
स्फुटितोदरनिर्यातान्त्रः कश्चिदन्त्रावलीवृती ।
धावन्ननुस्रजाजौ सुरस्त्र्या लता इव ॥ ६८७ ॥
दष्टोष्ठो भ्रुकुटीभीमः स्वापानिन्यपि मूर्धनि ।
धृत्वा दोर्भ्यां रिपुं कश्चित्पतनपश्चादपातयत् ॥ ६८८ ॥
वाहयित्वाग्रतो यातं कुन्ते ऽसौ विदलत्यपि ।
सुदर्शनायुधो दन्तैः को ऽपि कण्ठं द्विषो ऽपिबत् ॥ ६८९ ॥

प्रतिद्विपं द्विपः को ऽपि कोपान्मूर्धन्यताडयत् ।
करेणोन्मूल्य तस्यैव रणक्षीणरदो रदम् ॥ ६९० ॥
पातितस्य द्विपः को ऽपि को ऽपीमस्य रिपोर्वपुः ।
रदाग्रेण विदार्योच्चैर्मत्तो रक्तासवं पिबन् ॥ ६९१ ॥
त्रस्यत्प्रतिद्विपात्स्वे ऽस्मिन् जिनाङ्गेरपि दुर्यशः ।
मा दादिति जयानेकः स्वहस्तेन स्वडास्तिनम् ॥ ६९२ ॥
हतस्य पततो युग्यभागस्योत्प्लुत्य पृष्ठतः ।
क्षितिमेत्य स्थितो ऽजयद्द्वेषिणं मार्गणैः परः ॥ ६९३ ॥
कश्चिद्रथी प्रथीयांसि शरजालानि लालयन् ।
अस्त्राण्येव द्विषो ऽकृन्तन्नाङ्गानि नु कृपान्वितः ॥ ६९४ ॥
शरैरेकस्य चक्रस्य च्छिन्ने ऽन्ये नमतो रथात् ।
विलुण्ठन्तं क्षितौ शत्रुं को ऽप्यलोकत कौतुकी ॥ ६९५ ॥
कर्णान्ताकृष्टकोदण्ड एकैकः खेदमासदत् ।
यं यं लक्षीचकारापि तर्णं स स पदभ्रमत् ॥ ६९६ ॥
मार्तण्ड इव कोदण्डपरिवेषगः परः ।
दिशःकृशःसर्वा अपि राजन्याभिये ऽभवत् ॥ ६९७ ॥
धृतासिस्फारः स्त्रिश्वं मुक्तकेशः करालवाक् ।
शौर्याविष्टाननः कश्चिदभ्रमद्भूतभृद्भटः ॥ ६९८ ॥
दन्तिनस्य रिपोरन्त्रमालाभिः कृतमण्डनः ।
स्वल्पकिल्किलारावकः शंके केनापि नेक्षितुम् ॥ ६९९ ॥
द्विपान्भिमर्दयामास भ्रामयामास वाजिनः ।
भटानिरुदयामास क्ष्वेडयेनोद्धुरः परः ॥ ७०० ॥
विक्रम्य पतितस्याजौ कस्यचिद्रक्तबिन्दवः ।
वीरवाणि वीरश्रीमन्दिरेण ववन्दिरे ॥ ७०१ ॥

इत्याभिमम्रे वाजिदन्तिस्यन्दनपत्तिषु ।
पतत्सु तुच्छतां गच्छद्बले स्वं सैहिरेक्षत ॥ ७०२ ॥
अथाह्विनहतत्रस्तसमस्ताश्वाजिनीजनः ।
गन्धसिन्धुरमारुह्य प्रसरच्चापचापलः ॥ ७०३ ॥
संरम्भी स्तम्भयन्दूरे सूरकेशरिणश्चमूम् ।
सनत्कुमारो नाराचधारानयमनक्षयन् ॥ ७०४ ॥ युग्मम् ॥
तद्बाणपातभीमासु रणसीमासु तावकः ।
न रथी न भटो नेभो न चाश्वः माविग्नक्षतम् ॥ ७०५ ॥
इत्यस्मिन्नुग्रसंग्रामभरेण क्षीणमार्गणे ।
धीरा विरोधिनो ऽप्यावन्मग्ननापोद्धतायुधाः ॥ ७०६ ॥
मुञ्चन्नथ शरासारं भूरिशो रिपुभूपतीन् ।
न्यवारयदसावेको विवेको ऽरीनिवान्तरान् ॥ ७०७ ॥
वपुः कुमारमार्तण्डं तोयदा इव ते तदा ।
वर्षन्तो मङ्क्षु धारालैः शरजालैः समन्ततः ॥७०८॥
जीविताशां विमुच्याशु विधूतासिर्मृधाय सः ।
नन्दनो मेदिनीजानेर्यावदुत्तरति द्विपात् ॥ ७०९ ॥
हस्तप्राप्तममस्तास्त्रं ज्वालामालाकुलाननम् ।
तावद्विद्यामित्रशत्रुविपक्षत्वमैक्षत ॥ ७१० ॥ युग्मम् ॥
शुभ्राणां विद्विपामन्तर्विरराज स राजभूः ।
आत्मेव ज्ञानिनो मूर्छत्कर्मपद्धतिमध्यगः ॥ ७११ ॥
तद्विद्याविस्मितं चन्द्ररत्नचूडो खचारिणौ ।
नेमतुः संयतानीतसूरकेशरिणावमुम् ॥ ७१२ ॥
अथोत्फुल्लदृगुन्मीलत्पुलकः परिरभ्य तौ ।
प्रीतः किमिदमित्येष पप्रच्छ पृथिवीविभुः ॥ ७१३ ॥

गतो ऽभ्युदयदानन्दस्तोऽपि मानाभिनेयताम् ।
ऊचे मां तदा चन्द्रनामा खेचरेश्वरः ॥ ७१४ ॥
कुमार मार्गमार्गेषु सैन्येन्द्रेषु जीरतोः ।
पुनर्जन्मेव जज्ञे ऽद्य त्वत्प्रसादेन नौ ॥ ७१५ ॥
तथाहि दक्षिणश्रेणिगिरिशोभिनि विश्रुते ।
रथनूपुरचक्राख्यं वैताढ्यशिखरे पुरम् ॥ ७१६ ॥
तस्मिन्नस्मि मनस्वित्वप्रभावेन भुवनं द्विषन् ।
धृतं भीमात्मनां सीमा भीमाख्यः खेचराग्रणीः ॥७१७ ॥
तपोभिर्दुस्तपैरेष निःशेषगणपेशधीः ।
कृशाङ्गो गारुडीं विद्यामसावुः समसाधयत् ॥ ७१८ ॥
ततस्तः संकटं शङ्कमानाः कापि न निर्वृतुः ।
तदोत्तरतटद्रङ्गसङ्गिनः खेचरेश्वराः ॥ ७१९ ॥
अथ तद्भयचिन्तानिर्गतनिद्रस्य मे निशि ।
पुरो ऽभूत्कामिनी काचिदियत्ता रूपसंपदाम् ॥ ७२० ॥
मकरध्वजराजस्य राजधानीव जङ्गमा ।
दर्शयन्ती दृशं भावमयीमित्याह मामियम् ॥ ७२१ ॥
जानीहि मां महेन्द्रस्य महिषीं मोहदद्युते ।
मनो बद्धानुरागं तु सुभग त्वद्गुणेषु मे ॥ ७२२ ॥
तन्मदङ्गमनङ्गार्तं निर्वापय कृपामय ।
त्यज चिन्तां तवारातिं हुंकारेणैव भस्मये ॥ ७२३ ॥
क्षोभकल्लोलकथेति चेतोहृद्भिर्वचोभरैः ।
चिरमभ्यर्थयामास सा मां कामान्धिता भृशम् ॥ ७२४ ॥
परस्त्रीति निषिद्धेव त्वदाज्ञां ध्यायता मया ।
क्षणदान्ते विलक्षत्वं दधती सा तिरोदधे ॥ ७२५ ॥

सुहृदय रथाङ्गानां दृषदयाद्रणभूषणे ।
आक्रन्दः श्रवणाग्रन्दः को ऽपि व्याप दिशो ऽद्भुतः॥७२६॥
अथैत्य खेचरार्धीशसुरेभ्यः खेचरेश्वराः ।
क्रन्दसंरम्भसंभ्रान्तहृदि मय्यवदन्नदः ॥ ७२७ ॥
भीमेनाथ पुरश्रेणिदूर्पश्वर्याय याचिता ।
हृद्यानि राक्षसी विद्या त्रीण्यपाल्यभिनः श्रिता ॥ ७२८ ॥
चक्रिभिः इन्नीकृत्य निखिलान्खेचराधिपान् ।
छलिनी तलिनीभूय बलिनी निजघान सा ॥ ७२९ ॥
द्वावेव बत जीवन्तौ दैवयोगेन केनचित् ।
भवांश्च रत्नचूडश्च दिष्ट्या दृष्ट्याद्य वीक्षितौ ॥ ७३० ॥
इति तद्वचनैर्मत्वा जीवन्तं सुहृदं निजम् ।
प्रीत्याहममृताम्भोधिमध्यमग्न इवाभवम् ॥ ७३१ ॥
अथ श्रीपालकुमारस्य शिक्षा नौ जीवनौषधम् ।
विरुद्धराक्षसीरक्षासिद्धमन्त्रायितं यया ॥ ७३२ ॥
इति ब्रुवन्कुतो ऽप्येष तदा हृदि लुलोठ मे ।
वयस्य एष पीयूषतुषारलवहारवत् ॥ ७३३ ॥ युग्मम् ।
ततः प्रीतिभरस्यास्य मार्गं ते दातुमुद्यतौ ।
आवामिहागतौ दृष्टस्त्वं च युद्धसमुद्धतः ॥ ७३४ ॥
स्वामिना रिपवो बद्धा नीतश्चायं मनो ऽधुना ।
किं कुर्वो जीवदानैककल्पद्रुम समादिश ॥ ७३५ ॥
अथास्यकमलोन्मीलन्मधूषपयसं वचः
इदं गदितुमारेभे कुमारेण मयोदिना ॥ ७३६ ॥
युवां दिष्ट्याद्य निःक्रान्तौ राक्षसीकवलभ्रमात् ।
अद्य दिष्ट्याहमाहृष्टो भवन्तौ संकटादितः ॥ ७३७ ॥

सद्यो ऽभ्युदयदानन्दरसोर्मिस्नाननिर्मलाम् ।
ऊचे वाचं तदा चन्द्रनामा खेचरशेखरः ॥ ७१४ ॥
कुमार मार्यमाणेषु खेचरेन्द्रेषु जीवतोः ।
पुनर्जन्मेव जज्ञे ऽथ त्वदाज्ञापालनेन नौ ॥ ७१५ ॥
तथाहि हृदयग्राहिद्युतिर्विद्योति विद्यते ।
रथनूपुरचक्राख्यं वैताढ्यशिखरे पुरम् ॥ ७१६ ॥
तस्मिन्नस्ति मनस्तिग्मभावेन भुवनं द्विषन् ।
भृशं भीमात्मनां सीमा भीमाख्यः खेचराग्रणीः ॥७१७ ॥
तपोभिर्दुस्तपैरेष निःशेषखगपेषधीः ।
क्रूराशो राक्षसीं विद्यामसाधुः समसाधयत् ॥ ७१८ ॥
ततः संकटं शङ्कमानाः क्वापि न निर्ववुः ।
नवोत्तरशतद्वन्द्वसङ्ख्यिनः खेचरेश्वराः ॥ ७१९ ॥
अथ तद्भयचिन्तार्तिगतनिद्रस्य मे निशि ।
पुरो ऽभूत्कामिनी काचिदियत्ता रूपसंपदाम् ॥ ७२० ॥
मकरध्वजराजस्य राजधानीव जङ्गमा ।
दर्शयन्ती दृशं भावमर्यामित्याह मामियम् ॥ ७२१ ॥
जानीहि मां महेन्द्रस्य महिषीं मोहदद्युते ।
मनो यद्वानुरागं तु सुभग त्वद्गुणेषु मे ॥ ७२२ ॥
तन्मदङ्गमनङ्गार्तं निर्वापय कृपामय ।
त्यज चिन्तां तवारातिं हुंकारेणैव भस्मये ॥ ७२३ ॥
क्षोभकैर्लोभकैश्चेति चेतोहृद्भिर्वचोभरैः ।
चिरमभ्यर्थयामास सा मां कामान्धिता भृशम् ॥ ७२४ ॥
परस्त्रीति निषिद्धेव त्वदाज्ञां ध्यापता मया ।
क्षणदान्ते विलक्षत्वं दधती सा तिरोदधे ॥ ७२५ ॥

तस्यां नाभाङ्कनामास्ति नाकनायानिभो नृपः ।
पद्मवासेति यत्पाणिवासेनेवाप्यधुः श्रियम् ॥ ७५० ॥
तस्य प्रिया प्रियाप्रेकसदनं मदनावली ।
अस्ति राजीवजीवातुवदना मदनायुधम् ॥ ७५१ ॥
तदङ्गजा गजगतिर्जगति प्राप्तविश्रुतिः ।
आस्ते सुरानिलमिलन्भृङ्गा शृङ्गारसुन्दरी ॥ ७५२ ॥
त्रैलोक्यरमणीभ्योऽपि रमणीयतमामिमाम् ।
कन्यामनन्यस्पृहया प्ररयांचक्रिरे गुणाः ॥ ७५३ ॥
भात्यसौ शशिलीलेन शीलेनैव मयात्र किम् ।
इतीवास्या बहिर्नीरपाटेति भीत्यामपि हृदतम् ॥ ७५४ ॥
इयं बाल्यापि शीलस्य परमां भूमिकां गता ।
कदापि न ददात्येव खिद्येव स्वरितं पदम् ॥ ७५५ ॥
चन्दनाद्यपि सेव्यं सा सिषेवे स्वच्छया धिया ।
मनःकामनया हंसगमना न मनागपि ॥ ७५६ ॥
केलीषु सफलीचक्रे कदापीयं न मामिति ।
विमुक्ता कुपितेनेव सांप्रतं शैशवेन सा ॥ ७५७ ॥
यौवनं नलिनाक्षीषु विकारकरणगुरुम् ।
निर्विकारविलासेषु सा क्षिपयति संप्रति ॥ ७५८ ॥
नृपे तदनुरूपाय वराय विहितोद्यमे ।
सांप्रतं सर्वभूपानां रूपं चित्रेषु पश्यति ॥ ७५९ ॥
स्वपादपित्रसोदर्यनयस्याविरहासहा ।
स्पृहये नाहमिति स्माह सखीषु सा ॥ ७६० ॥ युग्मम् ॥
तदाप्येभ्यो निर्वेदात् मदनावली ।
[illegible] सच्चक्रेन हृदावहत ॥ ७६१ ॥

इदानीं तु शनैरस्तं गतयोरिन्दुनारमैः ।
यन्ययोरङ्गिसंघातं ममुद्धानयनं रणात् ॥ ७३८ ॥
इदं रनयनं निद्राद्रिं च द्विपां वलम् ।
ममं च पुञ्जनं कन्यान्मा विपद्दिशोरपि ॥ ७३९ ॥
इत्यादेशे कुमारेन्द्रोस्ताभ्यां तूर्णं विनिर्मिते ।
उत्तम्भौ दन्तिनागेणविकारं नदन्तद्वयम् ॥ ७४० ॥
दूरं प्रपानतः सूरकेसरी सिंहसूनुना ।
बहु सम्मान्य सत्कृत्य मुक्तः स्वनगरं पुरम् ॥ ७४१ ॥
भीमनो भीपनी मा मूर्छां संभूय भास्वतोः ।
इत्युक्त्वाथ कुमारेण मोक्षितौ महितौ खगौ ॥ ७४२ ॥
अवन्त्रिद्र वन्दिसुतानां पुर्वैः पुर्यै ततः करी ।
पदे पदे सुदेवानां हन्दैर्वैन्धुरराम्बुजः ॥ ७४३ ॥
मयागान्ते पयःपानविश्रान्तेः शान्तचेतसः ।
विज्ञतं प्रतिहारेण कुमारस्येदमन्यदा ॥ ७४४ ॥
केनापि सहितः पुंसा प्रहितः स्वामिना स्वयम् ।
जीमूतो नाम दूतोऽस्ति कुमार द्वारि वारितः ॥ ७४५ ॥
विज्ञाय वेत्रभृन्नेत्रसंज्ञां भूपसुतस्ततः ।
दूतं च तं पुमांसं च दत्तसन्मानमानयत् ॥ ७४६ ॥
नरं तमग्रे कृत्वाथ दूतो नत्वेदमभ्यधात् ।
कुमार यदयं वक्ति तत्कार्यं राजवागियम् ॥ ७४७ ॥
उल्लसद्भ्रूलतेनाथ कुमारेण निरीक्षितः ।
सोऽभ्यधत्त सुधारोचिरौचित्यरुचिरं वचः ॥ ७४८ ॥
अस्ति संसारसारश्रीः स्वश्रीजितमरुत्पुरा ।
लक्ष्मीविलसनावासो वासन्तीति श्रुता पुरी ॥ ७४९ ॥

तस्यां नाभाङ्कनामास्ति नाकनाथनिभो नृपः ।
पद्मवासेति यत्पाणिवासेनेवाभ्यधुः श्रियम् ॥ ७५० ॥
तस्य प्रिया श्रियामेकसदनं मदनावली ।
अस्ति राजीवजीवातुवदना मदनायुधम् ॥ ७५१ ॥
मदङ्गजा गजगतिर्जगति प्राप्तविश्रुतिः ।
आस्ते मुखानिलमिलद्भृङ्गा शृङ्गारसुन्दरी ॥ ७५२ ॥
त्रैलोक्यरमणीभ्यो ऽपि रमणीयतमामिमाम् ।
कन्यामनन्यस्पृहया श्रयांचक्रिरे गुणाः ॥ ७५३ ॥
भात्यसौ शशिलेखेव शीलेनैव यथात्र किम् ।
इतीवास्या बहिर्नोरयाद्रीति मीरयामापि रिंदतम् ॥ ७५४ ॥
इयं बाल्यापि शीलस्य परमां भूमिकां गता ।
कदापि न ददात्येव श्रियेव स्वरितं पदम् ॥ ७५५ ॥
चन्दनागपि सेव्यं सा सिषेवे स्वच्छया धिया ।
मनःकामनया हंसगमना न मनागपि ॥ ७५६ ॥
केलीषु सफलीचक्रे कदापीयं न मामिति ।
विमुक्ता कुपितेनेव सांप्रतं शैशवेन सा ॥ ७५७ ॥
यौवनं नलिनाक्षीषु विकारकरणागुरुम् ।
निर्विकारविलासेषु सा शिक्षयति संप्रति ॥ ७५८ ॥
भूपे तदनुरूपाय वराय विहितोद्यमे ।
मांमनं सर्वभूपानां रूपं चित्रेषु पश्यति ॥ ७५९ ॥
स्वपाठपितृसौन्दर्यवयस्याभिरहासहा ।
विवाहं हृदये नाद्यमिति स्माह सखीषु सा ॥ ७६० ॥ युग्मम् ॥
तदाकर्ण्य तदात्येभ्यो निर्वोढा मदनावली ।
आरोप्य तनयामङ्के सशङ्के न हृदा ध्वदत ॥ ७६१ ॥

विवाहोत्सवसुख्यं वत्से धत्से कथं त्वया ।
शोच्या प्रियं विना रामा त्रियामा शशिनं विना ॥ ७६
रमणी रमणीयापि रमणेन विवर्जिता ।
ज्ञानश्रीरिव चारित्ररहिता न हि राजते ॥ ७६३ ॥
अभर्तृका तृणेभ्योऽपि स्त्री पितॄणां गृहे लघुः ।
आयाति भ्रातृजायानामपि मुण्डीति वाच्यताम् ॥ ७६४
कलाहीनः पुमानग्निरज्वालो निर्जला नदी ।
विपनिर्युवतिश्चेति काप्यहर्यं न चतुष्टयम् ॥ ७६५ ॥
स्त्रीणां भवन्त्यनाथानां बन्धुरप्यभिभूतये ।
अब्जिनीनामिवाब्जो ऽपि चन्द्रो ऽनुद्गतभास्वताम् ॥ ७६६
श्रद्धेहि तद्विवाहाय पुत्रि मार्ति विधेहि मे ।
गर्भवासेऽपि यद्दत्तः क्लेशलेशो ऽपि न त्वया ॥ ७६७ ॥
इत्युक्तिमवधार्येयमज्ञेयममृतैर्वचः ।
आदत्ते दीनशृङ्गारगर्भं शृङ्गारसुन्दरी ॥ ७६८ ॥
युक्तमुक्तमिदं मातर्ज्ञाननीतिनिलयं त्वया ।
दुःस्थाय नु गुणैनैकेनापि हीनः प्रियः स्त्रियाम् ॥ ७६९ ॥
कुलं यदि न तद्रूपं न चेत्तमामस्याः कलाः ।
सन्ते न नाथ तन्मानं शीलं सुलभं नृपु ॥ ७७० ॥
रूपशाली कलामाली कुलीनश्चकरागभाक् ।
न प्राप्यश्चेत्प्रियो नारी तत्कुमार्येव जीर्यतु ॥ ७७१ ॥
कर्तुं नवयं वो रूपकस्याकुलनिरूपणम् ।
कस्मिन्नदं वेद यतस्य मनः कुत्रापि रंस्यते ॥ ७७२ ॥
एकस्यां विरतः कन्यामन्यामप्युद्वहेत् पुमान् ।
नार्याः पतिविरक्तायाः मरणं शरणं पुनः ॥ ७७३ ॥

इत्यादिगुणदोषैकविचाराचलचेतना ।
मातर्नाहं विवाहाय वाच्या किंचित्कदाचन ॥ ७७४ ॥
एवं निरुत्तरीकृत्य मातरं कानरानया ।
अहायोत्थाय तल्लस्यविलोपाय ननाम सा ॥ ७७५ ॥
ततो निरादरीभूते भूपे तन्महकर्मसु ।
फलावलिविन्यासकौतुकमग्नेव सा स्थिता ॥ ७७६ ॥
मुदा स्वप्ने ऽन्यदापश्यज्जिनान्ते शान्तधीरियम् ।
आत्मानं कल्पवृक्षस्य वामनः कामनः स्थितम् ॥ ७७७ ॥
यथेप्सितमदो भावी यद्भक्ते यथेप्सितः ।
इत्याद्यचीरे नभ्यं स्वमस्याख्यां विचक्षणाः ॥ ७७८ ॥
सान्द्रभूविमानेन प्रातः प्रीतिमती ततः ।
तत्पुष्पोद्यानमयानं पद्मानन्दनशुभ्रता ॥ ७७९ ॥
केनचित्पथि विक्रीयमाणं माणिक्यपञ्जरे ।
कंचिद्वचनचातुर्यधारं कीरं ददर्श सा ॥ ७८० ॥
मनिष्टचित्तदानेन तं क्रीत्वाहृत्य पञ्जरात् ।
पल्यङ्कस्थी करे कीरं कामापतनमाप सा ॥ ७८१ ॥
ततो मरकतश्मश्रुभ्रूकुन्तलकणीनिभः ।
धान्यप्रवालनिष्पन्नपदपाणिरदच्छदः ॥ ७८२ ॥
पद्मरागदलश्रेणिपिनद्धनखपद्धतिः ।
काचित्कौचित्क्रियापर्यजीवद्भिरिव कल्पयन् ॥ ७८३ ॥
हस्तस्थितान्यमिषोष्ठदन्तमौक्तिककण्ठकः ।
हृष्टा समाटस्थितया पश्यामिव पुरःसरान् ॥ ७८४ ॥
जातरूपमयं विभ्रज्जातरूपमयं वपुः ।
हृष्टश्च कामः कीरेण गतश्चोत्पत्य तत्पुरः ॥ ७८५ ॥
चतुर्भिः कलापकम्

ततः कौतूहलाद्दृश्यमानः क्ष्मानाथकन्यया ।
कामपूर्तिं प्रति प्रोचे वाचमित्युत्सुकः शुकः ॥ ७८६ ॥
कुमारराज यच्छाशु सुप्रियाणि फलानि मे ।
सुप्रियं ते पठाम्यार्याद्वयमेतन्निशम्यताम् ॥ ७८७ ॥
अभियुक्तिशुक्तिमुक्तागुणगणयुक्ताः श्रयन्त्वलाः सकलाः ।
उपलभरविपुलभारैः किमलंकारैः कृती कुरुते ॥ ७८८ ॥
फलमविकलदुर्जपजपदुस्तपतपसोर्यदर्जयन्ति जनाः ।
तत्क्रये निजभुवनेषु सुकृतकृतः सन्तु संतुष्टाः ॥ ७८९ ॥
तावन्मात्रमियमेवेदमार्यायुग्मं शुकस्तु कः ।
इति स्म नाद्भुते मिरमुने मा ऽकथयत्कथाम् ॥ ७९० ॥
इति कीरोक्तिमाकर्ण्य कन्यां कापि सखी जगौ ।
आस्ते भुवि युवा दुःस्थलोर्वी को ऽपीदृशो ऽपरो ॥ ७९१ ॥
स्मरं भ्रमात्कुमारेति संबोध्यार्यायुगं पठन् ।
रूपं कुलं वयः शीलं गुणान्यस्य शुको ऽभ्यधात् ॥ ७९२ ॥
अथ कीरकुमारासि त्वं कुमारस्य कस्य रे ।
गत्वं वद यथा दद्या हया नव फलावलीम् ॥ ७९३ ॥
इति पृष्टः करे कृत्वा कीरः कन्यकया तया ।
स पपाठ सुभाषितानि सूक्तान्येव मुहुर्मुहुः ॥ ७९४ ॥
ततस्तिरश्चां चैतन्यचातुरी केति चेतसि ।
किंचिद्विस्मितसर्वाङ्गी सा विचिन्त्य गृहं गता ॥ ७९५ ॥
न नगरे न सारीजल्पे न वने न निकेतने ।
न जले न स्थले ऽप्यस्या मनः क्वचन निर्वृतम् ॥ ७९६ ॥
कुमारार्कविरहो विरहोऽप्यस्या हृदि जज्वलन् ।
ददौ निरर्गलोद्दाम मदनस्य दिनोदयम् ॥ ७९७ ॥

स कुमारः क रे धीर जल्पन्तीति प्रतिक्षणम् ।
मनो मनोभवभल्ल्याभिन्नमधत्त सा ॥ ७९८ ॥
क्रमाभिवृद्धदिर्थीर्विरहस्तां व्यदहस्तयन् ।
पुष्पचापधरापस्य प्रताप इव दुःसहः ॥ ७९९ ॥
तदङ्गेषु हिमं सख्यो पद्मदलनिभिदे ददुः ।
तत्तत्स्पर्शात्त्वाशु पतत्येवापटापदम् ॥ ८०० ॥
अमान्मन्ये मदङ्गेषु व्याप तापो ऽखिलं जगत् ।
उष्णाः किमन्यथा चन्द्रजलमन्मद्गलम्बजः ॥ ८०१ ॥
निशेश त्वं निशाहीनो दीनो भवसि तत्क्षणम् ।
वियुक्तान्दहसि स्पृष्ट्वा नराः सहजनिष्ठुराः ॥ ८०२ ॥
जल्पे कुमुदिनीप्रेम्णा मामसाहाय पाणिना ।
दूरयत्वं विधुं सख्यः साक्षान्मनापकारिणम् ॥ ८०३ ॥
जानानापि वियोगार्तिं पद्मिनीशस्य पद्मिनि ।
किं मां दहसि हा कष्टं स्त्रियो ऽपि स्त्रीषु निष्कृपाः ॥८०४॥
सख्यः स्फुटति मे वक्षः साधु स्फुटतु वा जवात् ।
स कुमारः स्मराकारः प्रेक्ष्यते यदि हृद्गतः ॥ ८०५ ॥
इत्यादि बहु जल्पन्ती पतन्ती मूर्छया मुहुः ।
मुह्यन्ती कदलीभिः सा वयस्याभिरवीजयत ॥ ८०६ ॥
षड्भिः कुलकम् ॥

रे धीर क कुमारो मां मुक्त्वा यात्यनुयायिनीम् ॥
इति निद्रालयान्तेषु सा स्वप्नान्स्वप्नमुहुः ॥ ८०७ ॥
नीत्वा तापधृतस्तस्या वयस्याः परितः स्थिताः ।
अभिरयारयन्धारायन्त्रपुत्रीचयाश्रियम् ॥ ८०८ ॥
अथेदं मेदिनीशेन मत्वा दिष्टः पुरे चरैः ।

अवगन्तुं कुमारं तं व्यलोकि शुकविक्रयी ॥ ८०९ ॥
चिरं निरीक्ष्यमाणोऽपि क्वापि प्रापि नरेन्द्र सः ।
शुद्धधर्मोपदेष्टेव दूरभव्यैः शरीरिभिः ॥ ८१० ॥
सद्यः कश्चिदनासाद्य रसाविभुरसाविमम् ।
समारभ्य कुमारस्य लब्धये ऽस्य स्वयंवरम् ॥ ८११ ॥
सद्यो विमुच्य कौमार्यं ये राज्यं भेजिरे नृपाः ।
गुणोदाराः कुमाराश्च ये तान्भूपो ऽप्यमाहयत् ॥ ८१२ ॥
तनयो नयसारस्य मन्त्रिणः सागराभिधः ।
स्वामाहानुमहं नाथ प्रहितस्त्वत्पितुः पुरम् ॥ ८१३ ॥
आज्ञातो ऽस्मि कृतिन्नाज्ञा स्वजन्मयोत्कर्षदर्पिणा ।
तद्वासन्तीं पुरीमिन्दुमुरीकुरुतरां त्वराम् ॥ ८१४ ॥
न तथायापि यामास्या तथान्यस्मिन्कृते यतः ।
ममाभिभव एव स्यादिदं वदति भूपते ॥ ८१५ ॥
स जगौ वीरवर्य त्वं यथैव मया मतः ।
त्वयि दृष्टे ममाभूद्गुणानमत्तनभ्रमः ॥ ८१६ ॥
ईदृशं विनाय त्वां कन्या मान्यं गुणानि चन् ।
तस्मात् तव प्रणाभूतिस्तथा त्रिगुणतया ॥ ८१७ ॥
इत्यायुक्तिभिर्भरैः स्वस्य दर्शयन्मन्त्रिपुत्रनाम् ।
कुमारः सागरः कीर्तिमागरं नगरे ऽनयत् ॥ ८१८ ॥
वासन्तीवामन्त्रनाय संपुज्य सपुष्पपुरा ।
कृतमनहतिनाम्यापि न यापति सत्यामति ॥ ८१९ ॥
गन्धर्वादि प्रथान्विनतभास्वत न भूपमः ।
रूपान्यरागमनं ते जना मेनिरेमाप्नुः ॥ ८२० ॥
तदा मृद्धाम्युन्मये वार्तयीन्नागतः ।

कुमारः सो ऽयमाचख्ये व्याचख्ये च गुणे गुणे ॥ ८२१ ॥
अथ पृथ्वीशपुत्री सा प्रपपच्छम्बिकां सखीम् ।
[ज्ञा]तुं वृत्तानि वीराणां सर्वेषां शर्वरीमुखे ॥ ८२२ ॥
[सा] यात्वा यामिनीयामयमले समुपेयुषी ।
[प्र]मादिलसखीलोका माह भूपसुतां प्रति ॥ ८२३ ॥
भूपमहितसत्कारधारिनारीशतान्विता ।
न्यभालयं भुजभृतः समस्तानपि तानहम् ॥ ८२४ ॥
कन्दर्पहस्तशस्त्रीषु स्त्रीषु तासु गतास्वपी ।
विविधां विदधुर्वीरा विकृतिं कृतिताहृते ॥ ८२५ ॥
कन्याकलापरुचिरः मुरोचिर्लोचनप्रियः ।
कश्चिदात्मनि भूपेन्दुः विगतामकलङ्कयत् ॥ ८२६ ॥
कलानां पटलं रूपं गुणानां च गणं परः ।
मदेनादूषयन्मद्यबिन्दुनेव पयोघटीम् ॥ ८२७ ॥
कीर्तिं कल्पधुनीपोतां गुणस्यूतां पटीमिव ।
व्यधान्मित्रमुखा कश्चिद्व्ययेव मलीमसाम् ॥ ८२८ ॥
किमप्यजल्पन्नद्याङ्गः को ऽपि लब्धध्वनिश्रमः ।
अविज्ञ एव विज्ञातो मया ग्रावपुमानिव ॥ ८२९ ॥
इति ताभिः समं राजलोकमालोकमानया ।
मयपन्त्या यथावस्थं विपसत्कीर्तिकीर्तनम् ॥ ८३० ॥
श्रूयते यथनः शीलकुलरूपकलामयम् ।
साधं सनत्कुमारस्य तस्य सोत्कण्ठमागतम् ॥ ८३१ ॥
॥ युग्मम् ॥

पश्येथाय एवं यामसन्मुखालोकनोन्मुखाः ।
यावद्यावन्महेन्द्रेणाप्यनुदितार्थं महन्मदः ॥ ८३२ ॥

स कुमारः कलावद्भिर्भूरिभिर्भूपितान्तिकः ।
न्यभाल्यत सभावर्ती नक्षत्री शुभात्मनाम् ॥ ८३३ ॥ युग्मम् ॥
लोलमौलितया चञ्चच्चूडामणिमरीचिभिः ।
आरात्रिकामिवानन्वन्कवीनां काव्यसंपदः ॥ ८३४ ॥
चाल्यपद्भुल्लीं रङ्गत्सम्यांशुवितनांशुकाम् ।
वाग्गेयकारिणां गीतैः पताकामिव कल्पयन् ॥ ८३५ ॥
चमत्कारकरानेवं स शृण्वन्गुणिनां गुणान् ।
चमत्कारकरं दानं ददानो भूणतां यथा ॥ ८३६ ॥
त्रिभिर्विशेषकम् ॥
सुधाकृतस्तुभावृष्ट्या दृष्ट्या प्रीतिप्रसन्नया ।
तदा सेवकतातापं सेवकानां लुलोप सः ॥ ८३७ ॥
तदा कुमारः कुतुकी यत्र यत्र दृशं ददौ ।
विज्ञानं दर्शयामास स्वं स्वं वैज्ञानिकः स सः ॥ ८३८ ॥
नृपपुत्रि क्षणे तत्र चित्रविद्याविशारदः ।
को ऽपि चित्रपटं पाणौ कुमारस्य समर्पयत् ॥ ८३९ ॥
तं वीक्ष्य विस्मितो ऽपृच्छद्रूपभृल्लिपिकारिणम् ।
चित्रसंवादिनी तस्या रूपश्रीरस्ति वा न वा ॥ ८४० ॥
स जगाद क संवादस्तस्याश्चित्रेण वर्तताम् ।
शक्या रचयितुं केन चित्रे चन्द्रस्य चन्द्रिका ॥ ८४१ ॥
दृग्लीलाद्युज्झितं कास्तु चित्रकर्म तया समम् ।
यस्या दर्शार्धदेहत्वात्प्रतिबिम्बे ऽपि नोपमा ॥ ८४२ ॥
नेदृशी कापि कान्तास्ति कुमार त्रिजगत्यपि ।
विश्वरूपाणि नः पाणिवर्तीनि लिपिशास्त्रतः ॥ ८४३ ॥
इत्याकर्ण्य चिरं चित्रे पश्यन्कामपि तामयम् ।

कुमारः कामबाणार्त इव मौलिमकम्पयत् ॥ ८४४ ॥
क्षणं क्षुभितमात्मानमथ संयम्य धीरधीः ।
चित्रं सहस्य चित्रज्ञं कुमारः सत्कार तम् ॥ ८४५ ॥
अस्मासु प्रतिहारोक्तिविदितासु ततः कृती ।
स न्यगूहत् स्मितं हर्षस्मितसंदर्पिलोचनम् ॥ ८४६ ॥
सो ऽस्माभिर्माल्यकर्पूरचन्दनाद्युपढौकितम् ।
जग्राह बहुमानेन गौरं स्वगुणवृन्दवत् ॥ ८४७ ॥
स्थापितेषु निविष्टाभिर्विष्टरेषूचितं ततः ।
चकार चिरमालापं सहास्माभिर्महाशयः ॥ ८४८ ॥
अस्ति शृङ्गारसुन्दर्याः क्रीडाकीरो विशारदः ।
त्वत्समीपेन्विन एवेति विज्ञप्तो ऽसौ मया तदा ॥ ८४९ ॥
पश्चान्मुक्तो मयाप्यस्ति दत्तहृत्कौतुकः शुकः ।
इत्युक्ते ऽथ कुमारेण कश्चित्तस्य चरो ययौ ॥ ८५० ॥
कीरश्चौरः स माणिक्यपञ्जरेण समं हृतः ।
इति श्रुतिवशात्किंचिच्चिन्तार्त इव स स्थितः ॥ ८५१ ॥
कल्कीभवति व्योममण्डपस्येन्दुमण्डले ।
अस्मान्सत्कृत्य कर्तव्यप्रवीणः प्राहिणोत्ततः ॥ ८५२ ॥
ईदृक्षसनत्कुमारः श्रीकेलिकीरो जयत्ययम् ।
जगत्त्रयचापल्यपरिहारविचारभाजनम् ॥ ८५३ ॥
हासे सनत्कुमारः किं माययापि न भाषते ।
न पाठयति सूक्तानि न फलानि प्रयच्छति ॥ ८५४ ॥
तां श्रुत्वा वणिकाचार्यं गदितं भावके शुके ।
मानसे विन्यसेदं वचः शृङ्गारसुन्दरी ॥ ८५५

सखि यत्रानुरक्तं मे मनस्तावत्स एव सः ।
इत्यधीरस्य धीरस्य वाचा निश्चीयते मया ॥ ८५६ ॥
किं तु कान्तामणी कांचिच्चित्रे गर्वीस्य चुक्षुभे ।
मनः सपत्नीभीत्या मे तेन संप्रति कम्पते ॥ ८५७ ॥
असावीदृशश्चेत्तत्कमन्यं मन्यसे वरम् ।
स्वयंवरेऽस्मिन्स्याद्वाग्मृत्युरित्युचितो मम ॥ ८५८ ॥
इत्युक्त्वा सनिःश्वासं शयनीये लुलोठ सा ।
चम्पिकापि चिरं भ्रान्तिश्रान्ताशेत समीपतः ॥ ८५९ ॥
चित्रश्रीस्तद्दुःखौघसंघट्टाकुलमानसा ।
तदा बहुफलं मृत्युं जानती जीवितव्ययतः ॥ ८६० ॥
निद्रापरं परीवारं मत्वा सत्त्वावलम्बिनी ।
शनैः शनैः समुत्थाय कायव्ययमनोरथा ॥ ८६१ ॥
तत्रैव केलिदोलायाः फलके नृपबालिका ।
पाशवत्कण्ठबन्धाय स्वं बबन्धोत्तरीयकम् ॥ ८६२ ॥
त्रिभिर्विशेषकम् ॥
नैवेहाभूद्भवे चेन्मे कान्तो जन्मान्तरेऽपि तत् ।
मदेकासक्तचित्तोऽस्तु तदेकासक्तचेतसः ॥ ८६३ ॥
इदं निगद्य सद्योऽथ कण्ठं पाशेऽक्षिपच्च सा ।
बाले मा मेति चासीद्दीश्छिन्नः पाशः पपात च ॥ ८६४
युग्मम् ॥
चम्पिका तु तदा मुक्तनिद्रा तद्रभसाद्भृशम् ।
कर्षन्ती पाशतः कण्ठमालोकत कुमारिकाम् ॥ ८६५ ॥
ततः किमिदमित्यस्यै पृच्छन्त्यै संभ्रमस्पृशे ।
आचक्षत चमत्कारि कुमारी चरितं निजम् ॥ ८६६ ॥

दिग्धेनपतिनं श्यामादिन्दुधामाथ चन्द्रिका ।
क्रोणादाय पत्नी हस्तेनोदमुवाच सा ॥ ८६७ ॥
देवि देवि न प्रायं यामाचित्रपटः स्फुटः ।
दृष्ट्वा च यस्मिन् देवि पश्यमेवात्र चित्रगा ॥ ८६८ ॥
सनत्कुमारं स्वप्नेऽपागतं दर्शयितुं पुनः ।
चित्रस्थिता त्वं देवाय कथमानीता कथ्यताम् ॥ ८६९ ॥
इति वागमृतं सख्याः स्फीतं पीत्वा पतिव्रता ।
ादाय को चित्रपटमित्याददे वचः ॥ ८७० ॥
गृष्णामि कलमकहस्ता चित्रपूर्णागसुन्दरि ।
ाचिर्नीयामि च कर्मं धलं नहिदं अपि मन् ॥ ८७१ ॥
धन्यास्मि कलकस्पर्शं माप चित्रगतापि मन् ।
दर्शयमुपपुलकं मुमुदे कृमुदेक्षणा ॥ ८७२ ॥
चित्रं परिरेभे किं न पटान्तरितमप्यहम् ।
सैन्यदानं परिरम्भमिमं चित्रपटे हृदि ॥ ८७३ ॥
कर्णगोचरमप्येनामनयभित्रगुन्दरीम् ।
कुमारवर नायामि किं चक्षुर्गोचरे ऽपि मे ॥ ८७४ ॥
एवं तयोक्ते शून्ये ऽपि मन्यः सन्यस्तलाभगात् ।
सनत्कुमारो धार्मागधानधायान्तरः पुरः ॥ ८७५ ॥
गृहीत कलकं दत्वाचमनं सुखकारानम् ।
कुमारः सो ऽयमायातीत्यूचे कीरो निरूप्य ताम् ॥ ८७६ ॥
अथाभ्युत्थाय हर्षोर्मिमणुघेनाशु चम्पिकः ।
ददावासनपासीने कुमारे चेदमब्रवीत् ॥ ८७७ ॥
अद्य नः सफलं जन्म सुमुहूर्तोऽद्य यामिनी ।
यदस्मद्धाम्नि देवेन स्वयं पादो ऽवधारितः ॥ ८७८ ॥

अयं ते देवि स प्राणद्रविणो यस्त्वदिच्छया ।
तूर्णमाज्ञाविधायीव जज्ञे लोचनगोचरः ॥ ८७९ ॥
एतदालोकपीयूषपानविघ्नां त्यज त्रपाम् ।
अस्याननेन्दौ ह्याद्य कुरङ्गीकुरु लोचनम् ॥ ८८० ॥
इत्युक्त्वयामकृदुल्लास्य दृशं मृणालवाल्या ।
दृष्टास्यं हृष्टमनसं कुमारं स्माह चम्पिका ॥ ८८१ ॥
हर्षाश्रुवारिहारिण्या स्फारतारांशुदूर्वया ।
इयं ते वीर दत्ते ऽर्घं दृशा प्रसृतिदीर्घया ॥ ८८२ ॥
अस्ति त्वदुचितं नान्यदातिथ्यं त्रिजगत्यपि ।
त्रिजगन्महनीयेयमेवातिथ्यं तवास्तु तत् ॥ ८८३ ॥
स्वागतं वीरकोटीर तवास्मिन्नस्मदोकसि ।
विशतः स्खलितं नासीत्कथमुद्दामयामिके ॥ ८८४ ॥
अथोदितस्मितव्याजराजद्द्युतिततीरिति ।
कुमारस्तोपदुग्धाब्धिमुक्तालीरुज्जगार गाः ॥ ८८५ ॥
सर्वां शृङ्गारसुन्दर्यास्त्वां मत्वा कीरकीर्तनात् ।
सहैवाहमिहागच्छमदृश्रीभूय विद्यया ॥ ८८६ ॥
कण्ठपाशं कुरङ्गाक्ष्याः कुन्ततो ऽत्र करान्मम ।
च्युतश्चित्रपटो हीण इवास्यां हवपयसृति ॥ ८८७ ॥
स्वं च धन्यममन्ये ऽहमिह स्नेहवशंवदाम् ।
इमामालोकयँल्लोकत्रयलोचनचन्द्रिकाम् ॥ ८८८ ॥
इति वर्षति कर्णेषु कुमारे सूनृतामृतम् ।
नृपतिप्रतिहारेण गर्जितं हृदितं बहिः ॥ ८८९ ॥
रे किंकरा धराजानिर्युष्मानाज्ञापयत्यदः ।
द्रुयः संपाद्यतामद्य स्वयंवरणमण्डपः ॥ ८९० ॥

अपि दिव्यरिकाः कार्यं कुमार्याः स्नापनादिकम् ।
स्वयंवरमुहूर्तो हि श्वो ऽस्ति स्वस्तिप्रदः प्रगे ॥ ८९१ ॥
त्वरध्वं मरुदुद्यानमधुना विधुनाम्बकः ।
आरोहति सपालेपी पश्यतामेव यो रविः ॥ ८९२ ॥
इत्युक्त्वा विरते तत्र धात्रीकपिनुः सुतः ।
ऊचे प्रेमगुणावीचिं वाचं नृपसुतां प्रति ॥ ८९३ ॥
त्वद्गुणासक्तचित्तो ऽस्म्यन्वहं नृपनन्दिनि ।
मा स्म मामन्यथा स्वप्नसंकथास्वपि शङ्कयाः ॥ ८९४ ॥
यामि संप्रति यामासि स्थातुमत्रोचितं न मे ।
मयात्मनो मनो मुक्तमस्ति सेवामयं त्वयि ॥ ८९५ ॥
इत्युक्त्वा स तिरोभूय तामीयुश्च समुत्सुकाः ।
प्रतिकर्मविनिर्माणचारिकाः प्रतिचारिकाः ॥ ८९६ ॥
किंकराश्च त्वरामन्दगतयो मण्डपं ययुः ।
तं च मण्डनमण्डल्या मण्डयामासुराशु ते ॥ ८९७ ॥
स्वयंवरोत्सवे तस्मिन्पताकापाणिभिर्ध्वजैः ।
शुशुभे ककुभामीशानाह्वयन्निव मण्डपः ॥ ८९८ ॥
तस्मिन्विभ्रमनोमोहदिवसोदयभास्कराः ।
निधातकान्तयः शातकुम्भकुम्भा विरेजिरे ॥ ८९९ ॥
तत्रोत्तोरणस्तम्भभाजो चन्दनमालिकाः ।
लक्ष्म्याः स्वभावलोलायाः केलिदोलाकलां दधुः ॥ ९०० ॥
मुक्तामालम्बनसन्नत्या विद्योतितनुतः ।
स्मरप्रसरनिस्तन्द्रास्तत्र चन्द्रोदया बभुः ॥ ९०१ ॥
चञ्चदुच्चप्रपञ्चेषु तत्र मञ्चेषु दिद्युते ।
स्फारैः पुष्पगृहैः पुष्पायुधयन्त्रायुधैरिव ॥ ९०२ ॥

मुक्तास्वस्तिकरोचिष्णुकस्तूरीमण्डलच्छलात् ।
ईयुस्तत्र सनक्षत्राः स्मरमित्राणि रात्रयः ॥ ९०३ ॥
गल्लपक्ष्मस्तत्र विभानन्दाभिनन्दिनः ।
अभजञ्शगभृल्लीलां नीलाम्भोजभृतः सिताः ॥ ९०४ ॥
श्यामशोणसितैः सप रत्नस्तम्भांशुभिर्बभौ ।
स्फुरत्समोरजःसत्त्वैश्चित्तैरिव हृतर्नृणाम् ॥ ९०५ ॥
समाकृष्ट इवोत्कृष्टैः पुण्यैः पुंसां स्थिरायुषाम् ।
परीमण्डनो जज्ञे स्वःखण्ड इव मण्डपः ॥ ९०६ ॥
ध्वनिस्तूर्यस्य प्रस्फूर्जन्दूरमूर्जस्वलोदयः ।
मण्डपान्तःसमुद्भ्रान्तस्मरार्णवरवच्छविः ॥ ९०७ ॥
तं मण्डपमखण्डश्रीमालमालोकितुं तदा ।
पूर्वशैलशिरोभूपा पूपाभूत्कुतकादिव ॥ ९०८ ॥
दूतालिभिः समाहूताः पुरुहूतास्ततः क्षितेः ।
सशृङ्गाराः कुमाराश्च मञ्चसंचयमाश्रयन् ॥ ९०९ ॥
निशाचरितरोचिष्णुमगुणद्विगुणद्युतिः ।
मञ्चसिंहासनं सिंहभूपभूरप्यभूषयत् ॥ ९१० ॥
पतिंवरा निराधैस्तैर्म्लाने वीरैरिहागते ।
विमुक्तश्रीस्पृहैरब्जैरिव कैरववान्धवे ॥ ९११ ॥
पृष्ठतो ललितं गीतं गायन्तीभिस्तदालिभिः ।
अग्रतो वन्दिनीवृन्दैर्वदद्भिर्विशदाः स्तुतीः ॥ ९१२ ॥
वंशवीणादि तद्विधैर्वादयद्भिरितस्ततः ।
आनन्द्यमानहृदया हृदयालुभिरुन्मदैः ॥ ९१३ ॥
यूनामपाङ्गदृग्भानि श्यामरूपाणि पाणिना ।
धुन्वाना पानमानानि मनांसि संगलिच्छलात् ॥ ९१४ ॥

अमान्यमन्मथद्वाने कश्मीरजरजश्छटाद् ।
मनःकुमारस्पर्धीरागपङ्केषु बिभ्रती ॥ ११५ ॥
विभूषणझणत्कारैर्नर्तयन्तीव मन्मथम् ।
स्मितया हासयन्तीव रतिं लोचनलीलया ॥ ११६ ॥
पीयमानमुखेन्दुश्रीर्लोकचक्षुश्चकोरकैः ॥
लीलाद्देशेति जलाद्रिः सेव्यमाना सखीजनैः ॥ ११७ ॥
चम्पिकाहस्तविन्यस्तस्वर्णवरणमालिका ।
विवेश नृविमानस्था मण्डपं नृपनन्दिनी ॥ ११८ ॥
सप्तभिः कुलकम् ॥

अभूवन्नुत्तमद्भावविलासभृद्दृशो नराः ।
शृङ्गारोत्कटधीराणां विविधाः क्रियाः ॥ ११९ ॥
तथाहि ।
प्रसमीक्ष्यापि मां कश्चिदन्यापारणोदरम् ।
आरोपयन्नृपो दृष्टिं लीलालालसां शनैः ॥ १२० ॥
अस्य भाति निशान्ते स्वर्गमित्यस्य कश्चन ।
कथितवांस्तत्र निःश्वासे नीलोत्पलमिवाम्बरम् ॥ १२१ ॥
कश्चित्पाणिपुष्पाणि करे प्रति स्वयि लीलया ।
प्रदापनापि मां स्पृष्टुं नरजुषः पुष्पाञ्जलिः ॥ १२२ ॥
केऽपि सानुः पुरन्दरस्य वेत्ति पाणौ धनुर्धरः ।
कोऽपि नर्म वचनं वक्तुं पुष्पेन्द्रियविनोदनम् ॥ १२३ ॥
कश्चित्सगार पादान्तस्थो लीलापुष्पः सर्वतः ।
नपन्यालिपया नमसः सामानि कौतुकादिव ॥ १२४ ॥
अपरः कम्पमानाम काञ्चिमालाकुलितदिशाम् ।
पुष्पबाणेन बाणेन हार्दं हन हृदयानि ॥ १२५ ॥

हृदि मग्नजया कर्णौ निरोधान्यो मृणालिनम् ।
तापनात्पोषितो मत्वा न्यग्मुखो निःश्वसन्निव ॥ १२६ ॥
नरेन्द्रसुन्दरं वक्त्रमिति तां ज्ञापयन्निव ।
मुक्त्वा स्वर्णाब्जपद्मालावरस्त्रीं परः ॥ १२७ ॥
सुवर्णकेतकीपर्णपत्रः करजाङ्कुरैः ।
विलिलेख तदङ्गेषु दत्तहृत्पुलकाङ्कितः ॥ १२८ ॥
कश्चित्तद्दर्शनोद्भिन्नस्वेदबिन्दुचयाञ्चितः ।
अहो संपद्यमौ ऽयमित्यूचे ऽन्तःस्मितान्सखीन् ॥ १२९ ॥
तां निरीक्ष्य कुरङ्गाक्षीं इदं को ऽपि हृदि न्यधात् ।
तत्कालमिह कामेन क्षिप्तं काण्डमिवेसितुम् ॥ १३० ॥
एवं विकुर्वतामुर्वीपतीनामग्रवर्त्मनि ।
आनिनाय जया नाम प्रतिहारी पतिंवराम् ॥ १३१ ॥
अथो निवार्य तूर्यादि दर्शयन्ती धरापतीन् ।
इयमूचे विलोलभ्रूभृङ्गा शृङ्गारसुन्दरीम् ॥ १३२ ॥
अमी समीयुस्त्वद्गत्या विश्वे विश्वम्भराधराः ।
चन्द्रीकुरु कमप्येषु चक्षुःकुमुदकौमुदि ॥ १३३ ॥
अयं स हंससंज्ञः श्रीनाभिसूनुकुलाङ्कुरः ।
राशीकृतयशा देवि काशीपुरपुरन्दरः ॥ १३४ ॥
दिवा विश्वसमक्षाणि निशि स्वप्नमयानि च ।
न विश्राम्यति देवार्चादानानि जनयत्ययम् ॥ १३५ ॥
एष धर्मैकनिर्माणव्यसनी शक्तिमानपि ।
अन्यैरपि नृपैर्भुज्यमानामुर्वीमुपेक्षते ॥ १३६ ॥
अमुं गमनलालित्यतरले तरले दृश ।
रङ्गद्गङ्गातरङ्गेषु हंसैकसहचारिणी ॥ १३७ ॥

यान्ति पूज्यस्य तुल्यो ऽपि पूज्यतुल्यो ममम्यगाम् ।
कुमार्यां मन्दविन्दुत्वे ऽभिषन्त्यास्ये जगौ जया ॥ १३८ ॥
अयं नगन्न इन्दुर्वीनानिर्विजयते युवा ।
जेता द्विपामपेक्षानामयोध्यानायको वशी ॥ १३९ ॥
कालिन्दीकान्तिदुःशीर्णिकरतूरीपूरितनिधियाम् ।
अयं पाथाविहारी स्वं हारीयत्नः दिशां यशः ॥ १४० ॥
अमुं वृणु विलासेषु देवि सेविष्यसे यदि ।
शरत्पूर्णीरवानीरसमीरसुरसा निशाः ॥ १४१ ॥
सरयूभागुरे ऽप्युपदर्पणिसरस्यपि ।
कन्यास्मिन्नामनद्वारं प्रसन्ने मानिनीव सा ॥ १४२ ॥
दृष्टिदिपिपदावादीत्तामुदित्य जया मनः ।
प्रथिनो ऽयं पृथुर्नाम पृथुर्थीर्मणुरापतिः ॥ १४३ ॥
ममपंग ऽखिलं तंण विधे विश्वर्षरपि ।
स्पृष्टुं निलं ऽपि विरूपोत्स्व न पार्यते ॥ १४४ ॥
अयं व्यंगनः समाभाजनासामन्वरे सतीम् ।
अमन्दं चन्दनस्यन्दैरिव सिञ्चति कीर्तिभिः ॥ १४५ ॥
अमुं वृणीष्व रन्तुं चेत्तुर्विना रसिता मम ।
उपरक्तसिन्दुरमाविन्दुवृन्दा वृन्दावनावनिः ॥ १४६ ॥
याहो ऽप्य पुण्यपर्वाणापामोदाय शिविरपदाः ।
हारावदूरद्युरी वक्त्री मन्याना जगमुपमनः ॥ १४७ ॥
ममाहाय जया देवि कम्पाया जयक्ययम् ।
उज्जयिन्या विहारैकसाविन्याः सौधर्त्ये पदम् ॥ १४८ ॥
अयं विरिविमयोहारक पापाणमालिनीम् ।
वृणायन्पम्वर्णीक ऽपि हरी वाधे वरस्पदं ॥ १४९ ॥

अमुं तूणीकृतारातिं वृणीष्व वरवर्णिनि ।
सपत्नी रत्नगर्भा ते भातु रत्नाकराम्बरा ॥ ९५० ॥
रत्नदण्डप्रतिमितां भूपे ऽस्मिन्नसितेक्षणाम् ।
तां वीक्ष्य कन्यकां निन्युर्विमानं वे ऽन्यतो नराः ॥ ९५१॥
अथावदज्जया देवि पश्यामुं दर्पकाभिधम् ।
पाण्ड्यं कोदण्डपाण्डित्यचण्डमाखण्डलं भुवः ॥ ९५२ ॥
द्विपः स्वप्नेषु वीक्ष्यामुमुदस्रं जातजागराः ।
नमन्त्यस्य भ्रमाच्चित्रमन्मथं चित्रवेश्मसु ॥ ९५३ ॥
एलावनसहेलासु वेलासु पयसां निधेः ।
ताम्रपर्णीसरिन्मुक्तासिकतासु रतिर्यदि ॥ ९५४ ॥
तदेनं वृणु वामाक्षि मद्यन्तु मनस्तव ।
कर्पूरचन्दनामोदकलया मलयानिलाः ॥ ९५५ ॥
इतो ऽस्या सरलं वीक्ष्य सरलाक्ष्या निरीक्षणम् ।
चलित्वा किंचिदित्यूचे वचः शुचिनया जया ॥ ९५६ ॥
देवि चित्राङ्गदो नाम विचित्रगुणगौरवः ।
अमी ददाति नानन्दं कश्मीरभूपतिः ॥ ९५७ ॥
शुद्धान्तमस्य किं श्लाघे श्लाघ्यास्ता अपि योषितः ।
स्वप्ने प्रतिमितां चित्रे ऽप्येनं कान्तं स्पृशन्ति याः ॥ ९५८ ॥
अमुं कलय लोलाक्षि स्वत्कपोले लिखत्ययम् ।
पत्रं शुद्धान्तकान्तासु चित्रमभ्यस्तमन्वहम् ॥ ९५९ ॥
रागोचिताः स्तुतीरस्य शारदार्चनसत्कवे ।
नित्यं निधेहि काश्मीरकलिका इव कर्णयोः ॥ ९६० ॥
स मे परः पुमानेव मः पुरातपरिग्रहः ।
इत्यथाह प्रतीहारीं कुमारीयं मृदुस्वरा ॥ ९६१ ॥

तुल्वा तुल्वा ततो भूपमन्यमन्यं ययौ जया ।
आलोक्याम्लोक्य कुसुमं वनभृङ्गीव सुन्दरा ॥ ९६३ ॥
सनत्कुमाररक्ता सा तेषु तस्थौ न कुत्रचित् ।
जलाशयेषु हंसीव सिद्धसिन्धुतटोन्मुखी ॥ ९६४ ॥
सा ययौ यस्य यस्याग्रे स स भूपो ऽभवत्प्रभाम् ।
यं यं त्यक्त्वाग्रिमाग्रभव्याके स स म्लानमनाः ॥ ९६५ ॥
एवं प्रागेव दृष्टेव साल्या परमाख्यया ।
सनत्कुमारमासाद्य निश्चलाद् जया ततः ॥ ९६६ ॥
जम्बूद्वीपधियो भाति इव स्वर्णे ऽप्य भारते ।
पुरी विलीलगाह्वये श्रीकान्ता परिपत्तति ॥ ९६६ ॥
सिंहनामा नरपालः क्ष्माभिर्भूर्भिरितः ।
तत्र नायकमाणिक्यनिभमो लभते नृपः ॥ ९६७ ॥
अयं तत्पादभूर्भूपकान्त इव कानने ।
सनत्कुमारत्वाज्जयस्वयंवरविनायकः ॥ ९६८ ॥
अमानः क्षाममस्यान्तः सुहृष्टा विजया गुणाः ।
पतविन इव स्पृष्टे व्योम्नि नाथुष्कृष्यात्मनाम् ॥ ९६९ ॥
अनन्यलोभमक्षोभमविरागोऽनागुरं वरम् ।
संपेति पवयातीति भुवि लक्ष्मीविलासः ॥ ९७० ॥
कन्यानां प्रवणे रतः सतःथार्थ गुणार्जने ।
तद्रूपानसीयेव म पुराभूत्तिरापरी ॥ ९७१ ॥
वरमाल्या चोर्व्यादि तत्कण्ठे ऽस्य निवेश्यताम् ॥
अनुरूपाय वरमाल्या जुषन्तु दिवौकसः ॥ ९७२ ॥
अयोपानुक्तं स्नेहनदी दृष्टी वपुः ।
मान्ये न्यास वरस्त्रोतं रुचि दर्शितदर्शितेन ॥ ९७३ ॥

वद्धवाप्यां दर्श कन्या वरे च शनकैर्ददौ ।
सनत्कुमारयुग्मं च मञ्चस्थमियमक्षत ॥ १७४ ॥ युग्मम् ॥
अथ संशयस्ताश्चर्याकुले क्षितिभृत्कुले ।
कन्यायां कं वृणोमीति ध्यायन्त्यां वीक्ष्य तौ मुहुः ॥१७५॥
मत्पार्श्ववर्ती धूर्तोऽयं कोऽपि कन्ये वृणीष्व माम् ।
इति तुल्यं तयोरास्यादुल्ललास तदा वचः ॥ १७६ ॥
॥ युग्मम् ॥
ततः सनत्कुमारो यः स मदीयहृदि स्थितः ।
सिकोऽन्यस्तयैवाहं मालया तद्वृणोमि तम् ॥ १७७ ॥
एवं वचो दृढारावं श्रावयन्ती सभासदः ।
स्वकण्ठकन्दले बाला वरमालामलालयत् ॥ १७८ ॥
इति तन्मतिलीलाभिर्विलक्ष्यादिलयं गते ।
मायासनत्कुमारे ऽभूदद्वितीयः स भूपभूः ॥ १७९ ॥
गुणिनो वरणादस्यां गुणज्ञायाममत्सरैः ।
चक्रे नृपकुलैर्मायाजयाज्जयजयारवः ॥ १८० ॥
तादृग्दृक्ताहृष्टैः स्वयंवरणदर्शिभिः ।
तस्या मूर्ध्नि मरुत्कैश्चक्रिरे पुष्पवृष्टयः ॥ १८१ ॥
अथानन्दपथामन्दपान्थो नाभाकभूविभुः ।
सन्मानावर्जितैः सर्वैर्जगतीजानिभिर्युतः ॥ १८२ ॥
तयोः स्मेरस्मरोत्साहं तं विवाहोत्सवं व्यधात् ।
यद्विलोकादिवेन्द्रो ऽपि सहस्रनयनो ऽजनि ॥ १८३ ॥
॥ युग्मम् ॥
बभौ शृङ्गारसुन्दर्या करम्पिकरपल्लवः ।
कुमारः कल्पवल्ल्येव पारिजातमहीरुहः ॥ १८४ ॥

वासन्तीमावकेनाथ सत्कृताः कृतिना नृपाः ।
तद्रूपमनोऽद्भुतचित्ताः पुरं जग्मुर्निजं निजम् ॥ १८५ ॥
दिनानि कानिचित्प्रीयमाणौ नवनवोत्सवैः ।
तस्थौ कुमारः शृङ्गारसागरे श्वशुरौकसि ॥ १८६ ॥
कथं ज्ञेयः स मायाहारीति चिन्तनकल्याञ्छनः ।
तस्येन्दुवद्विहानन्दः सावर्धत दिने दिने ॥ १८७ ॥
अथो कथंचिदापृच्छ्य वासन्तीशं प्रियान्वितः ।
तत्कृतोदारसत्कारः सैहिः स्वस्य पुरे ऽचलत् ॥ १८८ ॥
मार्गे क्रमादतिक्रामन्कतिभिश्चित्प्रयाणकैः ।
स्वर्गाभिरामे ग्रामे ऽगात्स नन्दिग्रामनामनि ॥ १८९ ॥
इहाधिग्राममुद्यानस्वाराम्बुतटिनीतटे ।
भूवल्लभभुवो ऽभूवन्नावासाः सान्द्रशाद्वले ॥ १९० ॥
तत्र कल्लोलिनीलोलकल्लोलकृतमज्जनः ।
समं शृङ्गारसुन्दर्या सुन्दराम्भोजभूषणः ॥ १९१ ॥
यावद्भोक्तुमुपाविक्षत्कुमारः सपरिच्छदः ।
कुतो ऽपि तावद्विरसं वार्तं शुश्राव दुःश्रवम् ॥१९२॥युग्मम्॥
किमेतदिति दुर्वार्तात्यक्तभोजनभाजनैः ।
परिवारजनैरुद्वीक्षिते जवनिकाश्रमे ॥ १९३ ॥
हा स्वगोत्रगृहस्तम्भ नेत्रनन्दन नन्दन ।
क्व गतो ऽसीति मातेन शोच्यमानं मुहुर्मुहुः ॥ १९४ ॥
हा भ्रातः स्वगुणख्यात बन्धुमानयमुं शिशुम् ।
त्यक्त्वा यासीति साक्रन्दैर्भ्रातृवृन्दैः कृताह्वानम् ॥ १९५ ॥
रे दैव किमकाण्डे ऽपि सममस्मन्मनोरथैः ।
अमुं संहरसीत्युच्चैःपूत्कारैः स्वजनैर्हतम् ॥ १९६ ॥

कस्यिये कस्य मङ्गल्यं हा हतास्मि हतास्मि हा ।
एवं विलापान्कुर्वन्त्या स्वस्रा साश्रुदृशान्वितम् ॥ ९९७ ॥
रे कठोर न किं यासि हृदय त्वं सहस्रधा ।
उरस्युरस्ताडयन्तीभिर्बन्धुस्त्रीभिर्गुरुकृतम् ॥ ९९८ ॥
हा वत्स देहि मे वाचं मुखं हा वत्स दर्शय ।
एवं लपन्त्या मूर्छन्त्या मुहुर्मात्रानुधावितम् ॥ ९९९ ॥
रूपं त्रपा सुधाकृ शौर्यं सत्त्वं दानमिमानि षट् ।
अस्मिन्गते गतान्यस्माद्ग्रामादिति जनैः स्तुतम् ॥ १००० ॥
कृतशृङ्गारया यानं तन्वत्या तुरगस्थया ।
कान्तस्यानुगतं गन्तुं सार्धं वैधव्यभीतया ॥ १००१ ॥
उत्पादितं स्वजातीयैश्छत्रं कौसुम्भवाससा ।
कुमारः सप्रियो ऽपश्यत्पुमांसं मृतमर्चितम् ॥ १००२ ॥

॥ दशभिः कुलकम् ॥

तस्मिन्किंचिदतिक्रान्ते शोकानुत्पत्तिसंभ्रमम् ।
मृत्युयोगो ऽस्य नास्त्येवेति ब्रुवन्तं सहानुगैः ॥ १००३ ॥
शान्ताकृतिगतिस्रान्तं मत्वासत्तिपरं नरम् ।
स्वयमेव कृताह्वानं पप्रच्छेति नृपाङ्गभूः ॥ १००४ ॥

युग्मम् ॥

ग्रामवास्यपि किं पश्चात्त्वमागाः किं शुचोज्झितः ।
मृत्युयोगो ऽस्य नास्तीति किमेभिर्भाष्यते ऽनुगैः ॥ १००५ ॥
अथ ध्रुवं पराधीनसुतः को ऽपि गुणैः स्तुतः ।
अहो ऽयमर्हद्भक्तानां वार्तानामिति सो ऽवदत् ॥ १००६ ॥
भवतः कृत्पाकारादेव देव विभाव्यते ।
दक्षत्वं लक्ष्यते साक्षात्संदर्शितसभातः पुनः ॥ १००७ ॥

ग्रन्थिबन्धनस्थानमभिधानमपि यथो ।
रक्तांशं ये विभागकर्तव्य यथः ॥ १००८ ॥
यथं तं विनितानन्द आनन्द इति मापनः ।
प्रतिमाप तत्र वाक्यो वनुष्यवहनिश्चितिः ॥ १००९ ॥
सृष्टिमर्यादि मध्यवनपूर्वाणि मतिपाल्यन ।
यदिदं मतिपाल्यानु भवन्त्येवानन्तेम्यमुः ॥१०१० ॥
मध्यमं निर्माणावधिवक्षार्थं पूर्वसिद्धिनम् ।
मार्ग पायपूर्वा मा स्थापनमभिमादिना ॥ १०११ ॥
स्थापनमर्यादिमा भूतानुयानानि विमन्वनः ।
मागवंन मार्गेणाभिधानूपस्य गतिनः ॥ १०१२ ॥
मार्गाधिकमनिमा मा यत्र नामायिके पुरी ।
द्विनीयं तिथं मागमये पूर्वक्रियान्विनः ॥ १०१३ ॥
पांपपर्मनिमा यत्र यादो मामचतुष्टयम् ।
मन्त्रियः पांपर्ये यणे यतुष्पर्वा चतुर्विधम् ॥ १०१४ ॥
यादः शुद्धानुपायपनस्नानः माशुक्रमोमनः ।
प्रातःपानादि रार्थी च कुलमानः स्मयोपिनि ॥ १०१५ ॥
पांपधन्ययतुष्पर्व्यां मनिमाधेवगाभिर्लाम् ।
मपथः पश्चभिर्मासैः प्रतिमा पञ्चमी भवेत् ॥१०१६॥युग्मम्॥
पूर्वोदितविधेः षष्ठी षण्मासैर्ब्रह्मचारिणः ।
सप्तमी सप्तभिर्मासैः सचित्तं त्यजतो ऽचित्तम् ॥ १०१७॥
त्यजन् स्वयंमारम्भं मासैरष्टभिरष्टमी ।
नवमी नवभिर्मासैरनारम्भं परंतप ॥ १०१८ ॥
यशोदिष्टमाहारत्यागी मुक्तधनो शिखी ।
मुण्डेन जायते श्राद्धो दश मासान्दशम्यसौ ॥ १०१९ ॥

सर्वैकादश मासांस्तु सुश्रितो मुण्डितोऽथवा ।
रजोहरणसंयुक्तः पतद्ग्रहपरिग्रहः ॥ १०२० ॥
किं चैकादशप्रतिमाप्रपन्ने भिक्षां हि देहि मे ।
इत्युक्त्वा विचरन्ग्रामजातौ सैकादशी भवेत् ॥ १०२१ ॥
युग्मम् ॥

तदैवासौ स सम्यक्त्वाणुव्रतानि यथाक्रमम् ।
प्रभुणा वर्तमानो ऽपि दर्शनप्रतिमादिकम् ॥ १०२२ ॥
तत्र प्रयाणमध्याह्ने सार्धे कालत्रये जिनः ।
पूर्वाह्णे विमलत्वाद्यो यानस्थानं यथाविधि ॥ १०२३ ॥
ततो प्रथम मध्याह्ने पूजां कृत्वा जिनेशितुः ।
धाराग्रामसनाथे पथात्रविलो ऽभवत् ॥ १०२४ ॥
तत्र ... कृतानि चैत्यानि तत्रत्येन सार्वभौमः ।
सद्गुणानन्तनाम्ने श्रमणः श्रमणप्रधान ॥ १०२५ ॥
ततः कृत्वा विशेषेण शोभं कुर्वं कुर्वं ... वा ।
... ... कृतानि नाम ॥१०२६॥
युग्मम् ॥

... ... यथा ।
... ... पुत्र समागमेन ... ॥ १०२७ ॥
... ... ।
... ... ॥ १०२८ ॥
... ... जिने ।
... ... ॥ १०२९ ॥
... ... ।
... ... ॥ १०३० ॥

यथा पुनरमीभ्योऽपलक्षणेभ्यः कथान्तरे ।
गुरुस्य इति सर्वज्ञशासने विश्रुते श्रुतम् ॥ १०३१ ॥
तिथयः पञ्चमी षष्ठ्यष्टमी नवमिका तथा ।
चतुर्दश्यप्यमावास्यादिना दष्टस्य मृत्युदा ॥ १०३२ ॥
दष्टस्य मृतये वारा भानुभौमशनैश्चराः ।
प्रातःसंध्यास्तसंध्या च संक्रान्तिसमयस्तथा ॥ १०३३ ॥
भरणी कृत्तिकाश्लेषा विशाखा मूलमश्विनी ।
रोहिण्यार्द्रा मघा पूर्वात्रयं दष्टस्य मृत्यवे ॥ १०३४ ॥
यदि स्रवत्यजस्रं तो दंशा यदि सशोणिताः ।
तीक्ष्णत्वे यस्य दष्टस्य स यात्यन्यं भवान्तरम् ॥ १०३५ ॥
रक्तवान्तेन एको वा त्रिदी काकपदाकृतिः ।
शुष्कः श्यामश्चिरस्थो वा दंशे स्पष्टयति व्ययम् ॥ १०३६ ॥
सार्वनैः सर्वतः शोफाढ्यः संकुचिताननः ।
दंशः शंसति दष्टस्य विनष्टमिह जीवितम् ॥ १०३७ ॥
केशान्ते मस्तके भाले भ्रूमध्ये नयने श्रुतौ ।
नासाग्रे ओष्ठे चिबुके कण्ठे स्कन्धे हृदि स्तने ॥ १०३८ ॥
कक्षायां नाभिपद्मे च लिङ्गे संधौ गुदे तथा ।
पाणिपादतले दष्टः स्पष्टो ऽपि यमजिह्वया ॥१०३९॥युग्मम्
एषां मध्यादिन्द्र न भागमत्रास्ति किंचन ।
येनास्य नाभ्यमध्येऽपि भागः पुंनाग मागतः ॥ १०४० ॥
प्राये ऽत्र मान्त्रिकः को ऽपि नास्ति स्फोरितरः पाद् ।
किं कर्पूरधियः पूरं पूरयेत्तृणकारकः ॥ १०४१ ॥
वदन्तामिति स्निग्धनितान्तधुतिमानिः स तम् ।
उवाच रविमानन्दमानवं नृपनन्दनः ॥ १०४२ ॥

त्वया लोकोत्तरः को ऽयं कलाकुशल कीर्त्यते ।
मान्त्रिको ऽत्रेति धात्रीसुतप्रश्ने ऽभ्यधादसौ ॥ १०४३ ॥
मान्त्रिको लोकसामान्यः सतां मान्यः स मन्यते ।
विषाणामौषधैर्मन्त्रैर्यश्चिकित्सां चिकीर्षति ॥ १०४४ ॥
यस्य शुद्धतपोध्यानैः सिद्धलब्धेः प्रभावतः ।
विषदोषा विलीयन्ते सैष लोकोत्तरः परम् ॥ १०४५ ॥
किमीदृशो ऽपि दृश्यो ऽस्ति स्वास्तिदः क्वापि को ऽप्यसौ ।
इति जल्पति भूपालभवे साश्चर्यचेतसि ॥ १०४६ ॥
हर्षकोलाहलः को ऽपि लोककोकनिशाकरः ।
नृपधर्यरयांशामो दूरादाविरभून्महान् ॥ १०४७ ॥ युग्मम् ॥
किमेतदिति भूभर्तृभुवा पृष्टः पुरः पथि ।
त्वरां त्यक्त्वा मार्गो कश्चित्पुण्यो ऽभ्यधात्पुरः ॥ १०४८ ॥
ग्रामे ऽत्र नागनामा मे बन्धुश्चिरतरान्मृतः ।
विशल्यमपानमुक्तस्याँ तरसा शिबिकान्तरात् ॥ १०४९ ॥
मत्रैव दैवतो मर्त्यश्चेत्कामभक्त्रगोचरः ।
उल्लासन्कुलाल्लासनामास्यागः सद्गतिः ॥ १०५० ॥
निमेष निश्चितः कौतकृतो बाधुकामाचिनि ।
संमलः समभूत्तयालोके लोके मदा मुदा ॥ १०५१ ॥
यावद्विशिष्यते दृष्टिदिक्षु बन्धुविलम्बनः ।
तावद्भावभर्गेऽत्रामिगमागर्भविभूषणः ॥ १०५२ ॥
दैवनिर्मितनिष्काश्रमागिरागभाषणः ।
दृष्टो वर्ष दिनान्ते गन्तानीशावली मुनिः ॥ १०५३ ॥ युग्मम् ॥
भरो मरालुनिभस्तैर्मासान्यापोरपद्गुरः ।
नागम्यास्य वपुःस्थ विलसोत्तरो मम् ॥ १०५४ ॥

इत्याकानगिरं वारं वारं श्रुत्वा जनो मुदा ।
आगात्मार्गं पुरस्कृत्य कल्पविद्वन्दितुं मुनिम् ॥ १०५५ ॥
॥ युग्मम् ॥

सुरासुरनरस्तूयमानातिप्रपर्वभवम् ।
मुनिं नन्त्वागपरो मे भ्राताऽभ्येति महोत्सवः ॥ १०५६ ॥
इत्याख्याय नृपाधीश मत्वांकः प्रति संमति ।
वस्तु विस्तारयेवास्ति तोरणस्वस्तिकादिकम् ॥ १०५७ ॥
एवमुक्त्वा गते मन्त्रिण्यानन्दे सुन्दराननः ।
भूपभूर्भूतलख्यातः मागत्यागमयमभ्यधात् ॥ १०५८ ॥
ईदृग्लोकोत्तरः पूर्वं न मया मान्त्रिकः श्रुतः ।
आगमार्थं इयोऽभिद्रलन्द्रामुद्रितचेतसा ॥ १०५९ ॥
धन्यस्त्वं मित्रवारयो ऽसि विवेकित्वेन वर्णितः ।
अलक्ष्यो ऽर्थः क्षणात्सासादेवं मे दर्शयिष्यते ॥ १०६० ॥
तदेहि देहि पावित्र्यमस्माकं मुनिदर्शनात् ।
इत्युक्त्वा मार्गणं मार्ग सत्कृत्यानन्ददर्शितम् ॥ १०६१ ॥
समं शृङ्गारसुन्दर्या शुद्धश्रद्धानुबन्धया ।
आनन्देन द्विधा सार्धं मुनिं नन्तुमगादसौ ॥१०६२॥युग्मम्॥
मुनिनाथं नमस्कृत्य स्वस्थानार्थं वचनस्ततः ।
चक्रतोषिरस्वंचक्रे धर्मदः सपरिच्छदः ॥ १०६३ ॥
अन्तःप्रसादपीयूषं वर्षन्नपवदि वीतरणः ।
सत्त्वार्थं सुस्वमाचरन्यो सदा यतिपतिस्त्विति ॥ १०६४ ॥
अर्थेषु श्लाघ्यते धर्मो गुणेषु विनयो यथा ।
पुरुषस्तं विना व्यर्थः कायो जीवं विना यथा ॥ १०६५ ॥
वर्ण्यः सर्वरूपो ऽपि विना धर्मं नृणां भवः ।

इयो ऽप्यदेवः प्रासादः कोविदैर्न नमस्यते ॥ १०६६ ॥
सुखं चिन्तितमल्पं यो दत्ते ऽनल्पमचिन्तितम् ।
धर्मश्चिन्तामणिर्धत्ते सो ऽप्यचिन्त्ये चमत्कृतिम् ॥ १०६७ ॥
संसारग्रीष्मदुःखोर्मिधर्मसंतापिता यदि ।
ततो धर्मामृते सन्तु सज्जनाः सज्जमज्जनाः ॥ १०६८ ॥
क्षणे ऽस्मिन्विस्मयस्मेरनयनो मुनिदर्शनात् ।
सनत्कुमारः सद्भक्तिरुवाच रचिताञ्जलिः ॥ १०६९ ॥
एवं यः स्तूयते धर्मः प्रभो युष्माभिरद्भुतः ।
देहिभिर्गेहिभिः सो ऽयं क्रियमाणो भवेन्न वा ॥ १०७० ॥
भवेद्भव्यात्मनां धर्मः सर्वेषां विधिना कृतः ।
श्रुत्वेति श्रुतिपीयूषं मुनिर्वाचमुवाच सः ॥ १०७१ ॥
यद्येवं तत्कथंकारमिदं सारतरं वयः
इयं रूपमिदं मान्यैरवमन्य व्रतं हृतम् ॥ १०७२ ॥
अथ मथितपाथोधिधीरध्वानकिरं गिरम् ।
जगाद जगदानन्ददायकः साधुनायकः ॥ १०७३ ॥
दुःकर्मकक्षसंघोत्थः संमोहोद्धुरधूमभृत् ।
दक्षपक्षिगणद्वेष्यः समीपस्थात्मतापकः ॥ १०७४ ॥
दुर्गरोगस्फुलिङ्गोग्रः कलहत्राट्कृतारवः ।
मिथ्याज्ञानमरुत्प्रेर्यः सर्वेषां दोषपोषकः ॥ १०७५ ॥
अशक्यस्त्यक्तुमत्यन्तं मिथ्यादृष्टिजडालसैः ।
मृतिज्वालाभिरत्युच्चान्मनोरथतरून्दहन् ॥ १०७६ ॥
निरातङ्कं सदानन्दं पदं गन्तुं शुभे ऽध्वनि ।
व्रते भवदवस्तावदेको हेतुर्ममाभवत् ॥ १०७७ ॥

चतुर्भिः कलापकम् ॥

द्वितीयः कः भवो देवूर्भवतां भवनान्निमित् ।
इति पृष्टे सनामिष्टे कुमारेण मुनिर्जगौ ॥ १०७८ ॥
अस्तीह स्तुतविस्तारा ताराख्या रुचिरा पुरी ।
पार्श्वतापेन न क्लिष्टा कीर्णा कोटिध्वजाग्रकैः ॥ १०७९ ॥
तत्र तारापतिर्याचकनाथीकृतजनः ।
तारापीड इति ख्यातः ख्यापको नयधर्मयोः ॥ १०८० ॥
तन्मित्रं संपदां पात्रं पुत्रः श्रीपतिमन्त्रिणः ।
श्रीषेणाख्यः स्वमहाज्ञानदानव्यसनः ॥ १०८१ ॥
अन्यदा मन्दरान्दोलकोलाहलवनकोकिलः ।
वसन्ते नन्दनोद्याने स ययौ नयपावनः ॥ १०८२ ॥
ललन्ती ललना तत्र मेघपथगुणाञ्जनम् ।
ददर्श पुण्यलावण्यपण्यापणविभामुना ॥ १०८३ ॥
एषा श्रीषेणमेणाक्षी वीक्ष्य साक्षान्मनोभवम् ।
दधौ कटाक्षविक्षेपकौशलैरिव हृदयात् ॥ १०८४ ॥
अन्योन्यं दर्शनात्तावन्योन्यमनुरागिणौ ।
स्वस्थानमथ प्रस्थाय जग्मतुर्धाम निजालये ॥ १०८५
प्रमत्तस्य मृगीनेत्राविरहेण स मन्मथः ।
निशि निद्रादरिद्रो ऽथ चित्ते समचिन्तयत् ॥ १०८६
अहो रूपमहो कान्तिरहो भवनविभ्रमः ।
अहो स्नेहानुबन्धश्च तस्याः सम्यगवेदयि ॥ १०८७
कुलस्याभिज्ञानिः कस्य किं नाम रूपयन्त्रसौ ।
क मया द्रष्टव्या चेतःपापेन भ्रान्तेन दिने ॥ १०८८
पार्थिवेन कृपा देवी व्ययो मे भक्तिपुरुषा ।
... जन्मदर्पदर्शनं तस्या न संगमः ॥ १०

इत्याद्यनल्पसंकल्पमर्मतापितमना स ना ।
प्रतिपार्श्वं शुगोन्मानादभिपद्दुःशिर्षा क्षपाम् ॥ १०९० ॥

चतुर्भिः कलापकम् ॥

द्वितीये ऽह्नि स मध्याह्ने रहस्युपवने गतः ।
कात्यायन्या कयाप्यूचे चिन्तानुम्बितचेतनः ॥ १०९१ ॥
इहास्ति पुरवास्तव्यः स्तोकन्यगुणभूषणः ।
तारापीडधराधीशोपाध्यायस्तारकाभिधः ॥ १०९२ ॥
पूर्वपत्न्यां मृतायां स कुलश्रीशीलशालिना ।
एतेनोद्वाहिता रूपमहिता रोहिताह्वया ॥ १०९३ ॥
जरातर्जरगात्रो ऽस्याभियं तु नवयौवना ।
चलान्यक्षाणि चेत्येष दत्ते नास्या बहिर्गतिम् ॥ १०९४ ॥
गतः शारदापुरे राजादिष्टो ऽसौ वसन्ते दिने ।
मया धात्र्या समं चेयमुद्यानं कथमप्यगात् ॥ १०९५ ॥
सुभग त्वं तया तत्र दृष्टो दृष्टिप्रियस्तया ।
स्मरज्वरभरार्ता सा रोहिता मोहिता यथा ॥ १०९६ ॥
तदर्ति हर्तुमद्यास्मद्दुहितुर्देहि दर्शनम् ।
विधेहि वाचिकं चेदं हारयष्ट्या सहागतम् ॥ १०९७ ॥
स्फुरत्कान्तरुचिं कान्तां कृतस्वातिरसंश्रयाम् ।
धेहि मां हारयष्टिं च हृदये हृदयेश्वर ॥ १०९८ ॥
ततो हारलतां कण्ठे न्यस्य सा मे प्रियेत्यहो ।
विशेषादेष शिश्लेष कामिनः क्व विवेकिता ॥ १०९९ ॥
क्षणं श्रान्तिः क्षणं भ्रान्तिः क्षणं चिन्ता क्षणं धृतिः ।
क्षणं श्वासः क्षणं हःसस्तमव्रीडं व्यडम्बयत् ॥ ११०० ॥
इत्यस्मिन्स्मरदोषेण श्रीषेणे विषमीकृते ।

दुष्टचेष्टाघटापोषः प्रदोषः समभूत्ततः ॥ ११०१ ॥
एहि तद्वने तस्या यौवनं कुरु पावनम् ।
एवमुक्तस्तया नार्या सो ऽनार्योऽगो मुदाचलत् ॥ ११०२ ॥
असन्मार्गोऽज्ज्वलत्कामस्तमच्छन्नो ऽपरिच्छदः ।
स तया दुर्धिया सार्धं तां मापात्येव दुर्गतिम् ॥ ११०३ ॥
दुर्दैवद्रोहितो यावद्रोहितो वार्नपत्यसौ ।
तावद्यावत्परीवारस्तारको द्वारमागमत् ॥ ११०४ ॥
कात्यायन्या स भीत्यार्तः प्रक्षिप्तः खालकूपके ।
अस्मात्प्रस्थानके गन्तुमिवार्यं निरयं हठा ॥ ११०५ ॥
दुर्गन्धबहुले कीटसंकुले पङ्किले जले ।
गलद्घ्ने घनं मग्नः स तद्घर्षणव्रणः ॥ ११०६ ॥
तत्र भूकाकनोत्कारवान्ताहाररयाहृतः ।
उत्पिर्नैः क्षुधितैः खालजन्तुविघ्नहिरानने ॥ ११०७ ॥
लालाभिर्वान्तान्नलाभिः पिच्छलाभिर्घनोऽभिनः ।
सशृङ्गारोऽपि बीभत्सरसो ऽङ्गीव बभूव सः ॥ ११०८ ॥
युग्मम् ॥

वदने मर्कर्दैर्नः कृमिभिस्तिमिभिस्तनौ ।
तले ऽसौ कर्परैः कीटैस्तदात्यर्थं कदर्थितः ॥ ११०९ ॥
विभत्यम्बुनि नासायापनागो ऽयं स्वजीविते ।
कूपकण्ठे क्षिपन्हस्तौ तीक्ष्णाग्नेनालिना हतः ॥ १११० ॥
इत्थं निशीथकाले ऽसौ नरको नरकाधिकम् ।
सहमानो महादुःखमर्थापीशुमुर्नं गृहे ॥ ११११ ॥
तदार्थदद्धा दासासौ खालतः सज्जरज्जुना ।
तमाचकर्ष दुःकर्मत्रुटिर्मीतविनाशितान् ॥ १११२ ॥

आगत्योपवने तत्र ज्ञापयिष्यामि भाविनम् ।
दृष्टान्ते तु निशान्ते त्वां यत्र द्वारे अस्ति को ऽपि न ॥११११३॥
एवमुक्तस्तया शान्तजन्माविन्नतनुस्ततः ।
मणनाश्न म क्षीनाशपानच्युत इव द्रुतम् ॥ ११११४ ॥
नरैरारक्षकैः कोलाहलं श्रुत्वा त्वरागतैः ।
नश्यन्दृष्टः सकोदण्डदण्डैर्हत्वा न्यबध्यत ॥ १११५ ॥
गर्तोगूकरवत्को ऽयं दिग्धो दुर्गन्धकर्दमैः ।
इति दीपकरैरेभिरीक्षितः सोपलक्षितः ॥ १११६ ॥
युक्तो मोक्तुममोक्तुं वा मित्रं क्षितिपतेरसौ ।
इत्यालोचपराः सर्वे नरा मूढत्वमागमन् ॥ १११७
मदावदातर्धीर्वीरचर्यया संचरन्नृपः ।
आपपौ तुमुलाकृष्टो दृष्टवान्पथि तं तथा ॥ १११८
ज्ञात्वा तं कृतिनां सीमा श्रीमान्भूपालचिन्तयत् ।
मन्ये ऽसौ मदुपाध्यायालये तुमुलकारणम् ॥ १११
संसारे स्खलितं कस्य न स्यान्मतिमतो ऽपि वा ।
किं तु मे मित्रमा बाल्यात्तन्न युक्तमुपेक्षितुम् ॥ ११२
दृष्ट्वा मां त्वस्य लज्जा स्याद्बाधाकृद्बन्धनादपि ।
इति निश्चित्य कृत्यार्थं प्रकृत्या निभृतोपकृत् ॥ ११२
आरक्षकाणामात्मानं ज्ञापयित्वैव सत्वरम् ।
श्रीषेणं मोचयांचक्रे तारापीडः स्वपीडया ॥ ११२२

चतुर्भिः कलापकम् ॥

वपुःप्रमाणात्प्रच्छन्नमापकृतिमकृतिन्वतः ।
स्वस्य द्राग्बन्धमोक्षाच्च नृपस्तेनोपलक्षितः ॥ ११२३
ततो दर्शयितुं स्वास्यमशक्तः सैष लज्जया ।

सहादिदैवैर्दुरस्तालैः स्फुटे जगत् ॥ ११२४ ॥
धीमान्नः स मयो नवोपवने प्रभातमागते ।
आरामपालस्तेनैव वार्ते शुभ व दुःखदाम् ॥ ११२५ ॥
स्व मा तिमिया सर्वा वानुनिवानुपः प्रमात् ।
सर्वं तेनु मनुनिस्सः धूलिकादर्पण करः ॥ ११२६ ॥
मदाम्रधूलिकामरमकाण्डः सरोऽभिधानः ।
गैरिका इवैरं पदा कन्दैर रसुचार्जितैः ॥ ११२७ ॥
धर्तैः सा तथा पांशुवराह मया कदु ।
पयास्य यमपां त्वं च दशाम्बुमुक्ताकुलाः ॥ ११२८ ॥
तूर्णं उपगारभावाः स्तोत्रायायमन्वनः ।
स सचारुपद्मस्थित्व नवमाधिन्यमान ॥ ११२९ ॥
मदामभावे वापि तं सर्व देहि ममादिन ।
नीमावे उत्र कृपापांत्र विमर्शः प्रवर्तितः ॥ ११३० ॥
पताभिर्वनिःमाभाभिन्यकाम्भोरुतरां जगत् ।
नवःप्रभावया वाष्पा वभारे देवता नृपम् ॥ ११३१ ॥
सम्यग्दृष्टिर्दैवी भक्ता सर्वप्रशासने ।
धर्मध्यानमरणानां सर्वां निघ्नानि वारये ॥ ११३२ ॥
मन्त्रं दत्तसम्पर्को पत्ताम्बराहयुग्मम् ।
स्थर्पित नियमी पृता मया वद्धयमस्ति तत् ॥ ११३३ ॥
विमर्शी स्थपति ह्रीन्दुना शशाद देवता ।
सुमेय रूपण कर्तुं यो वद्धो मोचितमन्यया ॥ ११३४ ॥
युग्मम् ॥

संवृणोमि नैनं जुष्य भाषसे यदि दूषणम् ।
प्रयाचयसि नामापि सदा देवीति वारिता ॥ ११३५ ॥

किं तूक्ता तारकेणासौ सकृपेण नृपेण च ।
देव्युद्ध्याति नाद्यापि रोहिणीं रमणाहिताम् ॥ ११३६ ॥
एवमाकर्ण्य कर्णेषु तप्तत्रपुसमं वचः ।
श्रीषेणश्चिन्तयांचक्रे वन्याद्वैराग्यसंगमः ॥ ११३७ ॥
मन्ये ऽस्मिन्नेव संग्रामे तुमुले मल्लसंकुलः ।
क्षालतः क्षणतः क्षिप्तस्तया बहिरहं तदा ॥ ११३८ ॥
दुराचारकुमारामन्त्रनीरता नितम्बिनीः ।
दुर्मेधाः किं व्यपोद्वेषाश्चिन्ना वासौ वृथा मम ॥ ११३९ ॥
नार्यः कुकार्यकर्तृत्वान्निन्द्याश्चेत्तत्पुमानपि ।
महानिन्द्यो ऽस्मि दुःकर्ममूलदुःशीलभाग्यतः ॥ ११४० ॥
मम धिग्मानुषं जन्म कुलं येन कलङ्कितम् ।
सावद्या सापि विद्याभूत्पापे मय्यपि या स्थिता ॥ ११४१ ॥
क्षितौ जितेन्द्रियत्वं हि मूलं गुणलतातते: ।
कुशीलत्वकुशीघातैर्ममोत्क्षिप्तं तदद्य हा ॥ ११४२ ॥
मामकृत्यमतिं मत्वा त्रस्ता सापि त्रपा तदा ।
निष्ठेदविगन्धे किं वा वासना पङ्किले जले ॥ ११४३ ॥
स्तुत्यः स सत्यमित्यन्वपात्रं क्षत्रशिरोमणिः ।
नाराधीहो ऽखिलो वीरो जहे यो क्षीकरी मम ॥ ११४४ ॥
भग्नोऽनन्यचरित्रो ऽसमपाविन्ध्यधनो ऽधुना ।
स्वमुखं दर्शयिष्यामि कथं तस्योपकारिणः ॥ ११४५ ॥
धन्यास्ते ये क्षितावम्लानमानमान्यपरा नराः ।
स्वर्कीर्तिमुक्ताभरणैर्विभूष्य भुवनान्ययुः ॥ ११४६ ॥
इत्थं चिन्तयतो ऽत्यर्थं तस्य संविग्नचेतसः ।
तार्क्ष्याकारमहैर्नो ऽभूत्संपर्कोत्साहको ऽम्बरे ॥ ११४७ ॥

आवर्त्य स ज्यायांभ्यां याचितोऽपि विविग्नः ।
पितामाप्यागाय वान्यावन्या विरक्तया ॥ ११४८ ॥
ता यत्र स्वजनायां वान्यान्यान्मुत्रेणमा ।
दर्शने ददौ गद्गदैर्विभूतं दुःकृतं कृतम् ॥ ११४९ ॥
मन्दीयसारार्थः स्वपुत्र्या दुष्टेष्टिनः ।
अनुभूर्तादिदं दुःखं तयो अयपन्ने यया ॥ ११५० ॥
स्मरणे लपया यस्मूर्गाने विलिते निवि ।
मनोविज्ञानमयम मम वक्तुं न युज्यते ॥ ११५१ ॥
नाभिःशेषे भूर्त मानः मानस्यानपाम्मनः ।
कास्यर्थे महारोदनगते महामत्वनिः ॥ ११५२ ॥
इति श्रीविनाष्टियमाणः स्व नाविक्यया ।
इदं वत्स स्वधर्मस्य स्वन्यनमापि वत्स शृणु ॥ ११५३ ॥
युग्मम् ॥

महूपेण मूर्च्छापि मोना ध्यामनेदना ।
यद्वीपा विषमे न मयुश्या कन्यपोलकम् ॥ ११५४ ॥
पूर्वीनाणां ऽप्यथ धर्माम्यर्थनः सत्वयो हृदि ।
ययावगोपम्येन स्वमोकः शोकसंकुलः ॥ ११५५ ॥
मेमन्यकमान्मास्यार्द मुहूर्तैः मेति मूढे ।
सार्थीयुगममस्तादर्शः मिलाहूने ऽविशत् ॥ ११५६ ॥
दृष्ट्वा महूपरोमाज्ञकमुना साधुमोषना ।
बन्धनाभावतो ऽमुक्ता भूमिपीठे लुठन्त्यसौ ॥ ११५७ ॥
मरणं मे स्वदीयं स्वयरणाविति वादिनी ।
अनयत मूना सार्थीयमनयास्यते यमः ॥ ११५८ ॥
युग्मम् ॥

शुद्धा श्रद्धा त्वया दध्रे साध्वी नन्तुं मुदा यदा ।
नंदेन देशना [illegible]ः संहृता रोहिते मया ॥ ११५९ ॥
तत्त्वया सुव्रतान्म्नेयमजिह्मब्रह्मचारिणी ।
सा [illegible] नता पवित्रासि तत्त्वं साधर्मिका मम ॥ ११६० ॥
[illegible]पूर्वीयं चिरं वर्धनूर्यध्यानेन मिश्रितम् ।
नयका[illegible] कृत्वा निरोधत्ते स्म देशना ॥ ११६१ ॥
त्रिभिर्विशेषकम् ॥

[illegible]मनसिनोद्विग्नं व्रते तस्यां मनो मम ।
[illegible]ना [illegible]ः पाथस्यमृतः पारदो यथा ॥ ११६२ ॥
[illegible] देहि देहिनो मे व्रतामृतम् ।
[illegible] सुव्रता मामवीवदत् ॥ ११६३ ॥
[illegible] नगव्रतेनतत्स्वय ।
[illegible] यथाघे यत्वया व्रतम् ॥ ११६४ ॥
[illegible] श्रीशान्तिप्रभुगुरवः ।
[illegible] तदर्पणे व्रते मम ॥ ११६५ ॥
[illegible] नवा[illegible]विहारपदम् ।
[illegible] सुमन्मन्न ममाग माम् ॥ ११६६ ॥
[illegible] वणः [illegible]गर्भराः ।
[illegible]वैराग्यवरङ्ग[illegible]मानसः ॥ ११६७ ॥
[illegible]ध्यानाधिकैः ।
[illegible] गृहीतं व्रतम् ॥ ११६८ ॥
[illegible] न तेषां [illegible] ।
[illegible] ॥ ११६९ ॥
[illegible] ।

यदेवं मुदिता देवी वितनोति प्रभावनाम् ॥ ११७० ॥
ततः स्वस्य प्रतिज्ञायाश्चाब्रह्मणो ब्रह्मणो ऽन्तरम् ।
विज्ञाय स्यान्ममादातुं साम्प्रतं साम्प्रतं व्रतम् ॥ ११७१ ॥
किं त्वेतत्कुर्वतः स्यान्मे ध्रुवं दुर्विरहोऽज्ज्वल्या ।
अमुत्र च भवे भद्रं भूरिभाग्यभवं भवेत् ॥ ११७२ ॥
एवं चित्ते स निश्चित्य कृत्यं कात्यायनीं जगौ ।
स्वाभिप्रायं वदन्त्यास्य त्वयाहं साधु बोधितः ॥ ११७३ ॥
ममाकृत्यकृतः कर्मोन्मूलने मूढचेतसः ।
उपायं ज्ञापयांचक्रे भवती भवतीरदम् ॥ ११७४ ॥
आरभ्य ममाऽपर्यङ्के शयानो मोहनिद्रया ।
कथं जागर्मि देव त्वयोपदेशपरः पुरः ॥ ११७५ ॥
ततः श्राद्धे त्वया सार्धं श्रद्धया गुरुसंनिधौ ।
ध्वंसाय स्वापराधस्य ग्रहीष्ये व्रतमार्हतम् ॥ ११७६ ॥
इति प्रतिज्ञां कृत्वा सो ऽग्रतस्तस्या व्रतस्पृहः ।
आपृच्छयानुच्छविच्छेदकातरौ पितरौ बलात् ॥ ११७७ ॥
कल्पमानस्य तस्यात्र सत्रं मित्रमकृत्रिमम् ।
संतोष्य बान्धवान्कृत्वा कृतार्थानर्थिनो जनान् ॥ ११७८ ॥
परिवारपरित्यागं कृत्वा कात्यायनीयुतः ।
श्रीशीलप्रभसूरीणां संनिधौ व्रतमाददे ॥ ११७९ ॥
त्रिभिर्विशेषकम् ॥

विहरन्गुरुभिः सार्धं शोषणः कर्मशोषणः ।
तपांसि तन्वन्सिद्धान्तं शुद्धान्तःकरणो ऽपठत् ॥ ११८० ॥
काले कियत्यपि याते गुर्वादेशमवाप्य सः ।
इहैव स्थण्डिले तस्थौ शुद्धध्यानरतिर्यतिः ॥ ११८१ ॥

दृष्टब्रह्मानुभावापि रोहिता तुच्छमोहिता ।
श्रीषेणे नान्यजत्कामं स्नेहबन्धो हि दुस्त्यजः ॥ ११८२ ॥
पत्युरावर्जनायासौ तन्वती गृहिणां व्रतम् ।
अक्षीणरागा क्षीणाङ्गी मृत्वाभूद्व्यन्तरी वरा ॥ ११८३ ॥
अवधिज्ञानतो ज्ञात्वा तं मुनिं स्थानके ऽत्र सा ।
आगमत्प्राग्भवप्रेमपूरपूरितमानसा ॥ ११८४ ॥
हावैः गीतिगिरां भावैर्व्यन्तर्योपहृतो ऽपि सः ।
नाचलद्ध्यानतो दन्तिदन्तैर्गिरिरिवाचलः ॥ ११८५ ॥
किं त्वस्य क्षपकश्रेण्यामारूढस्य मुनीशितुः ।
केवलज्ञानमुत्पेदे विच्छेदे घातिकर्मणाम् ॥ ११८६ ॥
तन्मत्वा व्यन्तरी मुक्तमोहा भक्तिमिमां व्यधात् ।
सुगन्धानिलहैमाब्जरत्नसिंहासनादिकम् ॥ ११८७ ॥
गते च निर्वृतिं नाथे व्योम्नि वागियमे ऽनया ।
भवेत्तद्भावनायां हि सम्यग्दृष्टेरभीष्टता ॥ ११८८ ॥
सा ऽहं श्रीषेणनामास्मि यतिर्नृपतिनन्दनः ।
विनीता व्यन्तरी चेयं तत्र दक्षिणतः स्थिता ॥ ११८९ ॥
प्रपञ्चे ऽत्र त्वया सौम्य द्वितीयं व्रतकारणम् ।
तदेतदिति वैराग्यं ज्ञेयं विषयदोषजम् ॥ ११९० ॥
इत्थं कथायास्तत्त्वार्थमवबुध्य धियां निधिः ।
सनत्कुमारः संसारकान्तारातिक्रमोद्यमः ॥ ११९१ ॥
उन्मीलितमुखाम्भोजः केवलज्ञानभास्करम् ।
गुरुं विज्ञपयामास नत्वा सत्त्वाधिकाधिपः ॥ ११९२ ॥ युग्मम् ॥
महाशिव चरित्रं ते पवित्रं यन्मया श्रुतम् ।
सम्यग्जितं ततः स्याद्वेद्व्रतमासेव्यते परम् ॥ ११९३ ॥

तत्कर्तुं नास्म्यलं वोढुमिव वत्सतरो रथम् ।
किं तु स्वदारसंतोषं कुर्वे ऽन्यनिवारणम् ॥ ११९४ ॥
ततो दन्तांशुसंसृज्यमानादेशविशुद्धयः ।
अवोचद्वाचिवीचिकल्मषनाशोत्सवनिर्मुनिः ॥ ११९५ ॥
स्वबुद्ध्याभिप्रहथके यस्त्वया प्रागगस्त्वया ।
शमयिष्यति तेनैव हृतिन्मवद्ववत्तव ॥ ११९६ ॥
परदारपरीहारस्तन्यते येन गेहिना ।
तेन सिद्ध्यद्गुणालीकं शीलं शीलितमुज्ज्वलम् ॥ ११९७॥
यस्तु स्वदारसंतोषी विषयेषु विरागवान् ।
गृहस्थो ऽपि स्वशीलेन यतिकल्पः स कल्प्यते ॥ ११९८ ॥
विश्वश्रीनिरदान्यैकं शीलं भूषासु शस्यते ।
जायते येन जीवो ऽयं भूषितो निर्वृतेः श्रियः ॥ ११९९ ॥
सनत्कुमार त्वया मारजयं व्रतमथ्यत ।
विशेषाऽभयत्नेन भव्य भाव्यमिहान्तरम् ॥ १२०० ॥
इत्युक्तो गुरुणाचारीइतीमिति भूपभूः ।
नियमस्त्वत्प्रसादान्मे प्रभो साफल्यमेष्यति ॥ १२०१ ॥
प्रणम्याथ पवित्रान्तःकरणा करुणार्णवम् ।
गुरुं प्रणम्य शृङ्गारसुन्दरीति व्यजिज्ञपत् ॥ १२०२ ॥
मनोवचनकायैश्च गृहं श्रद्धानबन्धुरा ।
परपुंसः परित्यागं विधास्ये जीवितावधि ॥ १२०३ ॥
गुरुः प्राह वत्से त्वं सत्यं शृङ्गारसुन्दरी ।
शीलं शीलां हि शृङ्गारः सतीनिर्दिष्टनितापिव ॥ १२०४॥
इत्थं कृत्वा स्थिरीकारमप्रमादपदभिग्रहम् ।
सनत्कुमारशृङ्गारसुन्दर्योर्विभिनेता मुनिः ॥ १२०५ ॥

भवतां दर्शनं भूयात्पुनर्मे सुलभं प्रभो ।
इति नत्वा गुरुं स्तुवानः सर्वर्तृपात्क्रमः ॥ १२०६ ॥
सभार्यो ऽथ सभागर्भादानपुण्यो ऽगमन्मुदा ।
स्वस्थानं त्यक्तसार्यावाजिनाश्चित्तो ऽप्यशेषतः ॥ १२०७ ॥
युग्मम् ॥

तत्र निर्मितनिःशेषकृत्यः सत्कृत्य धार्मिकान् ।
आनन्दप्रमुखांश्चक्रे स प्रस्तावे प्रयाणकम् ॥ १२०८ ॥
स मङ्गल्यान्यनुल्यानि प्रतीच्छन्प्रतिपत्तनम् ।
नव्यपङ्गमनेऽखण्डदोर्दण्डः स्वपुरीमगात् ॥ १२०९ ॥
तत्र चित्राङ्गशोभायां शोभाकुञ्चितयोषिति ।
श्रीकान्तायां सकान्तो ऽसौ प्रविवेश महोत्सवैः ॥१२१०॥
शृङ्गारसुन्दरीं नार्यो नराधिपसुतं नराः ।
तौ धन्यौ मेनिरे पाणिपीडनक्रीडया प्रियः ॥१२११॥
चन्द्रिकामिव चन्द्रस्य पश्यन्पुत्रस्य तां प्रियाम् ।
समुद्र इव भूमीन्द्रः परमुल्लासमासदत् ॥ १२१२ ॥
अनङ्गमङ्गलोत्फुल्लमालया सह बालया ।
केन केन विलासेन विलुलास रसी न सः ॥ १२१३ ॥
मारस्य सर्वतः सख्युर्भ्रमेणेव श्रियान्वितम् ।
तदा कुमारमासाद्युत्तीर्णः क्ष्मां मधुर्मुदा ॥ १२१४ ॥
पीतकुसुमधुर्गायन्भृङ्गारावैरिलस्ततः ।
चचार सनर्कसत्कलया मल्यानिलः ॥ १२१५ ॥
गृहीतरसुमर्भिवः शिशिरेण विरोधिना ।
श्रीरस्य दिनमासाद्य सश्रीकस्तपनो ऽजनि ॥ १२१६ ॥
प्रदानुमिव पुष्पाणि द्रुमेषु किसलच्छलात् ।

छायापद्मन्यः कामनवीरेण सपाञ्चिताः ॥ १२१७ ॥
वनीरङ्गाद्वनीरङ्गाः कुहूकण्ठीकुहूरवाः ।
कन्दर्पकेलिनाट्यस्य नान्दीनादा इवाभवन् ॥ १२१८ ॥
गायति स्मरभूपालं शृङ्गशृङ्गारिणी जने ।
रतिर्ननर्त सिञ्जानमञ्जीरहंसकूजितैः ॥ १२१९ ॥
दहन्विरहिणीर्विश्वव्यापी पुष्पकलापनः ।
परागः पुष्पचापस्य प्रताप इव निर्ययौ ॥ १२२० ॥
जगज्जयपताकीव कुसुमानि मनोभुवः ।
जितानां दुर्मदोमालीरेखालिख्यन्त षट्पदैः ॥ १२२१ ॥
पुष्पजातिर्गमाणान्सुरभिः सुरभीन्सृजन् ।
कस्य कस्यैव नानन्दसंदर्भाय व्यजायत ॥ १२२२ ॥
तदा हृद्यां वसन्तेन यानश्रीमनुतापुनः ।
स विनोदवनीमापद्वनीपतिनिनन्दनः ॥ १२२३ ॥
इन्द्रकन्यकेवीभिर्मुहुः संपूरमीसितः ।
अयं सकलत्रामाम विश्वसाभिनिपया सह ॥ १२२४ ॥
अमात्रिनन्दनः स्नेहसंमतेन विलोकितः ।
फल्लिनाक्षः इवानङ्गः सुहृत्कुसुमहासिना ॥ १२२५ ॥
लीलाद्रिकल्पवृक्षेषु लीलावापिजलेषु च ।
चक्रे कुमारः सहचारं तां मायामानवीसिरनात् ॥ १२२६ ॥
विश्रामस्य परां भूमिवन्य गन्तुमिवोत्सुकः ।
कुमारोऽयं समारोहदन्ती कामविमानवत् ॥ १२२७ ॥
शृङ्गारसुन्दरीहस्तान्दोलनया दोलया तया ।
गृहीतो या सुदां मायचेतिकन्मन एव साम् ॥ १२२८
*दारवन. कुमारस्य दोलाकेलिकृताद्भुताः ।

मन्दादवदनस्योद्गनिरुदा नु विलापनः ॥ १२२९ ॥
अहो प्रेम्णैकनिलयं बाला दोलाविधेन च ।
अद्य रमयितुं तत्र कुमारः मोलनाग च ॥ १२३० ॥
इमां दोलाधिरूढ्येण पुल्की पुल्काश्रिनाम् ।
स्वमिवानन्दभूपाया दोलायामध्यरोपयत् ॥ १२३१ ॥
कुमारो दोलया सार्धं दिवि दूरं व्यसामगन् ।
गन्धर्वेण स्मरः शक्तिमन्तःसामी मरुज्जये ॥ १२३२ ॥
दोलागतागतैस्तस्याः कान्तिरेखाकरं वपुः ।
हेमेव कषपाषाणनिभे नभसि दिद्युते ॥ १२३३ ॥
यां मुहुर्दोलया गत्वा दत्वा गर्वं शुयोपिताम् ।
उपगन्त्री कुमारेण कुतुकेन व्यलोकि सा ॥ १२३४ ॥
दोलान्दोलाभरभुजत्तन्मुक्तावलिविस्मृता ।
दृष्टं मतन्कुमारेण दिवा तारकितं नभः ॥ १२३५ ॥
नाहग्भ्रित्वामसंरम्भजृम्भमाणस्मरोदयः ।
आलिङ्गितुं मिषाङ्गानि रङ्गद्वारमनोरथः ॥ १२३६ ॥
दिवो दोलावतारस्य निमेषार्धमपि क्षणम् ।
उत्सुको गणयन्नकल्पनादप्यधिकं तदा ॥ १२३७ ॥
दोलामस्थिरयन्नावत्तावदभ्रास्त्येव तत्र सा ।
वदन् हा हेति हत्वा हृत्कुमारेन्दुर्मुमूर्छ सः ॥ १२३८ ॥
त्रिभिर्विशेषकम् ॥

किं किमेतदिति व्यग्रगिरा परिजनेन सः ।
घसृनरसमसेकेन मूर्छन्मूर्छः कृतस्ततः ॥ १२३९ ॥
हा प्रिये क गतासीति गद्गदां गिरमुद्गिरन् ।
आस्फाल्य भुवि मूर्धानमगच्छन्मूर्छनं पुनः ॥१२४०॥

समाश्वसिहि वीरेन्द्र समाश्वसिहि धीनिधे ।
न्यक्तयो ऽस्य सचिवाः शीतकर्म व्यधुः पुनः ॥ १२४१॥
मियं तमो छित्त्वा क्षितः शोकमयं तमः ।
तारो विमन्त्रापाय मरुन्नपि विलापयन् ॥ १२४२ ॥
यागत्य पुरो दीनान्दीनान्साश्रुदृशो भृशम् ।
लीलावनमृगानेते गिरा गौद्गदया ॥ १२४३ ॥
हंस कमलिनीकान्ताकमले ऽपि कथं नव ।
कान्ताप्रवियुक्तस्य ममाक भविता गतिः ॥ १२४४ ॥
स्मर्तव्येयमधुना कामनन्दकलव्यन्दविन्दूपु ।
कथं दीनो ऽस्युदारदृष्टु वे वर्णादि समीहसे ॥ १२४५ ॥
क नृत्ये मार्गीः कोकिल शृणोषि कलमालिपतः ।
पन्तेकिलगमानापि मासा शून्यभूमाधिना ॥ १२४६ ॥
भजन्वागुनुरक्तत्वं मामदु स्वं हि सर्वगः ।
माल्यपिष्यामि मा धन्यं स्वां शुभाषि यथं हताः ॥ १२४७॥
[हे कोकिल कलकाने किं मनोऽपि न गर्वितः ।
दूरीभूतो ऽस्य वयस्याः सर्वणर्वरतः स्वरः ॥]
इत्यार्तं विलपन्तं तं धीराणां योगिनामपि ।
पश्यन्तो धैर्यमुत्सार्य पुष्कारा निर्ययुर्भृशम् ॥ १२४८ ॥
भग्न प्रियावियोगाग्नि सा हन्त सोढुमक्षमः ।
मेकुन्त्या मेकुयान्याने शिवा गे ग्रम्पुर्वहन ॥ १२४९ ॥
हरान्तो परिज्ञानतन्मूर्तिः पान्थरः ।
कुमारमाभार्यायुं वनमाप समापतिः ॥ १२५० ॥
पितुः प्रणामस्याभेन मशाया नपर्यास्तवाः ।
कुमारः संस्तार स्वयम गुहरस्पर्दः ॥ १२५१ ॥

क्रोडे कुमारमारभ्य परिष्वज्यन्मुहुर्मुहुः ।
ययौ नरविमानेन नरेन्द्रमन्दिरं ततः ॥ १२५२ ॥
शिशिरोपे शुश्रूतामस्य प्रिया यस्मै ऽर्पितो कृता ।
एवं द्विधेव निस्तेजा ययौ द्वीपान्तरं रविः ॥ १२५३ ॥
ततः संध्यारुणे रेजे लोहगोलनिभं नभः ।
कुमारविरहज्वालामालाभिरिव तापितम् ॥ १२५४ ॥
उद्भ्रान्त इव शोकाब्धिः कुमारस्य हृदन्तरा ।
तमःस्तोममिषाद्व्योमकुक्षिम्भरिरलक्ष्यत ॥ १२५५ ॥
कुमारस्फारनिःश्वासज्वालावलिसमुद्भुत ।
ताराकुलच्छलाद्व्योम्नः स्फुटं पिटकपेटकम् ॥ १२५६ ॥
मनस्तस्य स्नेहगेहं दहतो विरहानलात् ।
स्फुलिङ्गा इव निर्ययुः प्रदीपाः नृपमन्दिरम् ॥ १२५७ ॥
दूरात्तारापथे तारापतिः पतितवानथ ।
भिन्नः कुमारं मारेण मन्त्रोपल इवोज्ज्वलः ॥ १२५८ ॥
यथा यथा रुचिश्चान्द्री सान्द्रीभूता भुवस्तले ।
तथा तथाभवत्तस्य म्लानमाननपङ्कजम् ॥ १२५९ ॥
सुधारश्मेः सुधाधाराकारा अपि करोत्कराः ।
कुमारस्यादहन्देहं प्रियास्नेहस्पृहं मुहुः ॥ १२६० ॥
अथारनिकरं दूरं परित्यज्य परिच्छदम् ।
भीतः शीतरुचेः कामं चित्रशालां जगाम सः ॥ १२६१ ॥
स दुःखी यावदेकान्ते कान्ताचिन्तामयोऽभवत् ।
तावत्पुरः पुरस्थीव काप्यभूद्दृक्पथे मुदक ॥ १२६२ ॥
सा सान्त्वनाविक्षेपदक्षां प्रेक्षाम्बुधिः स ताम् ।
आह तन्मदनासमपनां मानपराङ्मुखीम् ॥ १२६३ ॥

ध्यासि कल्याणि केन त्वं कार्येणेहागता कुतः ।
इति पृष्टामुना हृष्टा स्पष्टमाचष्ट सा रसात् ॥ १२६४ ॥
शृणु सौभाग्यभाग्यैकसिन्धो नेत्रविस्मय ।
रथनूपुरचक्राख्ये वैताढ्ये ऽस्ति गिरौ पुरम् ॥ १२६५ ॥
तत्रास्ति धैर्यनिःसीमो भीमो भीमोहिताहितः ।
विश्वविद्यानिधिर्विद्याधरचक्री धनोद्धुरः ॥ १२६६ ॥
तस्याहं महिषी भानुमतीसंज्ञा क्षमीश्वर ।
त्वद्गुणायत्तचित्ताहमिहायाता विहायसा ॥ १२६७ ॥
एकदा विश्रंभानन्दः सविमानो समं मया ।
खेलन्नेत्य तत्र वासन्तीपुर्यां धुर्यो नृणां यथा ॥ १२६८ ॥
अन्तरिक्षे स्थितो ऽद्राक्षीच्छृङ्गारसुन्दरीम् ।
अलंकर्तुं भवत्कण्ठं सोत्कण्ठां वरमालया ॥ १२६९ ॥
चिद्रूपः स भवद्रूपमायां निर्माय कौतुकात् ।
त्वद्रूपोऽसनमासीनस्तस्याव्याख्यानमोहरत् ॥ १२७० ॥
त्वत्कण्ठन्यस्तमाल्यायां बाल्यायां स विलासधीः ।
अकस्मात्पिङ्गः कापोलं हृत्वास्य वियन्मार्गात् ॥ १२७१ ॥
मया सह महर्षो ऽयमत्र खेलाविरागतः ।
ददर्श दर्शनीयाङ्गीं दोलाखेलां तव प्रियाम् ॥ १२७२ ॥
किमेतदिति संमोहरोहद्रोहितस्वरा ।
हता धूतानुरागेण तत्क्षणेनाङ्गना मम ॥ १२७३ ॥
तत्र तथासनस्थेऽपि तव रागग्रहाहतम् ।
त्वन्मे वाचमरं यावद्दृश्यैव दिवि स्थिता ॥ १२७४ ॥
स्वानुरागः स्वतन्त्रेण मुहूर्तं तेन पूरितः ।
पुनर्मे परतन्त्रायास्त्वमितो रागसागरे ॥ १२७५ ॥

तन्नाथ मान्मथैर्बाणैर्मथ्यमानहृदो मम ।
कारुण्यहरिणारण्य शरण्य शरणीभव ॥ १२७६ ॥
त्वत्संगानलज्वालावलीढाया इदं मम ।
चित्तेश चारुतारुण्य शरण्य शरणीभव ॥ १२७७ ॥
अनुरक्ताङ्गनापाथोधिमध्यमग्नस्य मे हृदः ।
कन्दर्पकेलिनैपुण्य शरण्य शरणीभव ॥ १२७८ ॥
ममान्यासक्तचित्तेन पत्या संतप्तचेतसः ।
अगण्यपुण्यलावण्य शरण्य शरणीभव ॥ १२७९ ॥
इत्याकर्ण्य सुवर्णश्रीः सकर्णामृतवर्णिकाम् ।
तत्वज्ञः सत्त्ववानूचे वाचं वाचंयमोचिताम् ॥ १२८० ॥
मुग्धे धर्मस्य मर्मत्वं न वेत्सीति वदत्यदः ।
तत्त्वज्ञविन्दुशीलस्य रक्षा शीलस्य शस्यते ॥ १२८१ ॥
परस्त्रीगमनामानमुत्तमस्याकुलीकुलम् ।
तत्कथं सुपथां पान्थस्त्यजत्यजसावे ॥ १२८२ ॥
वाञ्छन्ति परस्त्रीभोगपरिरम्भेण ये सुखम् ।
उदार्थ: [illegible] शुद्धार्ग स्पृहयन्ति ते ॥ १२८३ ॥
[illegible] निर्भ [illegible] नव मिष इति स्थितः ।
नास्तिपथगतं दुःखमसुखाय सुखाय माम् ॥ १२८४ ॥
[illegible] [illegible] सुखा [illegible] न ।
कुलीनानि विलीनानि [illegible] मध्ये ॥ १२८५ ॥
[illegible] [illegible] [illegible] परित्यज ।
[illegible] शीघ्रं यतः कीर्तिस्त्वामुप च निर्वृतिः ॥ १२८६ ॥
[illegible] सा शीर्षे संवत्ते देवतेव सा ।
[illegible] [illegible] भवे भवेत् ॥ १२८७ ॥

सौख्यं भर्तृभयाधान नामुत्र हतिनिमज्जनात् ।
तत्त्वं वद हृदस्तत्त्वं किं वरं परपूरुषे ॥ १२८८ ॥
एवं वचःसुधासारैः कुमारेन्दोरुदीरितैः ।
तस्या मनसि विध्यातो वह्निर्मारविकारजः ॥ १२८९ ॥
चिन्तयामास साप्येवमहो मे भाग्यसंचयः ।
पापारम्भोऽप्ययं पुण्यप्रभाय यदजायत ॥ १२९० ॥
अयं धर्मगुरुर्मेऽभूत्तस्मै गुरुदक्षिणाम्
दास्ये विद्यावतीं विद्यार्थैश्वर्यप्रदनदाम् ॥ १२९१ ॥
स्वभावधट्टिना विद्यावल्लोभेणापुनामुना ।
विद्याहतिविरोधेन सक्रोधेन धुतो युधि ॥ १२९२ ॥
सर्वथा विनयारम्भो मत्पतिर्निरहंकृतिः ।
यदि यपति सन्मार्गमहो सोऽपि महो मम ॥ १२९३ ॥
युग्मम् ॥

इति निश्चित्य चित्ते सा सामर्थ्यं समर्पयोक्तिभिः
कुमारायानवद्याय ददौ विद्या यथाविधि ॥ १२९४ ॥
सा सम्यग्दर्शमासाद्य सद्योविद्यालतश्च ताः ।
अहम्पूर्विकयाऽन्योन्यं गुरुत्वामेयतुर्मुदा ॥ १२९५ ॥
अथापृच्छ्य कुमारं सा रंहसा स्वपुरीमगात् ।
दधौ च तद्गुणः स्मृत्वा वपुः सपुलकं मुहुः ॥ १२९६ ॥
सिद्धा विद्येश्वरी प्राज्ञः प्रज्ञप्तिं स्मरणागताम् ।
स पप्रच्छ विद्यार्थिः विद्याहृद्यात्तपुन्मनाः ॥ १२९७ ॥
कुमारकर्णपीयूषसारणीसारया गिरा ।
अवोचद्भुविनं वाच्यमथ विद्याधिदेवता ॥ १२९८ ॥
नीत्वा निजपुरारामे भीमेन मदनः प्रिया ।

इत्यूचे खेचरेन्द्रेण पटुभिश्चटुभाषितैः ॥ १२९९ ॥
मुग्धे मुधा सुधारश्मिसमानं कथमाननम् ।
कलङ्कयित्वा कुरुषे दृगजलैः सञ्जकज्जलैः ॥ १३०० ॥
मयि दासे ऽप्यविश्वासाश्विासानलकेलिभिः ।
किं बाले ज्वालयस्यङ्गं शिरीषमृदुकोमलम् ॥ १३०१ ॥
किमादेशकरं देवि मामिन्दीवरलोचने ।
नालोकयस्यपूर्वौकान्कुर्वतीन्दीवराकरान् ॥ १३०२ ॥
नाविष्करोषि किं तोषाद्वक्त्रे सुदति स्मितम् ।
मदङ्गे ऽनङ्गदाहार्ते सुधासेचनसन्निभम् ॥ १३०३ ॥
धात्रीशमात्रपुत्रस्य विरहे ऽप्यातुरासि किम् ।
इदं विद्याधरैश्वर्यं भुजिष्येव मया भज ॥ १३०४ ॥
इत्यालापी तया पापी मौनेनैव न्यरोधि सः ।
वायौ ऽवगुण्ठनेनैव सरजस्को हि मारुतः ॥ १३०५ ॥
विद्याछेदभयात्तस्याः सत्याः शापभयाच्च सः ।
शीलश्रीविलोपाय बलात्कारं चकार न ॥ १३०६ ॥
श्रुत्वेति भीमरोषेण प्रियाशीलमदेन च ।
द्वौ संकीर्णौ रसौ भेजे स मरुभो यथा नटः ॥ १३०७ ॥
अथायं प्रियया सार्धं विद्याधरगिरिं गतः ।
रथनूपुरचक्रवालपुरोद्यानं समासदत् ॥ १३०८ ॥
तत्र चित्रगिरः श्रुत्वा निष्ठुराः करुणाश्च सः ।
पश्यन्नदृश्यभूयाग्रे भीमं भार्यां च दृष्टवान् ॥ १३०९ ॥
काले ऽसिनकरवालेन भीमो भीमो ऽभ्यधादिमाम् ।
न मन्यसे मां हन्यासि तदिष्टां देवतां स्मर ॥ १३१० ॥
अथाभाषत नाभाऽऽननया नयनायिका ।

शरणं सिंहमुर्वे स्त्रियो हि पतिदेवताः ॥ १३११ ॥
सिंहनामग्रहादेष विशेषकुपितस्ततः ।
निस्त्रिंशः कृष्टनिस्त्रिंशस्तद्धा योद्धुं ऽस्फुरत् ॥१३१२॥
आः पाप कुरुषे किं रे म्रियसे म्रियसे ऽधुना ।
इत्युच्चैरुच्चरन् राजसूनुराविरभूत्तदा ॥ १३१३ ॥
आकस्मिकभयाद्दुष्टः खड्गो भीमस्य हस्ततः ।
परदाररिरंसूनामुना हि बलर्तपदः ॥ १३१४ ॥
कृपाणं पाणिना वीर गृहाण विगृहाण माम् ।
एवमवहस्यैव क्षत्रपुत्रो रिपुं जगौ ॥ १३१५ ॥
ततः प्रनतमूलेन रणासक्तेन चेतसा ।
अचिन्तयदयं विद्याधरनाथस्तथा स्थितः ॥ १३१६ ॥
रघुरलीमध्यमध्यास्य सकलो अकल्पोत्तरः ।
आजन्म यो मयाप्यस्तः प्रस्तावे वस्तु एव सः ॥१३१७॥
अकृत्यं तावदेकं मे परस्त्री यदियं हृता ।
द्वितीयं तु मयाकारि अहं युधि यदायुधम् ॥ १३१८ ॥
तदहं निरहंकारः कश्माननमात्मनः ।
दर्शयिष्यामि वदयाम निजं स्वान्तःपुरेऽपि ॥ १३१९ ॥
तदीदर्शी दशां नीतो वैरहं इन्त कर्मभिः ।
तान्येव रिपुरूपाणि जेतुमुद्यममाश्रये ॥ १३२० ॥
इति ध्यात्वा कुमारं तं क्षमयित्वा वियायुतम् ।
मुण्डे विद्याधरारण्ये व्रतं तापसतापसः ॥ १३२१ ॥
निशम्य भीमवृत्तान्तं क्षणादारामरक्षकात् ।
भ्रान्ता भानुमती यावत्तदुद्यानं समासदत् ॥ १३२२ ॥
पुरतः पुत्रस्तावद्धावमानमनोरथः ।

तुमुलः समभूद्भीष्मो ग्रीष्मे ऽम्भोधिरिवाधिकः ॥१३२३॥
युग्मम् ॥
इतः सनत्कुमारो ऽपि प्रियालापप्रवर्तितः प्रियाम् ।
शुद्धशीलां समाश्वास्य स्वपुराभिमुखो ऽभवत् ॥१३२४॥
तं तथा प्रस्थितं प्रेक्ष्य भीता भीमभियाब्रवीत् ।
विपक्षेभ्यः कृपादक्ष रक्ष रक्ष पुरीमिति ॥ १३२५ ॥
इमं मद्भर्तृवृत्तान्तं जानन्तः खेचरेश्वराः ।
भीमारयो रणोत्तुङ्गाः पुरभङ्गार्थमागमन् ॥ १३२६ ॥
इत्युक्तः स तया सद्यो दयाहृतो दयाशयः ।
पुरीरक्षामुरीकृत्य चचाले प्रबलायुधः ॥ १३२७ ॥
म्रियध्वं मा म्रियध्वं मा रे रे पत्तनभञ्जकाः ।
तमित्युग्रगिरं चन्द्ररत्नचूडौ प्रणेमतुः ॥ १३२८ ॥
एतयोः पृच्छतोः प्रीत्या गोत्रीकृतहस्तयोः ।
स्ववृत्तान्तं निवृत्तान्तस्तापः स्वापननिर्जगौ ॥ १६२९ ॥
कुमारमथ तौ हर्षप्रकर्षान्वितया गिरा ।
तमूचतुश्चतुर्वर्गसंवर्गणगुणोदयम् ॥ १३३० ॥
अन्वहं नन्वहंकारभृता खेचरचक्रिणा ।
वैरिणा कारणाभावाद्वामेनेन ताडितौ ॥ १३३१ ॥
नदीश्वदरस्याप्य दुःसहार्थमानतौ ।
ऋणस्येव न वैरस्य यतो जायेत जीर्णता ॥ १३३२ ॥
त्वं चेत्पुनः पुरस्थाप्य यावकः शत्रुनायकः
नश्यतो नत्र दामस्मारयोगारयोरपि ॥ १३३३ ॥
इत्युक्तो तौ मुदाभोगभागुरो भूपजन्मनः ।
तस्य सेवाकार्यमस्त्राधिपेशं तप गकतुः ॥ १३३४ ॥

पनरङ्गमागमागाऽपवसामाऽप्यनर्पाटभाक् ।
पथिकः पथिकानन्य जाता भानुमतो मनः ॥ ११३५ ॥
स्वर्गेऽपि द्विजन्मस्य पाक्षिणः शेषरेश्वराः ।
निग्रहानुग्रहारम्भैरवत्यं वत्पतां गताः ॥ ११३६ ॥
पितृपादवियोगार्तिः स्वैरमस्मो ... गतः ।
सर्पे शूद्रारभुजङ्गयां मनस्ये स्वपुरं प्रति ॥ ११३७ ॥
पुर्याः पर्यन्तमायाति स पावनावदेशन ।
धूमस्तोमं सरोजभो नभस्याम्भोधिविभ्रमम् ॥ ११३८ ॥
किमेतदिति जिज्ञासुः तां ज्वली नगरं नयन ।
पुरीमभिभित्ते अत्यद्भुतं दुःखितं जनम् ॥ ११३९ ॥
तन्मध्ये बालवृद्धाद्यामाभिर्निर्वणं स्थिताम् ।
शोकपरवाकुलस्वान्तां विधानादृगनाग तः ॥ ११४० ॥
सोऽन्वपतुषुधीः तां च पृच्छमानः प्रजापुरीः ।
गिरीपालजुषो वायुः पादपांशपुरो ज्वलन् ॥ ११४१ ॥
इयन्तं समयं यस्य च स्थितो जीवित मन्यते ।
सूनोः कण्ठे मणिस्वानो कण्ठविजनाभवद् ॥ ११४२ ॥
मातः श्रीतामपादाम्यः सेव दृश्यस्य दृश्यतः ।
ज्ञातपुण्यानिवासाप्रयां भृगः पुरः पुरात् ॥ ११४३ ॥
एवमन्वेव पादांते तनुभुवमयो हृदः ।
आभिर्निषु पुरुषेण्डी हृद्रेऽपि गुणस्य च ॥ ११४४ ॥
वपुं वित्ति पुत्रस्य रक्षतनयस्य दृश्यतः ।
जगाद जलमास्तनिर्वाण किं देवि दुःखतः ॥ ११४५ ॥
तदा स्वप्नोऽप्यका पुत्र विवदान्ती पुत्रे स्वयम्
विनुमः श्रीविनायेव स्वजनस्य सुदर्शन ॥ ११४६

पुरं पुरन्दरावाससदृशं सुदृशां परम् ।
यमवेश्मेव भूतानामास्पदं तदभूत्तदा ॥ १३४७ ॥
अमन्दाक्रन्दसंदर्भे दूरं पौरजने तदा ।
शुचेव प्रतिशब्देन चक्रन्दे मन्दिरैरपि ॥ १३४८ ॥
कृत्याकृत्यान्यजानन्तो वत्स त्वत्संगमं विना ।
हा जीवन्तो ऽप्यजीवन्त इव जाता वयं तदा ॥ १३४९ ॥
रम्यरामारयारामग्रामकामकलादयः ।
अकृतार्थाः पदार्थास्ते तदासन्विषसोदराः ॥ १३५० ॥
तद्वियोगाग्निकीलार्ता धर्तुं जीवितमक्षमा ।
अजनिष्ट परित्यक्तभोजना जननी तव ॥ १३५१ ॥
कुलालंकारभूतस्य तवादर्शनदुःखिता ।
कुलाधिदेवतामेव सेवमानाग्रतः स्थिता ॥ १३५२ ॥
तपसः साष्टमस्यान्ते नितान्तं भक्तिनिर्भरा ।
आदिश्यत स्वयं स्वप्ने कुलदेवतया तया ॥ १३५३ ॥
लब्धविद्यार्थैश्वर्यः शीलवर्यः प्रियासुतः ।
स ते सुतः पुनः सत्यं मासस्यान्ते मिलिष्यति ॥१३५४॥
तत्तादृशगुणासङ्गसमुत्सुकृतमानिमान् ।
प्राणान्धारयितुं वत्से विधत्से किं न भोजनम् ॥ १३५५ ॥
इयं स्वप्नमिति प्रातर्निवेदितवती मया ।
कथंचिदुपरोधेन मतिबोधेन भोजिता ॥ १३५६ ॥
मासस्यान्तदिनं प्रातरद्य प्राप्य महाग्रहा ।
मया[illegible] निषिद्धापि [illegible] चितां व्यधात् ॥ १३५७ ॥
[illegible] सन्धारयितुं देव्याः स्पृहां पूरयितुं मम ।
अद्याश्व गन्तुं [illegible] तवागमः ॥ १३५८ ॥

अधुना विधुना तुल्यं वदनं सदनं श्रियः ।
पौरचक्षुश्चकोराणां स्वं दर्शय महानघ ॥ १३५९ ॥
अथ पुत्राहृतोत्सङ्गः पट्टमातङ्गसंगतः ।
पट्टदेव्या समनुपमा यथावाहनयान्वितः ॥ १३६० ॥
धारुपार्श्वद्वयश्लक्ष्णचूडादिर्वचरैः ।
अमन्दैर्वन्दिनां छन्दैर्वर्ण्यपुण्यमहोदयः ॥ १३६१ ॥
मानिजन्यस्मानन्दशुभापूरपरिप्लुतम् ।
भूजानिः स्वजनैः सार्वमुत्पनाबमर्णा पुरम् ॥ १३६२ ॥
त्रिभिर्विशेषकम् ॥
अस्मिन्नेव क्षणे दयालः शरणदायिनि दक्षिणः ।
अभिषिच्याङ्गजं राज्ये सभार्यो ज्यायपौवनम् ॥ १३६३ ॥
अवाप्य पैत्रिकं राज्यं मुदितो मित्रपोरयम् ।
विद्याधरपुरश्रेणिद्वयं वैताढ्यार्द्दर्शी ॥ १३६४ ॥
ततो विमानवेनायं वशीकृतमहीतलः ।
पत्नीभिः शोभमानाग भाग्यैर्भुवनभूषणम् ॥ १३६५ ॥
गम्भीरनीरमापूर्णे धर्मपूर्णे च भूभुजि ।
जज्ञे धर्मपरे सर्वाङ्गीणे विश्वम्भरातलम् ॥ १३६६ ॥
शृङ्गारसुन्दरीमार्गे दीन्मादुर्दान्तशोभनम् ।
भूपैः सेवितः सेव्यं यशस्वो ऽभूप दीप्तभाव ॥ १३६७ ॥
इत्थं पृथ्वीधिपं कृत्वा सन्माने स्वजनोत्सवः ।
सभार्यः स ययौ राजा विमाने ऽनुपमे प्रथिते ॥ १३६८ ॥
सौन्दर्ये गुणसारे च गन्धवहे दयाश्रये ।
धर्मवल्लभदेवे स्व स्वयमा निवासं ययात् ॥ १३६९ ॥
सनात्कुमारस्यूद्यानस्योत्सारितभूपैः ।

तस्मात्कुलश्रिये भव्याः सेव्यतां शीलमुज्ज्वलम् ॥ १३७० ॥

॥ इति शीलधर्मे सनत्कुमारशृङ्गारसुन्दरीकथा ॥

सत्कर्माभ्युदये हेतुं शीलं सेव्याधिकं सताम् ।
दुःकर्मशारि सत्कर्मकारि सेव्यतमं तपः ॥ १३७१ ॥
अनादिसिद्धदुःकर्मद्रुपिसंघातपातकम् ।
दम्भोलिपतनं धीरैः खड्गधारोपमं तपः ॥ १३७२ ॥
ज्ञानचक्षुषि नैर्मल्यं तत्त्वातत्त्वावलोकनम् ।
तपस्तपनतश्चे तपःप्रपनतः सताम् ॥ १३७३ ॥
कर्मधामि दहत्युग्रस्तपोवह्निरयं नवः ।
हन्ते देहिनां दाहं यः संसारसमुद्भवम् ॥ १३७४ ॥
तत्तपः सेव्यतां दक्षा दुःकर्मक्षालनोदकम् ।
यत्सेवया यथात्रैव सेव्यो ऽभूद्भुवि संवरः ॥ १३७५ ॥
तथाहि हृदयग्राहिगुणसागरनागरा ।
जम्बूद्वीपे ऽस्त्ययोध्यापूर्भरतक्षेत्रभूषणम् ॥ १३७६ ॥
उपार्जित महीजानिर्महासेन इति श्रुतः ।
चिन्तामणिषु यद्दानार्थियो विश्वमिवेस्यत ॥ १३७७ ॥
अभूद्भूपस्य मान्यो ऽस्य सार्थेशो धनदाभिधः ।
मूर्ता तृषा इव तृषा रेजुर्यस्य धनार्जने ॥ १३७८ ॥
धनश्रीरिति तस्यासीत्प्रेयसी श्रेयसी गुणैः ।
चर्मा प्रथममप्यस्य या तीर्थे रूपशीलयोः ॥ १३७९ ॥
दुर्गतेर्निर्गतः को ऽपि जीवः पीवरदुःकृतः ।
कश्चिद्दौर्भाग्यभाग्यानां तस्या गर्भमवातरत् ॥ १३८० ॥
अयं पांशुजुषि क्ष्मायां मुण्डिना खण्डितांशुका ।
इत्यस्या गर्भनिर्भाग्यैर्दुःखदो दोहदो ऽजनि ॥ १३८१ ॥

नाविष्कारिष्ये निःक्षेपद्रोहदं दोहदं क्वचित् ।
अपत्यदेनमुत्पन्नमेव त्यक्ष्यामि च क्षणात् ॥ १३८२ ॥
इति ध्यानवती यावद्दिनानि गमयत्यसौ ।
तावद्विधिनियोगेन धनदो निधनं ययौ ॥ १३८३ ॥
युग्मम् ॥

धनं धनस्य हस्ते ऽभूत्तेन जगृहे ऽखिलम् ।
दोहदो ऽस्याः स्वभावेन पूर्णस्तूर्णनरस्तनः ॥ १३८४ ॥
पूर्णैर्दुष्कर्मभिस्तस्या जातः पातकवान् सुतः ।
पिङ्गाक्षिकेशः कृष्णाङ्गः कुब्जो न्युब्जः खरस्वरः ॥ १३८५ ॥
सदुःखा सूतिरोगार्ता मुक्ता परिजनेन सा ।
ईदृग्गात्रे सुते जातमात्रे तत्र मृता ततः ॥ १३८६ ॥
तस्या दत्तः शिखी तुल्यजातिभिः प्रातिवेश्मिकैः ।
पयांसि कृपया सो ऽपि पायितः प्राणितश्च तैः ॥ १३८७ ॥
उत्पन्नेनामुना सर्वं श्रीकुटुम्बादि संहृतम् ।
ततः संवर इत्यस्य जनैर्नाम विनिर्ममे ॥ १३८८ ॥
अज्ञानजनदुर्वागयताडनैर्ववृधे ऽधिकम् ।
ग्रीष्मवातरजःपातैर्यवासक इवाग्रकः ॥ १३८९ ॥
वैरूप्यमेव तस्याभूत्पत्तने वर्तनं शिशोः ।
विटानां विटचर्येव जीवनं जायते यतः ॥ १३९० ॥
तारुण्येनापि वैरूप्यं हृतं नास्य मनागपि ।
लेष्टुं वैकटिको यस्मादुत्तेजयितुमक्षमः ॥ १३९१ ॥
उलूक इव काकोलैर्लोलैः कोलाहलोल्बणैः ।
पुरि भ्राम्यन्नसौ डिम्भैः संभूय स्माभिभूयते ॥ १३९२ ॥
दुर्बलानां बलं राजकुलमित्येष चिन्तयन् ।

तत्र चेग्रानि तद्राजपुत्रकैः पीड्यते ऽभितः ॥ १३९३ ॥
खेदात्त्यक्तपुरो ऽताडि पथिकैः पथिकैर्न सः ।
ग्राम्यैर्ग्रामे विगल्लैर्यष्टिमुष्टिभिरप्यथ ॥ १३९४ ॥
इत्यसौ सर्वतः सर्वैरप्यत्यर्थं कदर्थितः ।
निश्चितं चिन्तयामास निश्वासोच्छ्वासितानन: ॥१३९५॥
धन्या धन्या मृगास्ते ऽपि पक्षिणस्ते ऽपि दक्षिणाः ।
विशन्त्यपि न ये कर्मदानवे मानवे जने ॥ १३९६ ॥
अहमप्यहने स्थाने मानवैर्यामि सर्वथा ।
इति ध्यायन्नयं क्वापि कान्तारे सत्वरं ययौ ॥ १३९७॥
त्यक्तजातिविरोधेन जातबोधेन साधुना ।
मृगवर्गेण संवर्ग्यमाणपर्यन्तभूतलः ॥ १३९८ ॥
अमुना शमिनां मध्ये सिद्धसेनो मुनीश्वरः ।
स्वाध्यायध्वनिमाधुर्यवश्यविश्वो व्यलोक्यत ॥१३९९॥
युग्मम् ॥

आगच्छागच्छ वत्स त्वमिति तं यतिनां पतिः ।
वर्णैः कर्णरुपीयूषगण्डूषैः स्वयमाह्वयत् ॥ १४०० ॥
अहो उक्तिरपूर्वास्य ध्यात्वेति पदयोर्यतेः
स निपत्य पराभूतः सुतः पितुरिवारुदत् ॥ १४०१ ॥
संभाष्य मुनिना पृष्टः संनिकृष्टकृपोदयः ।
अथाचष्ट निजं कष्टचरितं परितो ऽपि सः ॥ १४०२ ॥
अथादिश्यदर्शी साधुस्तमुद्दिश्य दयाश्रयः ।
प्रीणयन्सर्वसत्त्वानि तथ्यैकवचनं वचः ॥ १४०३ ॥
क्रियन्मात्रमिदं दुःखमत्र ते ऽस्ति नृजन्मनि ।

सहन्ते ऽमी यथान्यानो ऽनन्तं दुःखं तथा शृणु ॥१४०४॥
कषायविषयासक्तः सक्तः प्राणिवधादिषु ।
नरकं यान्ति दुःकर्म येन जन्तुर्भवान्तरे ॥ १४०५ ॥
भेदनच्छेदनोत्क्षेपणतापनादियन्त्रणैः ।
क्षेत्रजैश्च महादुःखैः पीड्यन्ते नरकेष्वमी ॥ १४०६ ॥
युग्मम् ॥
मत्स्यानिर्यग्भवो ऽप्येव अन्तरशस्त्रवधाग्निभिः ।
छिद्यन्ते ऽस्त्रवधमात्मापर्माणक्षीरानिष्पानपैः ॥१४०७॥
मनुष्यत्वे ऽपि महारोगैर्दुःस्वदारिद्र्यवियोगजैः ।
दुःखैर्दन्दह्यते जन्तुर्नानाकर्मनिबन्धनैः ॥ १४०८ ॥
किल्बिषाभियोगसाद्याधिभावाच्च देवेन्द्रसंपदः ।
पुद्देष्याविषादाजीवो देवत्वे ऽपि न सौख्यभाक् ॥१४०९॥
एवं कर्मविपाको ऽस्मिन्भवे जीवानां सर्वदा ।
लभ्यन्ते ऽल्प फलाऽपि न स्वरूपं जनैर्यतः ॥ १४१० ॥
माहात्म्यं ध्यानयोगानां सामर्थ्यं परमात्मनाम् ।
विपाकं कर्मणां वेत्ति न सर्वज्ञं विनापरः ॥ १४११ ॥
अतुं कर्मविपाकं तु शुभाशुभविशेषतः ।
एक एवाऽपि सद्धर्मः त्रिवर्गनिबन्धनम् ॥ १४१२ ॥
विनापुनः तु धर्मेण जन्तुः कर्मानुवर्तिभिः ।
पात्यते तेषु दुःखेषु येषां स्वदुःखमप्रमः ॥ १४१३ ॥
एवं वैराग्यसंवेगे बृहत्कर्मनिबन्धन कथितु ।
येन क्षिपन्ति दुःकर्मबीजं महादुःखपुष्टराम् ॥ १४१४ ॥
अथ सम्यग्दुःकर्मविपाकः संवेगं गुरुत ।
कश्चित् विरक्तो नैरत्यं परमतत्त्वसाधकः ॥ १४१५

प्रभो प्रभवति प्रायः को ऽप्युपायः स किं कश्चित् ।
येन स्याद्विपनामन्तो हन्त दुःकर्मणामपि ॥ १४१६ ॥
अथाऽप्यथान्सुधापूरसोदरीं स गुरुर्गिरम् ।
नव पत्राग्नि दुःकर्ममर्मनिर्मथनिष्ठुरम् ॥ १४१७ ॥
यत्ने सत्यपि तीव्रत्वपङ्कनिःसङ्गताभृताम् ।
निःसङ्गता नु दीक्षाया दाक्षिण्येन यदि स्थिरा ॥ १४१८॥
चेतसो निश्चलत्वेन प्राप्यते सा महाशयैः ।
कर्मदावानलज्वालाविध्यापनघनाघनः ॥ १४१९ ॥
इति श्रुत्वाथ तत्त्वार्थं सत्त्वभावसंनिधौ गुरोः ।
साग्रहः सो ऽग्रहीद्दीक्षां संमदी क्षान्तितत्परः ॥१४२०॥
सिद्धान्ताध्ययनोद्रेकाद्विवेकाञ्चितचेतनः ।
तपः कपटनिर्मुक्तमारेभे संवरो मुनिः ॥ १४२१ ॥
असौ सद्धर्मचातुर्थस्तुर्यषष्ठाष्टमैर्व्यधात् ।
तपोभारैः शरासारैर्जर्जरं कर्मपञ्जरम् ॥ १४२२ ॥
पुरिमार्धमेकभक्तं नैर्विकृत्यं च कृत्यवित् ।
आचाम्लमुपवासं च सेवमानः प्रतीन्द्रियम् ॥ १४२३ ॥
दिवसैः पञ्चविंशत्या जितेन्द्रियशिरोमणिः ।
स इन्द्रियजयं नाम तपश्चक्रे यथाविधि ॥ १४२४ ॥
युग्मम् ॥
एकभक्तं नैर्विकृत्यमाचाम्लं भक्तवर्जनम् ।
एवं पोडशभिर्वस्रैः स कषायजयं व्यधात् ॥ १४२५ ॥
निर्विकृतिकमाचाम्लमभक्तं विदधन्मुनिः ।
योगानां शुद्धये योगशुद्धिं नवादिनैर्व्यधात् ॥ १४२६ ॥
अभक्तमेकाशनकमेकसिक्थकमप्यथ ।

एकस्थानमेकदत्ति विकृत्या रहितं ततः ॥ १४२७ ॥
आचाम्लमष्टकवलमित्येकैकस्य कर्मणः ।
हते तपो व्यधादष्टकर्मसूदनमेव च ॥ १४२८ ॥
॥ युग्मम् ॥

ज्ञानस्य दर्शनस्यापि चारित्रस्य च सेवनम् ।
चक्रे निरन्तरं साधुरुपवासैस्त्रिभिस्त्रिभिः ॥ १४२९ ॥
शुभास्त्वेकादशीष्वेकादशसंख्यासु सोऽकरोत् ।
मौनोपवासकरणैः श्रुतदेवीतपः शुभम् ॥ १४३० ॥
शुक्लपक्षेऽष्टभिरुपवासैराचाम्लपारणैः ।
दिनैः षोडशभिः सोऽधात्तपः सर्वाङ्गसुन्दरम् ॥ १४३१ ॥
इत्येतत्कृष्णपक्षे तु ग्लानपालनलालसः
सोऽकार्षीद्विपद्द्वेषी नीरुक् सिद्धाभिधं तपः ॥ १४३२ ॥
मुनिर्द्वात्रिंशदाचाम्लैरेकान्तरितपारणैः ।
विदधे शुद्धबोधोऽयं तपः परमभूषणम् ॥ १४३३ ॥
अङ्गान्येकादशाप्येष पूर्वाणि च चतुर्दश ।
द्विधा चन्द्रायणं न्यूनोदरतादितपो व्यधात् ॥ १४३४ ॥
अथैका प्रतिपद् द्वे च द्वितीये तिथयोऽखिलाः ।
यावत्पञ्चदश ज्ञेयाः पूर्णमास्यो निरन्तरम् ॥ १४३५ ॥
उपवासैर्विशुद्धाः स्युर्यत्र तत्तप उज्ज्वलम् ।
व्यधायि मुनिना सर्वसौख्यसंपत्तिनायकः ॥ १४३६ ॥
॥ युग्मम् ॥

स्पृश्यो ऽपि शीलवत्या न स्त्रियोपपतिवत्पतिः ॥ २०३८ ॥
ततो विद्याधराधीशसुतावारनिवारणः ।
मामयं कामयन्नुर्वीपतिः पापाय जायते ॥ २०३९ ॥
केनाप्युपायेन न्यायेन च बलेन च ।
तद्वारं वारं आगच्छन्नागतो नेष्यते ऽपि सः ॥ २०४० ॥
इति चेतसि निश्चित्य शीललीलावती नृपम् ।
सावदद्विनयानम्रवदना सदनागतम् ॥ २०४१ ॥
कुलीना निष्कलङ्का च कनिष्ठा सा मम स्वसा ।
निरूप्यते ऽपि नो भूपरत्न किं रूपवत्यपि ॥ २०४२ ॥
धर्मो ऽप्यसौ न धर्मज्ञ नयज्ञ न नयो ऽप्ययम् ।
गोत्राचारश्च नो गोत्राचारो ऽप्ययं करोषि यम् ॥ २०४३ ॥
अथो पाणिगृहीता नो युवया युक्तिश्च पालय ।
शुद्धधर्मनयाचारविचारिषु यशः स्पृश ॥ २०४४ ॥
इति मधुनिभैर्वाचामूर्मिभिर्भाषिणो ऽभितः ।

नाङ्गीचकार तत्कर्म तद्गुणोर्मिवशो नृपः ॥ २०४५ ॥
अनन्यहृदया सेयममेयमहिमोज्ज्वला ।
दिनेनैकान्तरेणाथ महीनाथमसेवत ॥ २०४६ ॥
रुक्मिणीवारयोग्ये तु वासरे सा नरेश्वरम् ।
आयातमपि नोऽपश्यद्धर्मवश्येन चेतसा ॥ २०४७ ॥
तादृग्धर्मकथालापकलापकल्पयैव सा ।
तां क्षिपां क्षिपयत्येषा प्रत्याख्यानविधायिनी ॥ २०४८
सपत्न्यामपि वात्सल्यं सतीत्वमपि तादृशम् ।
तां प्रति क्ष्मापतिर्ध्यायन्मुहुः पुलकितोऽभवत् ॥ २०४९ ॥
प्रभावभाजनं भान्ति स्त्रियश्चारित्रदेवताः ।
यन्मनस्यमहो नासां यः करोति स पातकी ॥ २०५० ॥
वयं ध्रुवे तदेतस्याः कुर्मः कर्मेति भूपतिः ।
रुक्मिण्या अप्यदाद्वारमेकान्तरमनन्तरम् ॥ २०५१ ॥
ततः सतीनां मुख्येयं पुण्यलब्धानमन्यत ।
मद्दत्तधर्मारमगान रुक्मिणीवारवासरगान ॥ २०५२ ॥
धन्यंमन्या पुनर्मेने पतिरेनां पतिव्रता ।
यद्दिनानुक्रमेण स्वाहारद्विमानसौ ॥ २०५३ ॥
निजवारेऽपि राजेन्द्रो राजकार्यक्षणेषु सा ।
आत्मानं सकलीचक्रे शुक्लमध्येव केवलिभिः ॥ २०५४ ॥
सा धर्मरुचिना तेन पूर्णोपकरणव्रजा ।
त्रिकालं जनयामास पूजनानि जिनेशितुः ॥ २०५५ ॥
जिनाधिनाथनेत्राभिरिव द्रव्यैः गुणान्वितैः ।
सा कल्पगुरुनाभोगानग्रभोगानपि व्यधात् ॥ २०५६ ॥
यदस्तु वन्ध्यमात्रं पर्वान्द्रेषु विनीय तत् ।

भार्ता च खिन्ना च यथा दृष्टशुचिनैव सा ॥ २०५७ ॥
समस्तेर्ष्यामदोद्दामविमानविपर्ययी ।
धर्म्यस्यानि कार्याणि चकार न चकार वा ॥ २०५८ ॥
इति शीले च दाने च भवन्ती सा निदर्शनम् ।
दूरतो ऽपि पवनेव मुनयो[illegible] ॥ २०५९ ॥
सर्वाभिः शोभिनः स्थाप्या गुणपक्षाद्यपादिभिः ।
तेषु धर्मेषु सम्बन्धं सत्या धर्मविधायिनी ॥ २०६० ॥
तथा चिन्तयन्नेव न धैर्ये मनसा भूभिः ।
तद्दामनन्तर तेनापि भावेव भगिनीव सा ॥ २०६१ ॥
स तस्यास्तस्य सा धर्मविदो यावद् यथाक्रमः ।
दृष्टिविभ्रमतुल्येव चिरकाले कदाचन ॥ २०६२ ॥
इमे धर्मे स्थिरे शुद्धाधर्मेव दमनी सती ।
स्वधारत्रमपे तेन रविमणा पाण्डुरेण ॥ २०६३ ॥
रविमणी तु सदा [illegible] यथा भव्या तपस्यायाः ।
[illegible] क्षणरात्रवणि [illegible] ॥ २०६४ ॥
सा [illegible] दर्शितानिव तावत् ।
[illegible] एतं च [illegible] विनयाय स्थितम् ॥ २०६५ ॥
रविमणीपार्श्वतो [illegible] ।
दृष्ट्वा धर्मार्थं [illegible] ॥ २०६६ ॥
[illegible] धर्माधावे [illegible] ।
[illegible] पुराय ॥ २०६७ ॥

॥ युग्मम् ॥

[illegible] ।
[illegible] ॥ २०६८

तासां मुखे विकारं स वीक्ष्य व्याचष्ट विस्मितः ।
किं व्यलोकि कश्चिद्धर्मकोपो धर्मरुचेरपि ॥ २०६९ ॥
ततः सस्मितमैक्षन्त तद्वयस्याः परस्परम् ।
किंचिद्विहसन्त इव सणकम्पोत्तराधराः ॥ २०७० ॥
एका तासु जगौ ज्ञाना धर्मे धर्मरुचे रुचिः ।
यत्ते पट्टमहादेवीं व्यतिपेपि भगिनीं जने ॥ २०७१ ॥
विजने त्विति जल्पन्ती रुक्मिण्या भङ्गुरभ्रुवा ।
भ्रमयन्त्या दृशौ मौक्तिककम्पेन न्यषेधि सा ॥ २०७२ ॥
अर्थोत्तथनदभिनायं आनन्दराजा तु संजगौ ।
धिक्तत्र दोषमथनं धिगर्के लक्ष्मपातनम् ॥ २०७३ ॥
मता गुणो ऽपि दोषत्वं प्रयात्यसहने जने ।
गुणाकरेणापि रुचिप्रकारे रमनायते ॥ २०७४ ॥
अथाह रुक्मिणी कोपकषिशोद्भ्रान्तलोचना ।
सत्या यो यत्र लीनः स शोभाप्तैवेति लोकवाक् ॥ २०७५ ॥
अप्राप्ता हन्त दोषो ऽपि गुणः स्यात्प्रिये जने ।
अन्धकारो ऽपि पङ्के हि चारुत्वाय ककारिणाम् ॥ २०७६ ॥
यदुक्तमनया मर्मस्पर्शं दर्शयामि ते ।
मन्येऽपि न स्यात्तीव्रतापकुमारिकेश्वरक ॥ २०७७ ॥
तुलया यत्र धर्मेऽपि तत्र मन्येऽपि कः सुधीः ।
तं वीक्ष्य पुष्पिताः सर्वाभिरूपमार्गे न पतिः कः ॥ २०७८ ॥
तथापि तत्र मन्यतां हृदये यदि दुर्नयम् ।
तद्विचारं किमप्यत्र दर्शयिष्यामि वो मते ॥ २०७९ ॥
पद्मसूत्रवर्ति सौगन्धिकमोद्गिरद्रसाजिते ।
मार्गं गच्छन्ति मे ऽत्र दर्शयामीति गायत्र ॥ २०८० ॥
॥ त्रिभिर्विशेषकम् ॥

इतश्च पश्चिमामौलिमणीभूते विभावसौ ।
भेजे पट्टमहादेवी जिनपूजनसज्जताम् ॥ २०८१ ॥
सा धर्मरुचिसंक्लृप्तसर्वोपकरणक्रमाम् ।
पूजां तृतीयकालार्हामर्हति व्यतनोत्ततः ॥ २०८२ ॥
पूजां समाप्य तीर्थेशशेषाकुसुममालया ।
धम्मिल्लं धर्मरुचिना साथ मूर्ध्न्यबन्धयत् ॥ २०८३ ॥
देवीमूर्धनि धम्मिल्लवैचित्र्यं रचयत्स्वयम् ।
सायं नृपाय रुक्मिण्या जालद्वारेण दर्शितः ॥ २०८४ ॥
षण्डे ऽथ कोपचण्डाले विवेकद्विपखण्डिनि ।
रक्तरुच्छटाभिरिव दृग्युगलं पाटलं दधत् ॥ २०८५ ॥
नृपः कृपाणीमाकृष्य प्रविश्यान्तर्निकेतनम् ।
धम्मिल्लमच्छिनद्देव्यास्तौ च धर्मरुचेः करौ ॥ २०८६ ॥
॥ युग्मम् ॥
रे रे सतीत्वधर्मित्वच्छद्मना मम सद्मनि ।
धिक्कारि विकारो ऽयमिति जल्पंश्च निर्घृणी ॥ २०८७ ॥
कोपाग्निं चाटुपीयूषै रुक्मिणी शमयन्त्यथ ।
निनाय नायकं तं स्वे सद्मनि च्छद्मनिर्मिता ॥ २०८८ ॥
ततः कलावती दध्यौ दुःखनीरधिदीर्घिका ।
धिग्धिग्वपुषा कृतं कर्म कथं परिणतिं गतम् ॥ २०८९ ॥
तन्वे मुदे शिरश्छेदा यच्छिन्ना दुरितपुनः ।
प्रतम्य मुक्तिद्वारस्य पिधानकृतिनौ मतौ ॥ २०९० ॥
जिनाङ्घ्रिनखविद्योतविमलं मलिनीकृतम् ।
कुलं मृषाकलङ्केन यदुःखाय गतेव मे ॥ २०९१ ॥
हा हा धिग्धिग्जिनाधीशपदद्वन्द्वार्चनोचितौ ।

धर्मामृतसरोम्भोजरुचौ धर्मरुचेः करौ ॥ २०९२ ॥
तस्य शासनदेवीनां पश्यन्तीनामपि क्षणात् ।
उद्दामसामर्थ्यभृता दुःकर्मकरिणा हतौ ॥ २०९३ ॥ युग्मम् ॥
नेन्द्रो ऽपि कर्मभ्यो बलीत्यशोचन्नरविच्युतिम् ।
पश्यन्पञ्चनमस्कारध्यानो धर्मरुचिस्तत्त्वभृत् ॥ २०९४ ॥
गृहगर्भे ऽतिगुप्तानि दुःखश्यामैर्मुखांशुभिः ।
तमीतमांसि पुष्णन्ती सा तु तापवती सती ॥ २०९५ ॥
किं करोमीति चिन्तार्ता पुरो ऽकस्मात्परिस्फुरत् ।
मार्तण्डमण्डलमिव द्युतिमण्डलमैक्षत ॥ २०९६ ॥ युग्मम् ॥
किमेतदिति संभ्रान्तां नृपकान्तामथावदत् ।
प्रभागर्भगता कापि स्त्री दिव्याकारधारिणी ॥ २०९७ ॥
नाम्ना पद्मवती तीर्थेशितुः शासनदेवताम् ।
तद्भक्तभक्तां जानीहि मां हिमांशुसमानने ॥ २०९८ ॥
ये जिनेन्द्ररतास्तेषां पुण्यश्रीरिव संनिधिम् ।
न मुञ्चे दुरितानीव व्यसनानि निरासितुम् ॥ २०९९ ॥
मयि मत्वां नेत्रद्वयस्याभिविद्धं न विडम्बनम् ।
मया नु सोढुमिच्छन्त्या शासनस्य प्रभावनाम् ॥ २१०० ॥
धर्मप्रभावनाम्भोभिः कलङ्कः पङ्कवत्तव ।
इदानीं शाल्मलीपो ऽपयशःक्षालननिर्मले ॥ २१०१ ॥ युग्मम् ॥
तस्या इत्यालपित्युक्त्या हत्वा देवी तिरो ऽभवत् ।
भूमेर्ग्रीष्मजतृष्णार्णं वृष्ट्येव जलदावलिः ॥ २१०२ ॥
पतिरोमप्रभवलसत्कुम्भोमसिविनिर्यती ।
अनिंगत्कांम्यही कारिमादेनथापृष्टिमाविभोः ॥ २१०३ ॥
पराक्रमकशतो ऽयं यादृ मीनैलनीयत ।

एवं जीवितं तथाप्यल्पं मेने दुःश्रवनं नृपः ॥ २१०४ ॥
तस्यान्तों ऽन्तर्विशन्तीभिर्व्यथ्यमान इवार्तिभिः ।
मन्द्रैर्यः कण्ठकूल्यानि कम्पन्नूप्रेण निर्ययौ ॥ २१०५ ॥
स्वयं मुखेन मोहेनो राज्ञः शब्दः स दूनवत् ।
दूरीरत्नो ऽपि मनिरानादपलवधिनव्ययः ॥ २१०६ ॥
विश्रुतर्थकं वेधा मन्त्रवादं च मान्त्रिकाः ।
यथा यथास्य पृथ्वीन्दोर्व्याधिपापुष्यतया तथा ॥ २१०७ ॥
अष्टतपाऽशिवादिकमपाक्लयनभूतया ।
आकुल्यभूदय स्मापव्ययया व्यथितो जनः ॥ २१०८ ॥
न शय्यायां न च क्ष्मायां न हिमैरहिमैर्न च ।
स न मृष्ठाय चामृष्ठाधिर्गति नृपतिर्यया ॥ २१०९ ॥
अनैरसाध्ये रोगे ऽस्मिन्देवार्तिकचन दैवतम् ।
स्याति यथापरं किंचित्तज्जीवाति महीपतिः ॥ २११० ॥
इत्यादिव्याधितं पूर्वमपूर्वकृन्तनिना जनम् ।
सावधानं निशायामुद्घोषान्न्यरमरस्वती ॥ २१११ ॥ युग्मम्
कस्याथन जिनस्वामिभक्तिकेनतचेतसः ।
सतीजननमस्यायाः केशस्नपनवारिभिः ॥ २११२ ॥
जिनार्चकस्य कस्यापि कुमारब्रह्मचारिणः ।
हस्तांतः स्नपयित्वास्तलं कृत्त भूमुनम् ॥ २११३ ॥
॥ युग्मम् ॥

श्रुत्वेति सचिवैः पौरैरानीतः पुरविश्रुतः ।
अर्हद्भक्तः सतीवर्गो गणश्च ब्रह्मचारिणाम् ॥ २११४ ॥
तस्मिन्कर्मणि राज्ञो ऽथ कार्यमाणे क्रमेण तैः ।
प्रत्येकं नरकक्रीडाकारी पीडा व्यवर्धत ॥ २११५ ॥

अथाह भूपः पीडाया मूर्तैरवयवैरिव ।
दीनमन्दाक्षुरैर्वर्णैः पीडयद्भिः परिच्छदम् ॥ २११६ ॥
उपचारचयैरेभिः शमाय भयितव्ययया ।
वर्धते मत्युनैवासौ लोभो लाभवतामिव ॥ २११७ ॥
तद्देयमेव स्यातव्यं यन्ननिष्पन्नयाधुना ।
असावस्थमियं पीडा कीदृशः किं भवेदिति ॥ २११८ ॥
उदासे जिनदासेन वागयो हृद्यमन्त्रिणा ।
स्वजल्पः क्वापि नासत्यः सत्यस्तु भुवि दुर्लभाः ॥२११९॥
पुनस्ताश्चिन्तयामीति क्षणं स्तब्धीकृताकृतिः ।
अभिनीय स्मृतिं चैव सचिवः मोचिवान्नृपम् ॥ २१२० ॥
महासती महादेवी जिनधर्मधुरंधरा ।
कुमारब्रह्मचारी च स धर्मदमितस्मरः ॥ २१२१ ॥
तयोर्दृढगुणोपेतस्तत्कृपाम्भोकलने यदि ।
सा भिक्षा राजगतयोः कामधुक्कल्पवृक्षयोः ॥ २१२२ ॥
अथ व्यथावशो ह्यूचे हा महासत्त्वो नृपः ।
तयोर्मन्त्रिन् कृथा मनं भिवां स्वितुनयोः कथाम् ॥ २१२३ ॥
इति श्रुत्वा बहिर्निर्गत्या वीक्ष्य कुमारकम् ।
प्रत्यान्तः पाणिना दीनं स्पृष्ट्वा च सचिवो ऽब्रवीत् ॥ २१२४ ॥
विधुः गुणागमो ज्यापि दुरम्पयापि पावकः ।
तत्कार्यं भावये गोप शुद्ध्यर्थीर्वत् तयोः ॥ २१२५ ॥
सर्वसाम्यपूर्निवाहं मर्यादनपरिप्लुतम् ।
उच्चैन भीरुग्येण नीरोगं स्यां क्षणमात्रयात् ॥ २१२६ ॥
रामान्मूर्खाय किं वर्ध्य यमया दीनरूपा ।
देव्याः देवोपनः कृत्यः कृती धर्मतयेः करी ॥ २१२७ ॥

उवाच सचिवो ऽप्युच्चैर्महाराज किं कृतम् ।
तयोर्मुधासि शापेन पापे ऽस्मिन्पतितो ध्रुवम् ॥२१२८॥
तदस्याः स्नानपानीयमुपानीय तथाप्यहम् ।
त्वां पर्यस्तविपाणिभ्यामुभाभ्यामपि सेचये ॥ २१२९॥
इत्युक्त्वा त्वरितं गत्वा दीर्घदुःखोर्मिकल्पिताम् ।
स महाराज्ञीमाचष्ट मन्त्री मधुरया गिरा ॥ २१३० ॥
त्वद्विडम्बनपापेन देवि पापे ऽपतन्नृपः ।
अस्तु त्वदीयस्नानाम्बुस्पर्शपुण्येन निर्मलः ॥ २१३१ ॥
इति क्षितिपतिश्रेयःशुश्रूषुः सुमहागुणः ।
कुम्भः पिधेय स्नानाय देव्या मन्त्री शिरोजलम् ॥२१३२॥
यावद्धर्तुं स मान्यस्तावदस्मिन्नपैक्षत ।
पूर्णमुखं च धम्मिल्लं रत्नोर्म्यां तस्य बिम्बवत् ॥ २१३३ ॥
॥ युग्मम् ॥
अहो शीलमहो शीलमिदं देवि तवाद्भुतम् ।
कृष्णा अपि केशपाशाः स्नानेनात्मनि पुनर्नवाः ॥२१३४॥
इति स्तुतिं प्रजल्पन्देव्याः केशान्प्रक्षाल्य तज्जलम् ।
स्वर्णकुम्भद्वयमादाय सो ऽगाद्धर्षसञ्चैः पुरः ॥ २१३५ ॥
असनाथेव गत्यापि मन्त्री हस्तौ व्यलोकयत् ।
निर्भिन्नारुणवर्णौ मांसदर्शौ च तयोरधः ॥ २१३६ ॥
अहो ते महापारित्वमहो ते निर्मलं तपः ।
यत्पुण्यामृतसेकेन मम कान्तिमितौ करौ ॥ २१३७ ॥
स्नपयाम्यु स्वपाणिभ्यां देवीमाद्य [illegible] ।
स्वकामद्रुमहानोन्यपपर्व निर्मि [illegible] २१३८ ॥
इत्युक्तः सो ऽष्टम्याघसल्पूर्व

अथाह भूपः पीडाया मूर्तैरत्ययवैरिव ।
दीनमन्दानुरैर्वर्णैः पीडयद्भिः परिच्छदम् ॥ २११६ ॥
उपचारचयैरेभिः शमाय प्रथितैर्व्यथा ।
वर्धते प्रत्युतैवासौ लोभो लाभवतामिव ॥ २११७ ॥
तदेवमेव स्यातव्यं यद्भविष्यतयाधुना ।
असावहमियं पीडा क्रीडावः किं भवेदिति ॥ २११८ ॥
उदासे जिनदासेन वाग्वयों वृद्धमन्त्रिणा ।
स्वजल्पः क्वापि नासत्यः सत्यस्तु भुवि दुर्लभाः ॥२११९॥
पुनस्ताश्चिन्तयामीति क्षणं स्तब्धीकृताकृतिः ।
अभिनीय स्मृतिं चैष सचिवः प्रोचिवान्नृपम् ॥ २१२० ॥
महासती महादेवी जिनधर्मधुरंधरा ।
कुमारब्रह्मचारी च स धर्मरुचिरुत्तकः ॥ २१२१ ॥
तयोर्गृहत्सुपोर्यत्रस्तद्गुणालोकनं बहिः ।
सा भिक्षा सम्रगतयोः कामधुकल्पवृक्षयोः ॥ २१२२ ॥
अथ व्यथावशो ऽप्यूचे हा सहासमुखो नृपः ।
तयोर्मन्त्रिन्कृथा मैवं मिथो विप्लुतयोः कथाम् ॥ २१२३॥
इति श्रुत्वा बहिर्गेहाद्गत्वा वीक्ष्य सुधाकरम् ।
एत्यान्तः पाणिना दीर्घं स्पृष्ट्वा च सचिवो ऽब्रवीत्॥२१२४॥
विधुः सुधामयो ऽद्यापि दहत्यद्यापि पावकः ।
तत्कथं भाषसे गोप शुद्धयोर्विप्लवं तयोः ॥ २१२५ ॥
दर्शयाम्यधुनैवाहं तयोर्ब्रतमविप्लुतम् ।
एतेन नीरयोगेन नीरोगं त्वां सृजअवान् ॥ २१२६ ॥
राजाप्युवाच किं रथ्यं यन्मया दोषशङ्कया ।
देव्याः केशोक्षयः कृतः कृपौ धर्मरुचेः करौ ॥२१२७॥

उवाच सचिवो ऽप्युच्चैर्महाराज किं कृतम् ।
तयोर्मृत्युर्यास्ति शापेन पापे अस्मिन्पतितो ध्रुवम् ॥२१२८॥
तत्तस्याः स्नानपानीयमुपानीय यथाविधम् ।
त्वां पर्यन्तनिपाणिभ्यामूर्ध्वाभ्यामपि सेचये ॥२१२९॥
इत्युक्त्वा त्वरितं गत्वा दीर्घदुःखौघविह्वलाम् ।
स महाराज्ञीमाचष्ट मन्त्री मधुरया गिरा ॥ २१३० ॥
त्वद्विलम्बनपापेन देवि ताते ऽपमृतः ।
अस्तु त्वदीयस्नानाम्बुस्पर्शपुण्येन निर्व्यथः ॥ २१३१ ॥
इति शिविधनिश्शेषधुनिपुण्यमहाम्बुधः ।
पुण्याः पिबेव स्नानाय देव्या मन्त्री शिरोऽम्बुजम् ॥२१३२॥
यावदर्पये न मान्यपापादुन्मिलितेक्षण ।
पूर्वेष्टुतं च पश्मिलं तल्लोर्व्या तस्य विस्मयत् ॥ २१३३ ॥
॥ युग्मम् ॥
अहो शीलमहो शीलमिदं देवि तवाद्भुतम् ।
कृतो ऽपि वैश्रवणः शापेनार्जित पुनर्मतिः ॥२१३४॥
इति स्तुतिं राजदेव्याः केशाम्भःशाल्यसज्जलम् ।
स्वर्णकुम्भस्थमादाय सो ऽगाद्दम्पत्योः पुरः ॥ २१३५ ॥
अमृतावेव तत्रापि मन्त्री हस्तौ व्यलोकयत् ।
निर्भिन्नारुणपद्माभौ पादहस्तौ च तयोस्तवः ॥ २१३६ ॥
अहो ते ब्रह्मचारिन्महो ते निर्मलं तपः ।
यत्पुण्यादुल्मकेन ततः कन्दर्पिणौ वरौ ॥ २१३७ ॥
स्नपयाशु स्वपाणिभ्यां देवीजालमनैर्नृपम् ।
स्वकल्पद्रुमदानोत्थयशो निर्मलय द्रुतम् ॥ २१३८ ॥
इत्युक्तः सो ऽप्यम्बुपात्रकुम्भे पर्यादिशत् ।

देवनातिशयप्रातिहार्याभिकुम्भमलं तदा ॥ २१३९ ॥
अभ्रच्छत्रं निराधारं चारुचामरवीजनम् ।
पुष्पवृष्टिर्जयारावो गगने दुन्दुभिध्वनिः ॥२१४० ॥युग्मम्॥
इत्थं महोत्सवैर्गत्वा तैर्मलचिरम्बुभिः ।
असिञ्चद्रुक्मिणीं चन्द्रः किरणैरिव कैरवम् ॥ २१४१ ॥
तेनाम्बुना पयो मेघाद्भूत इव स्तम्भरः ।
सद्यः पत्रमहोल्लासालिङ्गालिङ्गितास्ततः ॥ २१४२ ॥
सपरिग्रचमत्कारवीचीनिचयलीलया ।
चिरं लोकमुखाम्भोजः सो ऽजनिष्ट जनेश्वरः ॥ २१४३ ॥
समायित्न, समागीशो धीमान्धर्मरुचि स्ततः ।
तां च क्षमयितुं देवीं स रुक्मिण्या समं ययौ ॥ २१४४
सर्वं मम क्षमस्वेति पाणिलग्ने महीभुजि ।
देव्याः पदद्वये लग्ना रुक्मिणी बाष्पलग्नमणी ॥२१४५॥
यदंति पाणिग्रहणे हारितान्यत्स्पतिर्मया ।
तन्मन्तुमुक्ताद्रूपादर्शि व्योमपुदनं च यत् ॥ २१४६ ॥
अनुकम्पय वात्सल्यं विश्रान्त्या मयि सर्वदा ।
मुधा कल्पद्रुमत्याच यले ऽकारि विडम्बनम् ॥ २१४७ ॥
विभिर्यं यद्य ते ध्यातं नित्यं दुःखितया मया ।
तन्मम क्षम्यतां सर्वं क्षमावति महासति ॥ २१४८ ॥
॥ त्रिभिर्विशेषकम् ॥
सन्तुष्टदर्शनम्भाह देवी किं मे त्वया कृतम् ।
सर्वः पूर्वकृतानां हि कर्मणां भवेत फलम् ॥ २१४९ ॥
अथ बाहुद्भुता देवी मानुषाणां नृपो ऽवदत् ।
अहं ते मूर्तिमन्नतं येनेदं दर्शितं फलम् ॥ २१५० ॥

सपत्नीमत्सराधन्के वक्रतां रुक्मिणी वरम् ।
प्रिया प्रियेण मयका यदग्धासि हतो ऽस्मि तत् ॥ २१५१ ॥
निःकृत्रिमप्रेमवती सती हृदयवल्लभा ।
कथं मया चिराद्दृष्टासि प्रियमा धर्मबहिर्मुखम् ॥ २१५२ ॥
तस्य प्रेमानुबन्धस्य कीदृगाचरितं मया ।
अश्रोतव्यचरित्रो ऽहमद्रष्टव्यमुखो ऽस्मि तत् ॥ २१५३ ॥
एवं जल्पन्त्यपि स्वापे सा नैवोर्ध्वं शिरो ऽकरोत् ।
प्रियापमानसम्भारभारितेव कलावती ॥ २१५४ ॥
ततश्चन्द्रोदरश्चक्रे चित्ते चिन्तामचञ्चले ।
यः स्यादस्या मयि क्रोधः सो ऽल्पः कारणमानतः ॥२१५५॥
तत्प्रसत्तिं प्रिया केनोपायेनासौ विधास्यति ।
यद्वा का मम चिन्तास्याः स्वं तावच्चिन्तयामि न ॥२१५६॥
ममाप्रसत्तेरेषाभूदप्रसन्नाधुना ध्रुवम् ।
स्वयं दाहस्वरूपो ऽग्निर्दहतीन्धनमन्तिके ॥ २१५७ ॥
तत्किमात्मन्प्रसन्नत्वं न त्वं धत्से सदा हृदि ।
यतः प्रसन्ने त्वय्येव प्रसन्नमखिलं जगत् ॥ २१५८ ॥
न चिन्तयसि चिद्रूप यदि त्वं हितमात्मनः ।
ततस्ते को ऽस्ति यः पीडां धृत्वा तत्क्षययिष्यति ॥२१५९॥
त्वमेकः कर्मणां कर्ता भोक्तैकस्तत्फलस्य च ।
अन्ये संयोगजाः सर्वे भावाः कर्मविनिर्मिताः ॥ २१६० ।
मातृपुत्रपितृभ्रातृकलत्रस्वजनादयः ।
सर्वे स्वार्थाय ताम्यन्ति त्वदर्थाय न कश्चन ॥ २१६१ ॥
सर्वभूतहिता या तु सद्गुरोर्धर्मदेशना ।
संसारव्यवहाराधिबाधे त्वयि न सा स्थिता ॥ २१

तदावेद्य वेदय मयान्तं लप्स्यसे कथम् ।
त्वमद्यापि कियत्कर्मा किंस्वरूपः किमुद्यमः ॥ २१६३ ॥
इति चिन्तयतस्तस्य महासत्त्वोज्ज्वलभावनाम् ।
निरूढे चेतने चित्तं चिरं वैराग्यरञ्जितः ॥ २१६४ ॥
यथा यथा स्थिरं चित्तं ज्योतीरूपे ऽस्य चेतने ।
तथा तथागाद्विलयमातपे करको यथा ॥ २१६५ ॥
निर्मले मनसि क्षीणेष्वभितो घातिकर्मसु ।
दग्धरज्जुसमानेषु भवोपग्राहिकर्मसु ॥ २१६६ ॥
सद्ध्यानामृतसिक्ताया भावनाम्रलतेः फलम् ।
चन्द्रोदरो ऽनीतान्तः केवलज्ञानमासदत् ॥ २१६७ ॥
॥ युग्मम् ॥

ततः कृते महोत्साहे पुष्पवृष्टिपुरःसरम् ।
समावन्त्या निर्मिते च मुनिनोपे यथाविधि ॥ २१६८ ॥
कथावन्त्या धर्मकर्मजिनशासनमन्त्रिणः ।
कृत्वा दीक्षां विहृत्योर्व्यां कृत्वा भव्यविकासनम् ॥ २१६९ ॥
विधायानशनं मासपर्यन्ते पुण्यमूर्तके ।
देहं त्यक्त्वा ययौ मुक्तिं चन्द्रोदरमहामुनिः ॥ २१७० ॥
विशेषकम् ॥

दानधर्मारतसंसक्तो ऽपि चिरं पुमान् ।
चन्द्रोदरवदाप्नोति भावनायाः प्रभावतः ॥ २१७१ ॥

इति भावनायां चन्द्रोदरकथानकम् ॥

तं चिद्रूपस्वरूपं धर्मं सम्यग्विमृश्य सः ।
अथ पद्मोत्तरो राजा व्याजहार मुनीश्वरम् ॥ २१७२ ॥
धर्मेश धन्य एवास्मि यस्य भाग्यैरुपैर्भवान् ।
धर्ममीदृशमाचख्यौ मोक्षसौख्यैककारणम् ॥ २१७३ ॥
मयेतमपि चमत्कारं विचारस्त्वत्कृतो ऽकृत ।
स्वामिन्नेकस्तु संदेहः मदीये स्फुरते हृदि ॥ २१७४ ॥
यतो हि श्रूयते सद्भिर्भेत्तुं दुःकर्मणां गणम् ।
ध्यानतः केवलज्ञाने संयमे किं फलं प्रभो ॥ २१७५ ॥
आलोकाय गृहे लोका दीपयन्ति हि दीपकम् ।
स चेदंशुमतो जातः किं कार्यं तेन वर्तिने ॥ २१७६ ॥
ततः सद्गुणं प्राह पृथ्वीनाथाधिपं मुनिः ।
उक्तं युक्तं त्वया राजन्किं तु तत्कारणं शृणु ॥ २१७७ ॥
गोभर्द्धनैरनैव सद्गुणो ऽपि प्रणश्यते ।
अलंकृतनृपश्रीस्तु वन्द्यते सकलैर्नृभिः ॥ २१७८ ॥
एवं न केवलज्ञानी पूज्यो मन्यते जनैः ।
गृहीतचारुचारित्रः शक्रैरपि स पूज्यते ॥ २१७९ ॥
अतो दिशन्ति चारित्रं केवलज्ञानतो ऽधिकम् ।
तस्मिंल्लब्धे ऽपि तत्पूर्णं येन पालयन्ति धीधनाः ॥२१८०॥
एवं निशम्य सम्यक्तत्त्वधारी गुरोर्गिरम् ।
अप्रमत्ते स्थिरे चित्ते पदे स्मेति नृपस्तदा ॥ २१८१ ॥
आचख्यौ चतुरो धर्माऽभीमान्यानेषु मे गुरुः ।
संपूर्णमेकमप्येषु न कर्तुमस्मीश्वरः ॥ २१८२ ॥
पात्रे संघे ऽनुकम्प्ये च देवे दानादिभिः स्थितिः ।
महाग्रहवशा रागो मम दानं न दृश्यते ॥ २१८३ ॥

विपर्यायचलचित्तस्य मिथ्यायामवनीपतेः ।
क मे सर्वोत्तमं शीलमजिह्मब्रह्मजीवितम् ॥ २१८४ ॥
उपवासकृतात्रासमङ्गभङ्गकरं तपः ।
धरोद्धरणधुर्यस्य धवलस्येव मे कुतः ॥ २१८५ ॥
निरन्तरचरचिन्ताचान्तस्वान्तस्य सर्वतः ।
मम संयमलीलाया भावनायाः कथा कुतः ॥ २१८६ ॥
यदि राज्यं परित्यज्य द्रुतं गृह्णे महाव्रतम् ।
शुद्धं चतुर्विधं धर्मं कर्तुं स्यां तदहं क्षमः ॥ २१८७ ॥
एवमुद्वेलसंवेगः संभार्य पृथार्यमा ।
स व्यजिज्ञपदिष्टार्थदायकं मुनिनायकम् ॥ २१८८ ॥
भगो ज्ञानवभाधीश धर्मोद्धरणकारणम् ।
अतुल्यं भावनावात्सल्यमिवादिष्टं त्वयाखिलम् ॥ २१८९ ॥
आनृण्यं पुण्यवाल्लोके भजेयमुपकारतः ।
भवभ्रमभिदस्तावोपदेशस्य न ते पुनः ॥ २१९०
भवशोकतापितस्येव सुधाधाराभिषेचनम् ।
दारिद्र्यादुःस्थितस्येव चिन्तारत्नोपलम्भनम् ॥ २१९१ ॥
महान्धकारविवरविष्टस्येव दीपिका ।
पयोधिमध्यनिःक्षिप्तस्येव संतरणं वरम् ॥ २१९२ ॥
विकटाटविकागर्भभ्रष्टस्येवेष्टमार्गपः ।
अन्धारकूपनिमग्नस्योद्धरणयष्टिका ॥ २१९३ ॥
अनन्तगन्धनिर्भ्रान्तिभ्रान्तदान्तस्य मे ऽधुना ।
बभूव मुक्तिमार्गे भवने तव दर्शनम् ॥ २१९४ ॥
चतुर्भिः कलापकम् ॥

इतो विज्ञप्तिनीरज्ञ श्रीमज्जिनवीनया ।

मम निर्ममनाथ त्वं दीक्षयानुग्रहं कुरु ॥ २१९५ ॥
पुत्रं निवेश्य राज्ये ऽस्मिन्यावदायाम्यहं पुनः ।
समवसार्दः प्रभो पादैः स्थेयं तावदिहैव हि ॥ २१९६ ॥
सद्गुरूनिति विज्ञप्य प्रविश्य नगरं नृपः ।
राज्ये धनोत्तरं नाम पुत्रमस्थापयच्छुभे ॥ २१९७ ॥
मर्त्यान्विमोच्य काराभ्यो निखिलान्मयशृङ्खलान् ।
क्रीडामृगांश्च पाशेभ्यः पञ्जरेभ्यः पतत्त्रिणः ॥ २१९८ ॥
चतुर्वर्णं व्यवस्थाप्य कृतस्नानविलेपनः ।
बन्दिभिर्वर्ण्यमानोऽयं गीयमानगुणो जनैः ॥ २१९९ ॥
तूर्यनादैर्भेरीभाङ्कारैः पूरयन्नभः ।
चलन्नभ्यर्थयन्देशान्ददानो दानमद्भुतम् ॥ २२०० ॥
भर्तृमार्गानुसारिण्यो धन्या एताः क्षिताविति ।
श्लाघ्याभिः स्वजनैरन्तःपुरीभिः शोभितो ऽभितः ॥२२०१॥
धनार्थिभिर्दीनो भूपैरन्वितो नवभूभुजा ।
पचाल्लीदारशृङ्गारः सारकुञ्जरवाहनः ॥ २२०२ ॥
अस्मान्मुक्त्वा ह हा स्वामी व्रतायैव व्रजेदिति ।
दुःखार्तैर्वीक्षितः पौरैः क्ष्मापः प्राप वनान्तिकम् ॥२२०३॥
पञ्चभिः कुलकम् ॥
मुक्त्वा हस्तिपरिस्पन्दं त्यक्त्वा छत्रं सचामरम् ।
अनुयातां सरद्धाष्पां क्षमयित्वा प्रजां निजाम् ॥ २२०४
इदं ते ऽङ्गं कथं वत्स व्रतकष्टं सहिष्यते ।
[illegible] २२०५
[illegible] ॥
त्रिभिर्विशेषकम् ॥

राज्यतन्त्रं परित्यज्य दक्षः पक्षीव पञ्जरम् ।
आत्मारामाभिरामां स दीक्षां शिश्रिये मुदा ॥२२०७॥
कृतकेशोद्धृतिर्नत्वा वज्रनाभगुरुं तदा ।
छत्रीभूते गुरोः पाणौ पपाठेति समाहितः ॥ २२०८ ॥
करोमि भगवन्नेतं सामायिकमिह व्रतम् ।
सर्वं सावद्ययोगं प्रत्याख्यामि ध्रुवं त्रिधा ॥२२०९॥
तदा केवलिने राजमुनि नानम्य भक्तितः ।
साधुभिः समं राज्ञा सर्वो लोकः पुरे ऽगमत् ॥ २२१० ॥
[illegible] ।
[illegible] ॥ २२११ ॥
[illegible] ।
[illegible] ॥ २२१२ ॥
[illegible] ।
[illegible] ॥ २२१३ ॥
[illegible] ।
[illegible] ॥ २२१४ ॥
[illegible] ॥

[illegible] ।
[illegible] ॥ २२१५ ॥
[illegible] ।
[illegible] ॥ २२१६ ॥
[illegible] ।
[illegible] ॥ २२१७ ॥
[illegible] ॥

शुद्धश्रद्धानिधिः साधुर्विंशतिस्थानकान्यथ ।
संस्पृश्यार्जयामास तीर्थकृन्नामकर्म सः ॥ २२१८ ॥
तथाहि ।
सर्वज्ञे सर्वजन्तूनां बन्धौ श्रेयोऽध्वदर्शिनि ।
नमनं स्तवनं पूजानुपोऽसमसौ व्यधात् ॥ २२१९ ॥
क्षीणकर्मसु लोकाग्रस्थितेषु स्थिरमानसः ।
अयं ध्यानविधानेन सिद्धेष्वाराधनां दधौ ॥ २२२० ॥
श्रीसङ्घरूपे सिद्धान्तरूपे प्रवचने मुनिः ।
आशातनानिरूपणैष स्वशक्त्या भक्तिमानभूत् ॥ २२२१ ॥
अयं महाव्रताधारे शुद्धधर्मोपदेशिनि ।
आदेशवश्यविश्वत्वादर्चां व्यधत्त सद्गुरौ ॥ २२२२ ॥
समवायाङ्गविज्ञेषु वयोव्रतपरेष्वपि ।
स्थविरेषु स्थिरात्मैष भक्तिं भेजे भवच्छिदे ॥ २२२३ ॥
श्रेयान्सूत्रधरादर्थधरः सूत्रार्थभृद्घनः ।
इति क्रमात्प्रयाद्भक्तिं कृती श्रुतधरेष्वसौ ॥ २२२४ ॥
तपस्वीयं विचित्रेषु तपस्विषु तपोनिधिः ।
शुश्रूषामेष निःशेषां शुद्धश्रद्धापरोऽकरोत् ॥ २२२५ ॥
पठने गुणने अर्थे च सिद्धान्तस्य मुहुर्मुहुः ।
चिरं तदेकचित्तत्वादुपयोगमयं दधौ ॥ २२२६ ॥
सर्वज्ञधर्मसर्वस्वे सिद्धिसौधविधायिनि ।
अयं विरचयामास सम्यक्त्वे निश्चलं मनः ॥ २२२७ ॥
ज्ञानस्य ज्ञानपात्रस्य विनये गुणशालिनि ।
नातिचारं चकारायमन्तरायं शिवश्रियः ॥ २२२८ ॥
भवकूपारपारेषु व्यापारेषु व्रताधियाम् ।

रागद्वेषमदान्धेन ये अर्दिताः क्षमयामि तान् २२५३ ॥
अपराधं क्षमन्तां मे ते अपि सर्वत्र जन्तवः ।
सर्वभूतेषु मे मैत्र्यमास्तां वैरं न कुत्रचित् ॥ २२५४ ॥
महाव्रतेषु यः कश्चिदतीचारः कृतो मया ।
मिथ्या मे दुष्कृतं तत्र भवतादृरुसाक्षिकम् ॥ २२५५ ॥
राशावव्यवहाराख्ये अनन्तजन्तुसंघट्टनात् ।
यया मे कर्म कृतं तां पीडामप्यनुमोदये ॥ २२५६ ॥
जिनानां प्रतिमाचैत्यभृङ्गारमुकुटादिषु ।
यो मे पृथ्वीमयः कायो जज्ञे तमनुमोदये ॥ २२५७ ॥
जिनस्नानेषु पात्रेषु दैवादुपकृतो भवेत् ।
यो मे जलमयः कायः प्रायस्तमनुमोदये ॥ २२५८ ॥
धूपाङ्गारे च दीपे च जिनानां पुर एव यः ।
मम तेजोमयः कायो जातस्तमनुमोदये ॥ २२५९ ॥
धूपोत्क्षेपे अर्हतां सङ्घे श्रान्ते वा तीर्थवर्त्मसु ।
यो मे वायुमयः कायो ववौ तमनुमोदये ॥ २२६० ॥
मुनीनां पात्रदण्डेषु जिनार्चाकुसुमेषु च ।
मम द्रुममयः कायो यो अभूत्तमनुमोदये ॥ २२६१ ॥
क्वापि सत्कर्मयोगेन जिनधर्मोपकारकः ।
आसीत्त्रसमयः कायो यो मे तमनुमोदये ॥ २२६२ ॥
इत्यनन्तभवोपात्तं दुष्कृतौघमगर्हत ।
कदाचिद्रचितं किंचित्सुकृतं चान्वमोदत ॥ २२६३ ॥
शरणं तीर्थकृत्सिद्धसाधुधर्मा भवन्तु मे ।
इत्यालापमयः सो अथ चतुःशरणमाश्रितः ॥ २२६४ ॥
परित्यक्तनिदानो असौ मृत्युजीवितनिःस्पृहः ।

भवमोक्षनिराकाङ्क्षः समाधिं साधुरासदत् ॥ २२६५ ॥
वारं वारं नमस्कारानुधान्परमेष्ठिनाम् ।
गतमोहो निस्तापः प्राप साधुरयं लयम् ॥ २२६६ ॥
एवं समाधिलब्धस्य मृत्योर्बाधामसंविदन् ।
पूर्णमासोपवासो ऽयं प्रपेदे प्राणतं दिवम् ॥ २२६७ ॥
सुरम्यचन्दनमासाख्ये विमाने ऽतिमहर्द्धिकः ।
अन्तर्मुहूर्तात्पर्याप्तसर्वपर्याप्तिवैभवः ॥ २२६८ ॥
तल्पगर्भाद्दनं प्रातः संध्याकालमिवार्यमा ।
उत्सार्याविरभूदेष प्रभाप्राग्भारभासुरः ॥ २२६९ ॥
॥ युग्मम् ॥

कैः पुण्यैरियमुत्पन्ना ममर्द्धीरिति विस्मितः ।
अवधिज्ञानविज्ञानं प्राग्भवं सो ऽन्वमोदत ॥ २२७० ॥
तद्विमानपरीवारः सुरवारस्तदोत्सवान् ।
चकार तत्पुरः स्फारस्फुरज्जयजयारवः ॥ २२७१ ॥
नाथ नस्त्वमनाथानां नाथः पुण्यैः प्रकल्पितः ।
चिरं जय चिरं जीव चिरं पाह्यनुजीविनः ॥ २२७२ ॥
इत्यादिवादी देवानां देवीनां च समुच्चयः ।
तं ननाम प्रतेने च पञ्चशब्दोदयं मुदा ॥ २२७३ ॥
रङ्गदुत्तुङ्गमाङ्गल्यः पल्यङ्कादुत्थितस्ततः ।
कूर्मोन्नतिकपल्याद्धिः क्रीडावापीमवाप सः ॥ २२७४ ॥
सस्नौ स तत्र विसोमोद्दोत्कल्लोलपाथसि ।
तन्मुखालोकनक्रीडापन्नहेमपयोरुहि ॥ २२७५ ॥
दृष्ट्वा सुरविधेयानां निधानं सो ऽथ पुस्तकम् ।
तथा विमानचैत्यस्थं नित्यार्हन्तमपूजयत् ॥ २२७६

सिंहासनं विमानश्रीकिरीटमभिभूष्य सः ।
अथानन्दोर्मिमग्नाक्षो दिव्यं प्रेक्षणमैक्षत ॥ २२७७ ॥
कदापि केलिवापीषु कदाचिन्नन्दने वने ।
विललास स कान्ताभिर्विलास इव मूर्तिमान् ॥ २२७८ ॥
कदाचिज्जिनयात्रासु विजहार सहामरैः ।
कदाचिन्निर्ममे धर्मक्षेत्रे सत्पुरुषस्तुतीः ॥ २२७९ ॥
भविष्यज्जिनमायोत्थैः वपुरंशुभिरद्भुतैः ।
जयन्निन्द्रानपि ययौ जिनकल्याणिकेषु सः ॥ २२८० ॥

इत्थं प्रतिक्षणविनिर्मितदेवकृत्यो
नित्योत्सवैः प्रविलसन्भृशमप्रमत्तः ।
आलोलमौलिमुरमण्डलकर्णशोभा-
केलीमुखः स्फुरितचारुचरित्रकीर्तिः ॥ २२८१ ॥

अभ्यर्णतीर्थविभुताविभवेषु लुभ्यं-
न्नभ्यापतच्च्यवनकालमवाप्य यान्तः ।
आह्लादनेऽन्यपि महामहिमा विमाने
तस्मिन्नसौ रसमयं समयं निनाय ॥ २२८२ ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविज-
यसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्री-
वासुपूज्यचरित्रे आह्लादनाङ्के महाकाव्ये
तीर्थंकरकारणलब्धिवर्णनो नाम
द्वितीयः सर्गः ॥

॥ अथ तृतीयः सर्गः ॥

इतश्च संख्यातीताब्धिद्वीपमण्डलवेष्टितः
द्वीपोऽस्ति जम्बूद्वीपाख्यो रत्नजम्बूद्रुमाङ्कितः ॥ १
स्फुरन्तौ परितो बिभ्रद्यौ रवी द्वौ हिमच्छवी ।
स्वर्णभूधरभौ यत्र चतुर्यामिकवानिव ॥ २ ॥
अन्तर्मेरुमणिस्तम्भो धर्मरत्नाविर्भा ध्रुवः ।
यः सदा विजयश्रेणि धीरः फल्गुवदधौ ॥ ३ ॥
कुम्भाद्रो यः स्फुटसारो जलमूर्तिर्मलीमसः ।
रारटीति स्फुटम्भूमौ सिन्धुर्येन बहिःकृतः ॥ ४ ॥
तत्रास्ति भारतं क्षेत्रं षड्भूखण्डानि यद्दधौ ।
षण्मन्त्रमण्डलानीव रक्षितुं षड्विधात्मनः ॥ ५ ॥
अवनीवनिताभालस्थलस्थलीलायितस्थिति ।
यत्र श्रीखण्डरेखेव राजते राजतो गिरिः ॥ ६ ॥
इहास्ति हास्तिकस्तोममदार्द्रीभूतभूतला ।
संपत्संपादितस्वर्गकम्पा चम्पाभिधा पुरी ॥ ७ ॥
कृतपापविपर्यासाः प्रासादाः कामपर्वताम् ।
यस्यां पताकाजिह्वाग्रैर्लिहन्तीव सुधाकरम् ॥ ८ ॥
यस्यामनुपमानोऽपि सोपमानोऽभवज्जनः ।
मणिमन्दिरभूमीषु स्वैरेव प्रतिबिम्बितैः ॥ ९ ॥
निर्निमेषा मिथो रूपदर्शनादस्पतिभ्रमाः ।
धर्मक्षेत्रे चतुर्यत्र स्वर्गपौरा इवागताः ॥ १० ॥
रत्नकुम्भा धृताः मोर्धयत्र चैत्यैः सतां पुरः ।

मोहध्वान्तद्रुहो दीपा इव मोक्षाध्वदर्शने ॥ ११ ॥
इक्ष्वाकुकुलराजीवलक्ष्मीसंजीवनोपमम् ।
तत्र प्रतापोष्णत्वात्सुर्वमपूज्यो ऽभवन्नृपः ॥ १२ ॥
शोषिता यत्प्रतापेन द्विषतां शौर्यवल्लयः ।
पत्रैरिवासिभिर्भ्रष्टै रणारण्यमपूरयन् ॥ १३ ॥
कामधुग्दुग्धनिर्धौते चिन्तामणिशिलातले ।
कल्पद्रुकुसुमाकीर्णे यद्दानश्रीर्निरत्यहो ॥ १४ ॥
नित्यं यदीयधर्मस्य वर्धमानस्य सर्वतः ।
चैत्यश्रियः स्म तन्वन्ति न्युञ्छनानि ध्वजाञ्चलैः ॥१५॥
निःसृतां रणरेणुभ्यः स्नातामर्थिमुदश्रुभिः ।
चैत्यधूपनधूमैर्यः प्रियां कीर्तिमधूपयत् ॥ १६ ॥
तस्याग्रमहिषी जज्ञे स्वर्गस्त्रीजयिनी जया ।
जिनं भामेव चक्रेन्दोर्नासीद्यस्याः स्थितं बहिः ॥ १७ ॥
त्रैलोक्यश्रीजयप्राप्तजनाकाङ्क्षितपोपमम् ।
कम्बुकण्ठा ध्रुवं कण्ठस्तस्या रेखात्रयं दधौ ॥ १८ ॥
मङ्गलीपल्लवोल्लासि नखांशुकुसुमाञ्चितम् ।
प्रक्षेपि मृगदृम्भिर्यस्या बाहुलतायुगम् ॥ १९ ॥
काञ्चीपट्टो नितम्बे ऽस्ति यदपास्ये ऽपि नो मयि ।
इतीव दुःखितस्तस्या मध्यदेशः कृशो ऽभवत् ॥ २० ॥
अब्जे एव क्रमौ यस्या न हंसो यद्गतेर्वत ।
गतिनिर्जयलज्जैव जातामस्तत्र कारणम् ॥ २१ ॥
मन्यष्यन्तःपुरे तस्यां रेमे क्ष्मापतिमानगम् ।
कल्ये नक्षत्रलक्षे ऽपि पद्मचन्द्रजनी प्रजेत् ॥ २२ ॥
तस्य विश्वम्भराभर्तुः प्रतापमिव सौरितुम् ।

स्फुरागच्छदुग्रोष्मा ग्रीष्मो ऽप्युग्रलक्ष्मये ॥ २३ ॥
तया कवलीकृत्य सकलामपि यामिनीम् ।
स्वार्दिनमिव निर्मातुमवर्धत दिनोच्चयः ॥ २४ ॥
प्रतापाधिक्यमालोक्य द्विपनो दिवसेशितुः ।
दुःखादिव कृशीभावमभजन्त भृशं निशाः ॥ २५ ॥
सरोवरसरिद्वारिशोषे तापेन कूपगाः ।
विश्वोपकारसाम्राज्यात्मा पुरापस्तुपारताम् ॥ २६ ॥
आकर्षन्ति ध्रुवं वारि करा भानोर्धरातलात् ।
जलैः शिशिरानि यत्तद्गाढान्यप्रभूतां यतः ॥ २७ ॥
तथा तपनतापेन च्छायापि हि महीरुहाम् ।
ययौ मध्यंदिने मूलमालवालाम्बुशीतलम् ॥ २८ ॥
यत्नैः शान्तये सेव्यः सो ऽपि तप्तो गरुद्वयाँ ।
इति भूपो हिमभासविपासचि न सो ऽभुवत् ॥ २९ ॥
तदा च पूरधिराज्युः मागरोपमविंशतिम् ।
ज्येष्ठे नवम्यां शुक्लायां चन्द्रे शतभिषग्गते ॥ ३० ॥
स प्राणताह्वयात् कल्पात् पद्मोत्तरामरः ।
शुक्तिं मुक्तोद्भवपथः पयःकण इवाम्बुदात् ॥ ३१ ॥
॥ युग्म

तदात्वद्भुतसंभूतमर्मभित्तिमनोरमे ।
नीलाश्मस्तम्भावष्टम्भरत्नपाञ्चालिकाञ्चिते ॥ ३२
वर्तुलामलमुक्तावचूलितोल्लोचनस्तुले ।
अस्तोकान्ध्यकमाणिक्यदीपध्वस्ततमस्तमे ॥ ३३
उत्फुल्लमल्लिकापुष्पप्रकरामोदसंपदि ।
दह्यमानाप्रकस्तूरीकर्पूरागुरुधूपने ॥ ३४ ॥

शोभाभिभूतजम्भारिविमाने वासवेश्मनि ।
दुकूलास्तीर्णमतूलातुल्यपल्यङ्कसंश्रया ॥ ३५ ॥
सर्वमाङ्गल्यमयमल्पनिद्रामुद्रितलोचना ।
अनिव्यक्ताक्षयादेवी स्वप्नानेतानवैक्षत ॥ ३६ ॥

पञ्चभिःकुलकम् ॥

मत्स्वामिसेव्यस्त्वत्सूनुरयं देवि भविष्यति ।
इतीवाख्यातुमायातं सैरावणमवलोकत ॥ ३७ ॥
क्षमाभारवहो मद्भावी ते देवि नन्दनः ।
इतीवाग्रे स्थितं माताऽद्राक्षीद्वृषभं जवा ॥ ३८ ॥
त्वत्सूनुर्दुर्द्विपमनेनं हन्तायं मद्वदित्यथ ।
विज्ञापकमिवैक्षिष्ट सुमुखी नखरायुधम् ॥ ३९ ॥
त्वत्सूनुमाभिनाया मे देवि चापल्यदूषणम् ।
यात्यनीतीव निजरूपं मायां लक्ष्मीं ददर्श सा ॥ ४० ॥
देवि त्वन्नन्दनो मद्वत् सत्कीर्तिसौरभः ।
इति व्याख्यायिनीमत्र मापश्यत्कुसुमस्रजम् ॥ ४१ ॥
त्वत्पुत्रवदनौपम्यं बुधैर्दापिष्यते मम ।
इत्याख्यातुमिवायान्तमियं पूर्णेन्दुमैक्षत ॥ ४२ ॥
हन्ता मोहमयीं रात्रिं त्वद्भूरयमहं यथा ।
इति ज्ञापयितुं मन्ये स्थितमैक्षत सा रविम् ॥ ४३ ॥
अमुं वंशे ध्वजं देवि स्वं पुत्रं विद्धि मामिव ।
इतीव वक्तुमग्रस्थं ध्वजमेषा न्यभालयत् ॥ ४४ ॥
स्थानं ज्ञानादिरत्नानां मद्वत्ते भविता सुतः ।
इतीव गदितुं प्राप्तं निधिकुम्भं ददर्श सा ॥ ४५ ॥
मद्वदेष जगत्तृष्णां छेत्ता त्वत्तनुभूरिति ।

शङ्कं कथयितुं पद्मसरः सामस्त्यमैक्षत ॥ ४६ ॥
गम्भीरो ऽहमिव त्वत्सूनुर्भावीति गदितुं किल ।
रत्नाकरमुपेतं सा पश्यति स्म नृपप्रिया ॥ ४७ ॥
भोग्यैर्दुर्लभस्त्वत्सूनुर्मद्वदेव भविष्यति ।
इति शंसितुं मातर्विमानं सा व्यलोकयत् ॥ ४८ ॥
त्वत्सूनुर्भावी जगद्रूपा मद्वदेव इति ध्रुवम् ।
आख्यातुमागतं रत्नराशिमालोकत स्म सा ॥ ४९ ॥
धर्मेन्धनानि त्वत्सूनोर्ध्यानं धक्ष्यत्यहं यथा ।
इतीव वक्तुमग्निस्थं साग्निं निर्धूममैक्षत ॥ ५० ॥
समालोक्य तत्कालमुन्मेषात्परिनिष्पन्ना ।
मुखे विशन्ति वस्तूनि स्वप्नेष्वेतं चतुर्दश ॥ ५१ ॥
अथाशु निद्रापर्यन्ते पर्यङ्कादिव समुत्थिता ।
पत्युरगात् चतुरा चाटुवाचा यथाक्रमम् ॥ ५२ ॥
साथ पृथ्वीपतिं प्रीतिमुपि संजातसागरे ।
स्वप्नार्थमुद्दिश्य स्वप्नस्थानर्थमपृच्छत् ॥ ५३ ॥
अमन्दानन्दसंरम्भं भूपतिरभ्यधात् ।
स्वप्नैरेभिः सुतो देवि दिव्यरूपो भविष्यति ॥ ५४ ॥
इत्यन्तरे विजहार तारतूर्यरवध्वनिः ।
इमं च हर्षितं श्रोत्रं पेठुर्मङ्गलपाठकाः ॥ ५५ ॥
पूर्वाद्रिचूडामणिरयं समधिकप्रभावनः ।
भास्वानेष सुतो भव्यो भवताद्व नन्दनः ॥ ५६ ॥
इत्याशुवचनं श्रुत्वा हर्षी त्रिगुणी हृदय ।
वदन्नथ पुनर्नत्वा पृथ्वीशः प्रियया तया ॥ ५७ ॥
सद्गर्भभूमिं देवि धन्ये सर्वं विभूषय ।

इति गङ्गाभ्यनुज्ञाता ययावन्तःपुरं जया ॥ ५८ ॥
तस्मिन्नेव क्षणे जातासनप्रचलनेरिताः ।
परिज्ञायावधिज्ञानादाद्यं कल्याणिकं प्रभोः ॥ ५९ ॥
आवासे वसुपूज्यस्य द्वात्रिंशत्रिदशेश्वराः ।
आगत्य स्तवनं चक्रुर्गर्भस्थस्य जिनेशितुः ॥ ६० ॥युग्मम्॥
जय त्रिभुवनाधीश ज्ञानत्रयनिकेतन ।
गर्भस्थो ऽपि सतां तुष्ट्यै घनान्तर इवांशुमान् ॥ ६१ ॥
भवाम्भोधेः परं पारमियान्त्यं गर्भमाश्रितः ।
कस्य नाश्रयणीयो ऽसि जगन्नितयतारक ॥ ६२ ॥
जये देवि नमस्यासि यस्याः कुक्षौ जगत्पतिः ।
कल्पद्रुर्यत्र जायेत सा स्तुत्या वनभूरपि ॥ ६३ ॥
स्त्रीषु त्वमेव धन्यासि जननी या जिनेशितुः ।
पूर्वैव श्लाघ्यते दिक्षु यस्यामुद्यते रविः ॥ ६४ ॥
जिनं तज्जननीं चेति स्तुत्वा नत्वा च भक्तितः ।
पुष्पगन्धुरगन्धाम्बुवृष्टिविस्तारचारवः ॥ ६५ ॥
नन्दीश्वरवरे कृत्वा स्पष्टमष्टाह्निकोत्सवम् ।
धन्यंमन्या दिवं जग्मुः सर्वे गीर्वाणपुङ्गवाः ॥ ६६ ॥
॥ युग्मम् ॥

स्वप्नेष्विन्द्रेषु चागत्याप्यतृप्त इव भानुमान् ।
प्रभोः कल्याणिके प्राप्तः पुनरप्युदयच्छलात् ॥ ६७ ॥
तदावतीर्णमालोक्यान्तर्ध्वान्तभिदं विभुम् ।
तमो यावमपि त्रस्तं निःशङ्काः कश्मलाः क नु ॥ ६८ ॥
विज्ञायेव प्रभोराद्यं कल्याणिकमहोत्सवम् ।
रामीविन्यो जगुर्भृङ्गनिनादैर्नतुर्दलैः ॥ ६९ ॥

गुणिभ्यो ऽपि वयं दोषाकरेभ्य इति लज्जया ।
संन्यपीन्दुमुद्वत्यो ऽवतीर्णे ज्ञानिनि प्रभौ ॥ ७० ॥
नाथे ऽवतीर्णे निर्वाणद्वारोद्घाटनसूचकाः ।
कपाटा उद्घटन्ते स्म धर्मस्थानेषु सर्वतः ॥ ७१ ॥
त्रैलोक्यैकप्रदीपे ऽस्मिन्नवतीर्णे सति प्रभौ ।
लज्जयेव भवन्ति स्म विच्छाया गृहदीपकाः ॥ ७२ ॥
भविष्यति प्रभोर्धर्मव्याख्या पीयूषवर्षिणी ।
क्षीणः प्रागेव पक्षाणां विप्रयोगहुताशनः ॥ ७३ ॥
भूपः श्रीवसुपूज्यो ऽथ कृतप्राभातिकक्रियः ।
नभोमार्गं यथा भानुः सभामार्गं व्यभूषयत् ॥ ७४ ॥
जानन्नपि जिनेन्द्रस्यावतारं वासवोत्सवैः ।
परं मुहुः कृता वार्ता प्रियाप्रीत्यै भवेदिति ॥ ७५ ॥
तूर्णमानीय सन्मान्य स्थापितैः स्वमनोविदैः ।
व्याख्यापयन्नृपः स्पष्टस्वप्नांस्तांश्चतुर्दश ॥ ७६ ॥ युग्मम् ॥
अथैते प्रथितान्स्वप्नग्रन्थानालोक्य धीधनाः ।
विचार्य चिरमन्योन्यमुखे रोमाञ्चिता जगुः ॥ ७७ ॥
स्वापिषेणैकमप्येषु स्वप्नेषु स्वप्नमीक्षते ।
या कापि स्त्री प्रसूते सा तनयं सनयं नृपम् ॥ ७८ ॥
एतेषु वीक्षते स्वप्ने या तु स्वप्नचतुष्टयम् ।
सीरिणं वैरिणां शल्यमतुल्यं जनयत्यसौ ॥ ७९ ॥
या पुनः पश्यति स्वप्नान्सप्तैतेषु नृशेखर ।
भरतार्धस्य भोक्तारं सा सारं जनयेत्सुतम् ॥ ८० ॥
चतुर्दशाप्यमून्स्वप्नान्या पश्येत्किंचिदस्फुटान् ।
सा प्रभो प्रमदा सूते नन्दनं चक्रवर्तिनम् ॥ ८१ ॥

इयं पुनर्जयादेवी स्फुटानेतानलोकत ॥
तस्मात् त्रिजगन्नाथं सा जिनं जनयिष्यति ॥ ८२ ॥
यद्देव्या ददृशे दन्ती चतुर्दन्तो शुभाननः ।
तच्चतुःशुद्धधर्मोपदेष्टास्या भविता सुतः ॥ ८३ ॥
गमिष्यति सुतो देव्या वृषभस्य निरीक्षणात् ।
क्षेत्रे अस्मिन्भारते बोधिबीजमवाप्तिमिरताम् ॥ ८४ ॥
मृगेन्द्रमार्गणाद्देव्या नन्दनः पालयिष्यति ।
दुःकर्मकरिभिर्भज्यमानान्भव्यवनस्पतीन् ॥ ८५ ॥
एतस्याः साभिषेकश्रीदर्शनान्नन्दनः पुनः ।
सांवत्सरं ददानः श्रियं पुण्यां करिष्यति ॥ ८६ ॥
अमुष्या भविता सूनुः प्रसूनस्रग्विलोकनात् ।
सुरासुरनराधीशैर्मौलौ धृतपदः सदा ॥ ८७ ॥
पूर्णेन्दुदर्शनाद्देव्या नन्दनो नेत्रनन्दनः ।
दास्यते वीतरागात्मा नित्यं पुण्यरूपे सुखम् ॥ ८८ ॥
मार्तण्डमण्डलालोकादमुष्या भविता पतिः ।
मार्तण्डमण्डलाखण्डभामण्डलविभूषणः ॥ ८९ ॥
ध्वजस्य दर्शनाद्देव्यास्तनुजन्मा तनिष्यते ।
स्वं महत्त्वं पुरःस्फूर्जद्धर्मध्वजमहाश्रिया ॥ ९० ॥
कलशालोकनात्पुत्रः पूर्णो अस्याः करिष्यति ।
त्रिभुवनकलशं धर्मप्रासादशिखरश्रियम् ॥ ९१ ॥
विहरिष्यति पुत्रो अस्याः पद्मसरोदर्शनात् ।
सुरन्यस्तस्वर्णपद्मन्यस्तविक्रमः ॥ ९२ ॥
गम्भीरपयसां देव्या रत्नाकरनिरीक्षणात् ।
केवलज्ञानरत्नस्य स्थानमेष भविष्यति ॥ ९३ ॥

विमानदर्शनात्पुत्रो जयादेव्या भविष्यति ।
वैमानिकनिकायानां स्वर्गादुत्तारकारणम् ॥ ९४ ॥
भविष्यति कुमारो ऽस्या रत्नजालनिभाल्लनात् ।
उदाररत्नाकारमध्यसद्धर्मदेशनः ॥ ९५ ॥
सुतो ऽस्या भविता भास्वद्वैश्वानरनिरीक्षणात् ।
भव्यस्वर्णकल्याणशुद्धिनिर्माणकारणम् ॥ ९६ ॥
दृष्टाश्चतुर्दश स्वप्ना यदेतया तत्तनूद्भवः ।
स चतुर्दशरज्ज्वात्मलोकाग्रं पदमाप्स्यति ॥ ९७ ॥
एवं निशम्य रम्यं स भूपः कर्णामृतं वचः ।
ददौ दुकूलाद्याभूषणसारं पारितोषिकम् ॥ ९८ ॥
समालोकं विसृज्याथ पृथ्वीनाथो यथोचितम् ।
सनाथं श्रीजयादेव्या जगामान्तःपुरं मुदा ॥ ९९ ॥
अथोत्थाय स्वयं देव्या सज्जितं विष्टरं नृपः ।
अर्धपङ्के ततः सापि नृपादेशादुपाविशत् ॥ १०० ॥
रोमाञ्चिततनोर्देव्याः पुरः स्फुरितसंमदः ।
नैमित्तिकोपदिष्टानि जगौ स्वप्नफलानि सः ॥ १०१ ॥
इदं मे कथितं नाथ भूयादवितथं वचः ।
इत्युक्त्वा सेवरीवेके ययौ सा कमलेक्षणा ॥ १०२ ॥
इत्थं सुधाब्धिभिः प्रीतिभाषितैर्भर्तृभार्ययोः ।
दिनाः कालक्रम्यमाना जग्मुः सौख्यमया रयात् ॥ १०३ ॥
गर्भस्थाद्भुतभाग्यात्मप्रभावाद्व्याधिभयव्यथाः ।
तस्या अङ्गे तथा दृष्टे न वपुर्व्यसना क्वचित् ॥ १०४ ॥
प्रभोः प्रभावतस्तस्याः सौधप्राजिरमोदरात् ।
मार्जयांचक्रिरे वायुकुमार्यो हर्षभक्तयः ॥ १०५ ॥

अभ्यषिञ्चंस्तदम्भोदकुमार्यो गन्धवारिभिः ।
ऋतुदेव्यो मुदा पुष्पमकरानकिरन्निह ॥ १०६ ॥
व्यन्तर्यस्तत्शुश्रूषां किङ्कर्य इव चक्रिरे ।
ज्योतिष्कयोषितो रत्नमयादर्शमदर्शयन् ॥ १०७ ॥
कारयांचक्रिरे क्रीडां हृद्यां विद्याधरस्त्रियः ।
कामं किंनरकामिन्यो गीतिरीतिं वितेनिरे ॥ १०८ ॥
चतुर्भिः कलापकम् ॥
क्रियतामर्हतो माता मा तापैर्मद्वैरिति ।
तदा कादम्बिनीदम्भान्तरस्तरणिरस्फुरत् ॥ १०९ ॥
जिनाधिपजनिस्नानादासन्ना मे पवित्रता ।
इति हर्षादिवानृत्यदूर्मिरम्बु तदाम्बुधेः ॥ ११० ॥
उदेष्यति जिनार्धीशो दिनाधीशो ऽरुणोदयः ।
पुष्पितैः पाटलारामैर्बभूव भुवने तदा ॥ १११ ॥
जिनेन्द्रजननीपादस्पर्शात्पावनमानिनी ।
वात्यावर्तैर्मोऽव्याजादुद्धुतेव ननर्त भूः ॥ ११२ ॥
गायन्तं मल्लिकाभृङ्गैः क्षिप्त्वा ग्रीष्मं तपात्ययः ।
स्वामिमातुर्मुदे मेघमर्दलोघमघोषयत् ॥ ११३ ॥
तेजस्विभूदसौ यात्स्वतात्स्नाहमिति ध्रुवम् ।
जयादेव्यास्तडिच्छ्रियैरारात्रिकमिवाकरोत् ॥ ११४ ॥
दृष्टिसिक्ता ध्रुवं धूपधूमं बाष्पैः सुगन्धिभिः ।
देव्या नृरत्नगर्भाया रत्नगर्भाप्युदक्षिपत् ११५ ॥
निवार्य वार्धिवीचीनामुच्चैः कोलाहलं दिशः ।
जयादेवीं स्तुवन्ति स्म केकिकेकारवैरिव ॥ ११६ ॥
आनीनमद्देहम्यास्थेर्याघुघ्येव नदीरयः ।

र्पयन्वयः स्वामिमन्यायस्येव धर्मवित् ॥ ११७ ॥
सुपर्वभिः क्षणो जातिकरञ्जनवर्णकैः ।
सुवर्णं विरचयाये भूरीर्गाणिरियोल्लसः ॥ ११८ ॥
नारनाभिधमायानगा नारकगुणाचिताः ।
आनकैस्या पुरा यदूर्ताद्दशा दोहदा हारे ॥ ११९ ॥
पुन्य त्रिभुवनस्यापि स्वामिनः प्रणमन्तु माम् ।
दोःस्वप्नदुःस्वनिदानं च दंदं दानं जगन्नु ॥ १२० ॥
पूर्वं पापल्यतः सर्वं धर्मनिर्मन्दृणिषु ।
जगवमपापांगमङ्गमङ्गकर्णोपि च ॥ १२१ ॥
इत्येषु पूर्णमाणेषु दोहदेषु यथोदिता ।
प्रमोदेन समं देव्याः स गर्भो ववृधे क्रमात् ॥ १२२ ॥
त्रिभिर्विशेषकम् ॥

यथार्भरुद्धे क्षेत्रपरिग्रहादिति दीपकैः ।
श्रियः स्वदशायुक्तं मध्यस्थिते चूडामणौ यथा ॥ १२३ ॥
अभिप्राये स्फुरन्नन्तः गुप्तवानो गया वचः ।
तथा गर्भस्थिते देवे तद्वद् त्रिपुरं उविहत् ॥ १२४ ॥
युग्मम् ॥

गंतोर्पितस्वभावस्य संसर्गेण प्रमोदिव ।
अन्यासक्ति विलने उसौ मधुरे अपि न भोजने ॥ १२५
आनन्दस्मितकान्त्येव निर्यान्त्या रोमहर्षकैः ।
कल्पापागनुस्तस्याः कपोलौ धवलौ कलाम् ॥ १२६
देव्याः मासो ऽपि पुष्ट्वं स्वाङ्गुष्ठामृतपानतः ।
विश्वव्यापी न नौ पानित्यस्याः श्यामानानी स्तनौ ॥
सौरत्यभाजः मुनोर्गुणादिव ।

तस्या निगूढगर्भाया नोदत्समुदरं दधौ ॥ १२८ ॥
सद्यो मे सुतस्तन्मा भित्तः खेदो भवत्विति ।
मन्दं मन्दं चचालासौ देवी गर्भभरालसा ॥ १२९ ॥
मञ्जे ऽथ जयदेव्याः सीमन्तोन्नयनोत्सवे ।
शिञ्जानंमञ्जीरा नृत्यन्तीव ययौ शरत् ॥ १३० ॥
अम्भांसि निर्मलीभूयात्मानमज्जैरवासयन् ।
भाविन्यर्हज्जिनिमाने गृह्णन्त्यस्मान्सुरा इति ॥ १३१ ॥
कीराणां पङ्क्तयो व्योम्नि विलसद्विद्रुमैरिव ।
जिनेन्द्रजन्मने सज्जीकृता वन्दनमालिकाः ॥ १३२ ॥
शारदानपं जगत्कृता जिनमातुर्मुदं ऽम्बुदाः ।
श्यामतामसुचन्नुच्चैरक्षस्मुक्ता इव ॥ १३३ ॥
ईतिमुक्तमभिव्याप्तं सद्भवगुणितैः फलैः ।
सस्यसन्नजगद्भूःसभूतस्यानुभावतः ॥ १३४ ॥
आदाय गोपीरूपाणि गोवर्धने गुरस्त्रियः ।
शालिक्षेत्रेषु तीर्थेशगुणगीतान्यशिक्षयन् ॥ १३५ ॥
गर्भस्थितदिनाधीशा मेघलेखेव शारदी ।
पाण्डुरमाप्यद्भुतश्रीः प्रसुगर्भा बभौ जया ॥ १३६ ॥
आसीदरार्हदास्यश्रीराग गारो ऽनुना मम ।
इतीव कलयामास नैर्मल्यातिशयं शशी ॥ १३७ ॥
त्रैलोक्यभूषणेनास्मि नन्दनेनैव भूषिता ।
तत्किमेभिरितीवाल्पीचक्रे ऽङ्गे भूषणानि सा ॥ १३८ ॥
विभौ गर्भावतीर्णे ऽस्मिन्शक्रादेशाद्धनेश्वरः ।
पूरयामास सद्वासःस्वर्णरत्नैर्नृपालयम् ॥ १३९ ॥
अथ मन्ये जयदेव्या गुरुगर्भोप्यशान्तये ।

ढौकयच्चन्दनपत्राणि हेमन्तः समुपागमत् ॥ १४० ॥
एष्यतीह ममारातिरर्हन्निति भियाह्निनाम् ।
ह्रस्वो बहिरभूद्रागः कुङ्कुमालेपनच्छलात् ॥ १४१ ॥
समभागन्त यामिन्यो महापद्मिमभाजनम् ।
युक्तं महत्त्वं स्त्रीजातेर्जयागर्भगते ऽर्हति ॥ १४२ ॥
मत्वा जिनार्हतो लोके भाविनो दिवसान्गुरून् ।
लज्जयेव लघूचक्रे वासरान्वासरेश्वरः ॥ १४३ ॥
जन्ममात्रे ऽर्हतः मासे विशिखाग्निसनरं सुगः ।
मा प्रदीप्यन्ति नेत्याप तापं कूपोदरे पयः ॥ १४४ ॥
मद्गुणनिर्जगद्भर्तुर्भविनेति मदोद्धतः ।
शिशिरो ऽथ ऋतून्सर्वान्स्थ्यक्त्वा चन्द्रदो ऽभ्रमत् ॥ १४५ ॥
शुभमाश्विरधुनाप्यल्पतनीव भक्तितः ।
विरनीलसद्दुचन्द्रार्कैः सभाल्यस्त्वपलन्यत ॥ १४६ ॥
अवतीर्णेषु तीर्थे ...पादेषु पृथिवीतले ।
का श्रीरस्माकमित्यन्यैः पूर्वमेव व्यलीयत ॥ १४७ ॥
तदा मे का गतिस्तापः पानार्हत्वगुणो यदा ।
इति ध्यात्वेव ...भ्रमभ्रमः माप हिमोद्गमे ॥ १४८ ॥
जिनजन्मोत्सवे स्वर्गाद्भुक्तिमोरणमजनम् ।
सुराः कर्तार इन्युर्व्यां शुचापानि मरुद्दृढैः ॥ १४९ ॥
क्रियमाणासु रक्षासु देव्या इन्द्राद्यनाज्ञनैः ।
नव मासा व्यतिक्रान्ताः साधाष्टमदिनास्तदा ॥ १५० ॥
अथ कृष्णचतुर्दश्यां निशीथे मासि फाल्गुने ।
चन्द्रे शतभिषग्वर्तिनि शुक्लस्यमाहिषप्रजम् ॥ १५१ ॥
... जननाम्भोजमथं भुवनभूषणम् ।

रत्नं रोहणभूमीव जयादेवी जिनाधिपम् ॥ १५२ ॥
॥ युग्मम् ॥

तदा कोऽपि प्रकाशोऽभूदपि दुर्गतिभूमिषु ।
निखिलानां सुखं जज्ञे नारकाणामपि क्षणम् ॥ १५३ ॥
अस्माकमयमीशोऽभूदशेषगुणसागरः ।
इत्यानन्दवशेनेव दिशः प्रापुः प्रसन्नताम् ॥ १५४ ॥
ववुः प्रदक्षिणावर्ताः कुसुमश्रीविमिश्रिताः ।
तन्वन्त इव सद्भक्तिं जगत्प्राणा जगत्प्रभोः ॥ १५५ ॥
आख्यातुमिव विश्वेषु प्रभोर्जन्ममहोत्सवम् ।
घनगम्भीरनिर्घोषा नेदुर्दुन्दुभयोऽम्बरे ॥ १५६ ॥
प्रभुपादाम्बुजस्पर्शपवित्रं पृथिवीतलम् ।
पूजयद्भिरिवामर्त्यैश्चक्रिरे पुष्पवृष्टयः ॥ १५७ ॥
मत्वासनप्रकम्पेनावधिज्ञानात्प्रभोर्जनिम् ।
अष्टाजग्मुरधोलोकवासिन्यो दिक्कुमारिकाः ॥ १५८ ॥
भोगंकरा भोगवती सुभोगा भोगमालिनी ।
तोयधारा विचित्रा च पुष्पमाला त्वनिन्दिता ॥ १५९ ॥
नत्वा स्तुत्वा न भेतव्यमित्युदीर्य च ता इमाः ।
जिनजन्मोत्सवं देव्यै स्वागतो हेतुमभ्यधुः ॥ १६० ॥
॥ युग्मम् ॥

सहस्रस्तम्भयानेनुरैशान्यां प्राङ्मुखं दिशि ।
ताः सूतिसदनं धामपुनर्योजनभूतलम् ॥ १६१ ॥
देवि त्वमेव धन्यासि यस्याः सूनुर्जगद्गुरुः ।
इत्यादिगीतगायिन्यस्ताः प्रभोः परितः स्थिताः ॥ १६२ ॥
पीठकम्पात्प्रभोर्जन्म मत्वा मेरुनिकेतनाः ।

मुदिता दिक्कुमार्योऽष्टावूर्ध्वलोकाद्विहायसः ॥ १६३ ॥
मेघंकरा मेघवती सुमेघा मेघमालिनी ।
सुवत्सा वत्समित्रा च वारिषेणा बलाहका ॥ १६४ ॥
इमा जिनं च देवीं च नत्वा योजनसंमिताम् ।
धरां गन्धोदकैः सिक्त्वा पुष्पवृष्टिं वितेनिरे ॥ १६५ ॥
॥ युग्मम् ॥
ईयुरासनकम्पेन ज्ञात्वा जन्म जिनस्य तत् ।
पौरस्त्यरुचकादष्टौ दिक्कुमार्यः सदर्पणाः ॥ १६६ ॥
नन्दा नन्दोत्तरानन्दे आनन्दानन्दवर्धने ।
विजया वैजयन्ती च जयन्ती चापराजिता ॥ १६७ ॥
एताः प्राच्यां दिशि स्थित्वा नत्वा मातृयुतं जिनम् ।
जगुर्जगन्मनोज्ञानि गीतानि प्रीतचेतसः ॥ १६८ ॥
अपाच्यरुचकात्पीठप्रकम्पेनाययुस्ततः ।
दिक्कन्या अष्टभृङ्गारशृङ्गारितकराम्बुजाः ॥ १६९ ॥
समाहारा सुप्रदत्ता सुप्रबुद्धा यशोधरा ।
लक्ष्मीवती शेषवती चित्रगुप्ता वसुंधरा ॥ १७० ॥
॥ युग्मम् ॥
एताः प्रणम्य तीर्थेशं तीर्थेशजननीमपि ।
स्फीतगीतकलादक्षा दक्षिणस्यां दिशि स्थिताः ॥१७१॥
प्रतीच्यरुचकादष्टौ दिक्कन्याः पीठकम्पतः ।
आययुर्व्यजनाभोगभ्राजिष्णुकरपङ्कजाः ॥ १७२ ॥
इलादेवी सुरादेवी पृथिवी पद्मवत्यपि ।
एकनासा नवमिका भद्रा शीतेति नामतः ॥ १७३ ॥
जननीसहितं नत्वा त्रैलोक्यमहितं जिनम् ।

पश्चिमायां दिशि प्रीता गीतामृतमुचः स्थिताः ॥१७४॥
उदीच्यरुचकाद्रेस्तु विष्टरस्य प्रकम्पतः ।
दिक्कुमार्यः समाजग्मुश्चञ्चच्चामरचारवः ॥ १७५ ॥
अलम्बुषा मिश्रकेशी च पुण्डरीका च वारुणी ।
हासा सर्वप्रभा चैव श्रीर्ह्रीरित्यभिधानतः ॥ १७६ ॥
नत्वा धात्रा समं मात्राधिकभक्तिभराः प्रभुम् ।
तास्तस्थुरुत्तरायामुत्तरोदारगीतयः ॥ १७७ ॥
ईयुश्चतस्रो दिक्स्था विदिग्भ्यः पीठकम्पतः ।
सुतारा चित्रकनका चित्रा सौत्रामणी तथा ॥ १७८ ॥
दीप्रदीपकरा नत्वा स्वामिनं स्वामिनीमपि ।
गीतामृतप्रतन्त्यस्तस्थुरैशान्यादिविदिक्षु ताः ॥ १७९ ॥
दिक्स्था मध्यरुचकाधनतः पीठकम्पतः ।
रूपा रूपासिका चेयुः सुरूपा रूपवत्यपि ॥ १८० ॥
नालं बालस्य ताश्छित्त्वा चतुरङ्गुलवर्जितम् ।
रत्नयुक्तं निखन्योर्व्यामत्र दूर्वामरोपयन् ॥ १८१ ॥
त्रीन्सूतिसौधतः पूर्वदक्षिणोत्तरदिक्षु ताः ।
रम्भागृहांश्चतुःशालासिंहासनजुषो व्यधुः ॥ १८२ ॥
ता दक्षिणचतुःशालपीठे देव्या जिनस्य च ।
अभ्यङ्गोद्वर्तनैर्दिव्यैस्तैलोद्वर्तनकैर्व्यधुः ॥ १८३ ॥
उभौ संस्नाप्य संमार्ज्य प्राक्चतुःशालविष्टरे ।
ता दिव्यचन्दनैर्लिप्त्वाभूषयंश्चेलभूषणैः ॥ १८४ ॥
एत्योत्तरचतुःशाले मथितारणिवह्निना ।
हुतैः क्षुद्रहिमाद्रेस्ता द्रुतगोशीर्षचन्दनैः ॥ १८५ ॥
तयोः शान्तिकमाधाय भद्रपीठमधिष्ठयोः ।

व्यक्तभक्तिविधौ दक्षा रसापोट्टलिकां व्यधुः ॥ १८६ ॥
॥ युग्मम् ॥

पर्वतायुर्भवेत्युक्त्वा कर्णाभ्यर्णे प्रभोः स्थिताः ।
आस्फालयांबभूवुस्ता हस्ताभ्यां ग्रावगोलकौ ॥ १८७ ॥
स्थापयित्वा जिनेन्द्रं च जिनेन्द्रजननीं च ताः ।
आनीयावाय शय्यायां गायन्त्यः परितः स्थिताः ॥१८८॥
समं शुक्र तदा नित्यघण्टानामनदनि ध्वनिः ।
विश्वप्रबोधनार्थं तत्पर्वोपबोधनः ॥ १८९ ॥
आसनान्यचलान्यद्रिनिविष्टानि दिवौकसाम् ।
व्याप्तानीव शिरःकम्पैर्जिनजन्माद्भुता इव ॥ १९० ॥
अथैवं दर्शयन्योजः को ददीति स्थोपकम् ।
आसनं सुधर्मेणं तस्या सेनापतिर्जगौ ॥ १९१ ॥
यज्ञे विश्वानुरु स्वामिन्स्द कं हेति मे किम् ।
इत्यस्य पाणिमत्त्वातन्व.पिरमर्थं क्षणात् ॥ १९२ ॥
परिज्ञाय प्रभोर्जन्म विनीनम्र.परन्धनः ।
द्राग्भि.पाद् इन कृत्वाप्रुअभिराहमने हरिः ॥ १९३
॥ युग्मम् ॥

दत्वा पदानि सप्ताष्टौ भगवज्जन्मदिशं प्रति ।
नत्वा स्तुत्वा जिनं शक्रो ऽध्यमन्यो विष्टरं पुनः ॥१९४॥
अथादिश स सेनान्यं नैगमेषिणमादरात् ।
जिनजन्मोत्सव कृत्यागमनाय सुरानिति ॥ १९५ ॥
योजनमितां घण्टां सुघोषामत्यधिवासनः ।
अवादयत् सौधर्मान्तान्निपुलस्वरम् ॥ १९६ ॥
...सानन्यया ।

विमानेषु प्रतिध्वाना घण्टानां सर्वतोऽभवन् ॥ १९७ ॥
क्रीडासक्तास्ततः सर्वे सावधानाः सुराः स्थिताः ।
घण्टानादे च विश्रान्ते सेनानीरिति घुष्टवान् ॥ १९८ ॥
अमरा भारते क्षेत्रे जिनजन्मोत्सवे हरिः ।
गन्ता ततः प्रियायुक्ता एत त्वरितमेत भोः ॥ १९९ ॥
अथ ते प्रथितानन्दा वृन्दारकसमुच्चयाः ।
देवीभिः सममाजग्मुर्जिनजन्मोत्सवेच्छया ॥ २०० ॥
पञ्चयोजनशत्युच्चं विमानं लक्षयोजनम् ।
चक्रे संक्रन्दनादेशात्पालकः पालकाभिधम् ॥ २०१ ॥
स्तम्भैरङ्कुरितं कूजत्किङ्किणीभिः सकोकिलम् ।
मुक्तावचूलैः सत्पुष्पं पताकाभिः सपल्लवम् ॥ २०२ ॥
कलशैः फलितं रत्नप्रभाभिः सारसारणि ।
देवीभिः केलिभिर्वाप्यं जालजालैर्निकुञ्जवत् ॥ २०३ ॥
सा तोरणमालाभिर्लोलद्दीप्तालिमालितम् ।
किंचिद्गम्भीरपीठानामग्रैर्दीर्घैर्दीपितम् ॥ २०४ ॥
सुवर्णकेतनश्रीभिर्नूतपुष्पनभोभरम् ।
तत्रग्रं महेन्द्रस्य क्रीडोद्यानमिवाबभौ ॥ २०५ ॥
॥ चतुर्भिः कलापकम् ॥
तत्र [illegible] अभ्यग्रौ [illegible] रत्नसोपानराजयः ।
[illegible] उर्मा संस्तत्य [illegible] ताकारपर्वदाम् ॥ २०६ ॥
ता दिव्यचन्दने [illegible] पोरणोधिभिः ।
पर्यन्ता [illegible] मासिरिवाभवत् ॥ २०७ ॥
[illegible] धूपाडम्बरा [illegible] बभौ ।
[illegible] भावना [illegible] मना ॥ २०८ ॥

स्वनृत्तदर्शने देवीः स्थिता मूर्त्यन्तरैरिव ।
पाञ्चालीर्दधदस्यान्तर्जज्ञे प्रेक्षणमण्डपः ॥ २०९ ॥
चतुर्योजनपिण्डाष्टयोजनायामविस्तृतिः ।
शोभायाः केलिशैलाभा तत्राभून्मणिपीठिका ॥ २१
यन्त्रर्थैर्निश्चलीकारबन्धरज्जुसहोदरैः ।
रत्नसिंहासनं रेजे तदुपर्युरुमंशुभिः ॥ २११ ॥
अर्धमौक्तिकदामालिङ्गितमौक्तिकदामभाक् ।
दिव्यश्चन्द्रोदयो वज्राङ्कुशस्तदुपर्यभूत् ॥ २१२ ॥
अन्तःपीठान्मरुद्यक्षत्र्यक्षकाष्ठासु दिद्युते ।
चतुरशीतिसहस्रेन्द्रसमद्युसदासनैः ॥ २१३ ॥
प्राच्यां दिव्यप्रदेवीनामासनान्यष्ट रेजिरे ।
सहस्राद्द्वादशाग्नेय्यां चान्तःसभ्यदिवौकसाम् ॥ २१
चतुर्दश सहस्राणि दक्षिणाशाविभूषणम् ।
आसनान्यभवन्प्राक्सदां मध्यसभासदाम् ॥ २१५ ।
बहिःसभासदां स्वर्गवासिनामासनावलिः ।
षोडशानां सहस्राणां नैर्ऋत्यामभवद्दिशि ॥ २१६ ।
सप्तसंख्यानि सप्तानां सेनापतिदिवौकसाम् ।
आशायां पाशहस्तस्य रेजिरे सिंहविष्टराः ॥ २१७
चतुर्भिरधिकाशीतिः सहस्राण्यङ्गरक्षिणाम् ।
औचित्येनासनान्यासन्परितो वासवासनम् ॥ २१८
विमानं विरचय्यैवं त्रिदशैराभियोगिकैः ।
शक्रो विज्ञपयांचक्रे तदा तदधिरोहणे ॥ २१९ ॥
अन्यैर्नानाविमानाधिवासिभिः स्वर्गवासिभिः ।
वृतं स्फुरद्भिरम्भोजं संहैः पत्ररथैरिव ॥ २२० ॥

विमानेषु प्रतिध्वाना घण्टानां सर्वतोऽभवन् ॥ १९७ ॥
क्रीडासक्तास्ततः सर्वे सावधानाः सुराः स्थिताः ।
घण्टानादे च विश्रान्ते सेनानीरिति घुष्टवान् ॥ १९८ ॥
अमरा भारते क्षेत्रे जिनजन्मोत्सवे हरिः ।
गन्ता ततः प्रियायुक्ता यूयं त्वरितमेत भोः ॥ १९९ ॥
अथ ते मथितानन्दा वृन्दारकसमुच्चयाः ।
देवीभिः सममाजग्मुर्जिनजन्मोत्सवेच्छया ॥ २०० ॥
पञ्चयोजनशत्युच्चं विमानं लक्षयोजनम् ।
चक्रे संक्रन्दनादेशात्पालकः पालकाभिधम् ॥ २०१ ॥
स्तम्भैरङ्कुरितं कूजत्किङ्किणीभिः सकोकिलम् ।
मुक्तावचूलैः सत्पुष्पं पताकाभिः सपल्लवम् ॥ २०२ ॥
फलदैः फलितं रत्नप्रभाभिः सारसारणि ।
देवीभिः केलिशैलाढ्यं जालनालैर्निकुञ्जभृत् ॥ २०३ ॥
तारतोरणमालाभिर्लीलादोलाभिमालितम् ।
किंचित्कुम्भीरपीठानामन्तरैर्दीर्घदीर्घिकम् ॥ २०४ ॥
सुवर्णकेतनश्रीभिर्भूतपुष्परजोभरम् ।
तदभूदं महेन्द्रस्य क्रीडोद्यानमिवाबभौ ॥ २०५ ॥
॥ चतुर्भिः कलापकम् ॥
तत्र [अभ्यग्रो]...त्न रत्नसोपानराजयः ।
... उभौ संक्रम्य ...गेवाक्षायसंपदाम् ॥ २०६ ॥
...मा दिव्यचन्दन...ोस्तत्तोरणैर्द्विभिः ।
...न्यांपरचतुः... ...शार्पीत्यासिशयत् ॥ २०७ ॥
...तैः धूद्रद्दिमाद्देस्ता ... पभौ ।
...मयोः ज्ञान्तिकमाधाय ...जन्मना ॥ २०८ ॥

त्प्रदर्शने देवीः स्थिता मूर्त्यन्तरैरिव ।
वाश्चालीर्ध्वदस्थान्तर्जज्ञे प्रेक्षणमण्डपः ॥ २०९ ॥
चतुर्योजनविस्तारयोजनायामविस्तृतिः ।
शोभायाः केलिशैलाभा तत्राभूद्वज्रपीठिका ॥ २१० ॥
तन्मध्येऽनिधवीकारबन्धरज्जुसहोदरैः ।
रत्नसिंहासनं रेजे सदुपर्यंकमंशुभिः ॥ २११ ॥
अर्धमौक्तिकदामाभिरूनमौक्तिकदामभाक् ।
दिव्यचन्द्रोदयो यत्राङ्कुशभृत्तदुपर्यभूत् ॥ २१२ ॥
अन्तःपीठात्मरुद्व्यपश्चकाष्ठासु त्रिगुणे ।
चतुरशीतिसहस्रेन्द्रसमसुभद्रासनैः ॥ २१३ ॥
प्राच्यां दिव्यग्रदेवीनामासनान्यष्ट रेजिरे ।
सहस्राद्वादशाग्नेय्यां चान्तःसभ्यदिवौकसाम् ॥ २१४ ॥
चतुर्दश सहस्राणि दक्षिणाशाविभूषणम् ।
आसनान्यभवन्भाक्सदां मध्यसभासदाम् ॥ २१५ ॥
बहिःसभासदां स्वर्गवासिनामासनावलिः ।
षोडशानां सहस्राणां नैर्ऋत्यामभवद्दिवि ॥ २१६ ॥
सप्तसंख्यानि सप्तानां सेनापतिदिवौकसाम् ।
आशायां पाशहस्तस्य रेजिरे सिंहविष्टराः ॥ २१७ ॥
चतुर्भिरधिकाशीतिः सहस्राण्यङ्गरक्षिणाम् ।
आचिन्त्येनासनान्यासन्परितो वासवासनम् ॥ २१८ ॥
विमानं विरचय्यैवं त्रिदशैराभियोगिकैः ।
शक्रो विज्ञपयांचक्रे तदा तदधिरोहणे ॥ २१९ ॥
अन्यैर्नानाविमानालिन्यासिभिः स्वर्गवासिभिः ।
वृतं स्फुरद्भिरम्भोजं संहैः पत्ररथैरिव ॥ २२० ॥

पद्विचलनमहेन्द्रौ [illegible] दौरिहागमत् ॥ २४३ ॥
आनतप्राणतस्वामी विमलाख्यविमानभाक् ।
आजगाम[illegible]को विमानैश्चतुःशतैः ॥ २४४ ॥
[illegible]नुरागतः ।
[illegible]विमानस्थः शुगवले ॥ २४५ ॥
[illegible] याहुल्याम[illegible]सिताम् ।
[illegible] ॥ २४६ ॥
[illegible] गमनो गुल्मागतः ।
[illegible] निर्गमश्रमगामने ॥ २४७ ॥
[illegible] तवाद्यत् ।
[illegible] दूषण गः ॥ २४८ ॥

॥ युग्मम् ॥

[illegible] ।
[illegible] ॥ २४९ ॥
[illegible] ।
[illegible] ॥ २५० ॥
[illegible] ।
[illegible] ॥ २५१ ॥
[illegible]विमानितम् ।
[illegible] ॥ २५२ ॥
[illegible] निर्मितम् ।
[illegible] ॥ २५३ ॥

॥ [illegible] ॥

[illegible] ।

सौधर्मेन्द्र इवाभ्यागान्मेरुं विभुविभूषितम् ॥ २५४ ॥
असुरेन्द्रो बलिर्नाम बलिचञ्चापुरीपतिः ।
महौघस्वरघण्टायाः स्फारयित्वाथ वादनम् ॥ २५५ ॥
महाद्रुमाख्यसेनान्याहूतैः षष्टिसहस्रकैः ।
सामानिकसुरैस्तेभ्यश्चाङ्गरक्षैश्चतुर्गुणैः ॥ २५६ ॥
त्रायस्त्रिंशादिकैरन्यैरसुरैः परितो वृतः ।
आगाद्द्रुमयानेन मेरुशृङ्गे महोत्सवात् ॥ २५७ ॥
॥ विशेषकम् ॥

फणीन्द्रो धरणो मेघस्वरघण्टाभिवादनात् ।
सेनान्या भद्रसेनेन चोदितैर्निर्जरैर्वृतः ॥ २५८ ॥
सामानिकसुरैः षड्भिः सहस्रैः परमर्द्धिकैः ।
चतुर्विंशत्यङ्गरक्षसहस्रैर्भूरिभक्तिभिः ॥ २५९ ॥
षड्भिरग्रदेवीभिरन्यैर्नागकुमारैर्युतः ।
सार्धद्वियोजनशतोत्तुङ्गध्वजमण्डलम् ॥ २६० ॥
सहस्रपञ्चविंशत्या योजनैर्जलधिविस्तृते ।
विमानरत्नमारुह्य मेरुमूर्ध्नि समागमत् ॥ २६१ ॥
॥ चतुर्भिः कलापकम् ॥

भूतानन्दाभिधो मेघस्वरघण्टाभिवादनात् ।
सेनाधीशेन दक्षेणाहूतैः सामानिकादिभिः ॥ २६२ ॥
नागकुमारैर्नागनाथो निर्झरसन्निभात् ।
आगाद्दिव्यविमानस्थः सनाथं स्वामिना नगम् ॥ २६३ ॥
॥ युग्मम् ॥

हरिस्तथा हरिसहो विद्युत्कुमारस्वामिनौ ।
वेणुदारी वेणुदेवः सुपर्णानां पुरन्दरौ ॥ २६४ ॥

अग्निमाणवो ऽग्निशिखश्चेन्द्रावग्निकुमारकौ ।
शक्रौ वायुकुमाराणां वेलम्बो ऽथ प्रभञ्जनः ॥ २६५ ॥
महाघोषः सुघोषश्च स्तनितानां सुराधिपौ ।
तथोदधिकुमारेन्द्रौ जलकान्तजलप्रभौ ॥ २६६ ॥
तथा पूर्णो ऽवशिष्टश्च शक्रौ द्वीपकुमारकौ ।
वासवौ दिक्कुमाराणाममितो ऽमितवाहनः ॥ २६७ ॥
महाकालश्च कालश्च व्यन्तराणां सुरेश्वरौ ।
सुरूपप्रतिरूपश्च भूतानामधिपौ हरी ॥ २६८ ॥
माणिभद्रः पूर्णभद्रो वासवौ यक्षरक्षकौ ।
महाभीमश्च भीमश्च राक्षसाखण्डलौ वरौ ॥ २६९ ॥
किंनराणां किंपुरुषः किंनरश्च मरुत्पती ।
किंपुरुषेन्द्रौ महापुरुषसत्पुरुषाधिपौ ॥ २७० ॥
अतिकायमहाकायौ महोरगमहाधिपौ ।
गीतयशोगीतरती गन्धर्वानद्धेश्वरौ ॥ २७१ ॥
अथाणप्रज्ञप्तिप्रमुख्यादीनां समापयुः ।
व्यन्तराष्टनिकायानां षोडश त्रिदशाधिपाः ॥ २७२ ॥
अणप्रज्ञप्तिदेवेन्द्रौ सन्निहितसमानकौ ।
इन्द्रौ धाता विधाता च पणप्रज्ञप्तिनायकौ ॥ २७३ ॥
ऋषिवादिनिकायीशावृषिश्च ऋषिपालकः ।
भूतवादिनिकायकौ तथेश्वरमहेश्वरौ ॥ २७४ ॥
सुवत्सकविशालाख्यौ कन्दितानां सुरेश्वरौ ।
महाकन्दिनिकायकौ हासो हासरतिस्तथा ॥ २७५ ॥
श्वेतौ श्वेतमहाश्वेतौ कूष्माण्डानां पुरन्दरौ ।
पतङ्गः पतङ्गपतिः पतङ्गानां बिडौजसौ ॥ २७६ ॥

ज्योतिषां वासवौ संख्यातीतौ रविहिमच्छवी ।
चतुःषष्टिरितीन्द्राणां मेरुमूर्ध्नि तदा ययौ ॥ २७७ ॥
आदिष्टा अच्युतेन्द्रेणापक्रम्येशानदिश्यथ ।
वैक्रियेण समुद्घातेनाकृष्योत्तमपुद्गलान् ॥ २७८ ॥
योजनोच्चमुखान्हैमान् राजतान् रत्नजानपि ।
स्वर्णरौप्यमणिस्वर्णमणिरौप्यमयानपि ॥ २७९ ॥
स्वर्णरौप्यमणीकृत्स्नान्कलशान्मृन्मयानपि ।
प्रत्येकं चक्रुरष्टाग्रं सहस्रं सुरकिङ्कराः ॥ २८० ॥
॥ त्रिभिर्विशेषकम्

। पात्रीपुष्पचङ्गेरीस्थालभृङ्गारदर्पणान् ।
तद्वद्रत्नकरण्डांश्च सुप्रतिष्ठान्यकुर्वत ॥ २८१ ॥
क्षीराब्धिपुष्कराब्धिभ्यां तदा पद्मह्रदादपि ।
भरतैरावतक्षेत्रपुण्यतीर्थगणादपि ॥ २८२ ॥
आनिन्यिरे मृदम्भोजमम्भो मुकुन्दुरं सुराः ।
पुष्पसिद्धार्थतुवरौषधीः क्षुद्रहिमाद्रितः ॥ २८३ ॥
ते ऽत्र सौमनसाद्भद्रशालान्नन्दनकाननात् ।
पाण्डुकाद्वन्यवस्तूनि नीत्वाम्भसि निचिक्षिपुः ॥
मल्लिकापाटलागावियूथिकाचम्पकोद्भवैः ।
मन्दारपारिजातोत्थैः पुष्पैः स्वर्णाम्बुजैरपि ॥
उन्निद्रागुरुकर्पूरः स्तुति सन्तन्मयोः पुरः ।
अच्युतेन्द्रः सुरैः साकमुपस्वकुसुमाञ्जलिम् ।

तनेषु विलेपवद्वैर्वनेषु सुषिरैश्चापि ।
सर्वतो ऽप्याभियोगिकैः

गीयमानेषु गीतेषु तारनादेन किन्नरैः ।
तन्यमानेषु नृत्येषु यथातालं सुरीजनैः ॥ २८८ ॥
पठ्यमाने जिनाधीशे सुरमङ्गलपाठकैः ।
सितेपूद्धूयमानेषु चामरेषु सुरासुरैः ॥ २८९ ॥
जय द्वादशतीर्थेश श्रीमन्निर्जितसंसृते ।
इत्यादिस्तुतिवाक्येषु चारणश्रमणेषु च ॥ २९० ॥
धूपिताचितभृङ्गारन्यस्तैः सर्वौषधीयुतैः ।
नीरैर्घुसृणकर्पूरश्रीखण्डागुरुसुन्दरैः ॥ २९१ ॥
स्नात्रं श्रेयःश्रियां पात्रममात्रमुदः प्रभोः ।
त्रिपष्ट्या विदधे शक्रैरच्युतेन्द्रपुरःसरैः ॥ २९२ ॥
॥ पञ्चभिः कुलकम् ॥

मार्जितं गन्धकाषाय्या कर्पूरागुरुधूपितम् ।
व्यलिम्पन्नाभिकान्यस्तैः प्रभुं गोशीर्षचन्दनैः ॥ २९३ ॥
भविष्यत्यधुना भर्तुरङ्गसंग इति स्मितैः ।
भृङ्गगीतिपरैर्देवाः प्रभुं पुष्पैरपूजयन् ॥ २९४ ॥
सौधर्मेन्द्र इवाधाय पञ्चमूर्तीस्ततः कृती ।
उत्सङ्गे ऽसौ दधौ मूर्त्या प्रभुमीशान एकया ॥ २९५ ॥
पाण्डुरौ चामरौ द्वाभ्यामुज्ज्वलं छत्रमेकया ।
व्योमकूलंकषं शूलं दूरोत्क्षिप्तमेकया ॥ २९६ ॥
॥ युग्मम् ॥

मूर्तान्धर्मानिवोन्मीलद्दर्ककान्तिमणीमयान् ।
चतुःसंख्यानसौ दिक्षु वृषानग्रतो व्यधात् ॥ २९७ ॥
तच्छृङ्गाग्रोच्छलत्क्षीरधाराभिरष्टभिः ।
सौधर्माधिपतिश्चक्रे स्नात्रं विश्वत्रयीपतेः ॥ २९८ ॥

दिव्यैर्दुकूलैः श्रीखण्डघास्यमाणिक्यमण्डनैः ।
भक्तिरागेण सौधर्मप्रभुणा भूषितः प्रभुः ॥ २९९ ॥
अथाग्रे जिनमातेले पट्टे मणिमये हरिः ।
कर्माष्टकस्यापायाष्टमङ्गलीं रूप्यतण्डुलैः ॥ ३०० ॥
स किंचिदपसृत्याथ ज्वलद्दीपहृततमः ।
ऊर्ध्वीभूतः पुरो भर्तुरारात्रिकं दधौ ॥ ३०१ ॥
तज्जिनेन्दोः पुरः स्फारस्फुरत्तारामिवाथ सः ।
क्षिप्तपुष्पं पुरस्तादञ्जलिमुदतारयत् ॥ ३०२ ॥
इत्यानन्दभिलन्मौलिः स पान्लामीपनिस्ततः ।
निनम्य विष्टपाधीशं महष इति तुष्टुवे ॥ ३०३ ॥
जय त्रिभुवनाधार जय त्रिभुवनाभय ।
जय त्रिभुवनानन्द जय त्रिभुवनोदय ॥ ३०४ ॥
सद्यो मयापरस्याद्य मोदे भ्रमणमपि तु ।
यदयं निर्विर्णनत्त्वं दद्दशे द्वादशो जिनः ॥ ३०५ ॥
अणुमानं मनस्तादृक्दिक्स्तोभवं वचः ।
क तेन त्वद्गुणा नाथ स्तुत्या विश्वातिमहिम्नः ॥ ३०६
त्वां प्राप्य दृष्टसीमानं स्वामिन्मुक्तसीमया ।
दृशः मीना न्यवर्तन्त रूपान्तरनिरूपणात् ॥ ३०७ ॥
कठोरमर्थिताकाल्प्याल्कर्मविपाकुलम् ।
उल्लासयासि विश्वेश विश्वं वाग्मृतद्रवैः ॥ ३०८ ॥
इति स्तुत्वा गृहीत्वेशमीशानेनाहृतः सुरैः ।
सौधर्माधिपतिः मुनिगृहे आत्मस्वरूपभाक् ॥ ३०९
निवर्त्य प्रतिमां न्यस्य जिनेशं मातुरन्तिके ।
वाससी कुण्डलं च सः ॥ [illegible]

सस्वर्णवलयैर्वैर्य लम्बिनानामणिं हरिः ।
जिनेन्दोर्लोचनानन्दमुल्लोचे कन्दुकं न्यधात् ॥ ३११ ॥
न जिना जननीक्षीरं रसयन्तीति नीतिवित् ।
कराङ्गुष्ठे विभोर्वज्री नानारससुधां न्यधात् ॥ ३१२ ॥
द्वात्रिंशतं रौप्यहेमरत्नकोटीः पृथक्पृथक् ।
तथा द्वात्रिंशतं नन्दासनभद्रासनान्ययं ॥ ३१३ ॥
अन्यच्च सुखदं वस्तु नेपथ्यादि मनोहरम् ।
शक्रादेशाद्धनाधीशो जिनाधीशगृहे ऽसृजत् ॥ ३१४ ॥
॥ युग्मम् ॥
स्वामिनः स्वामिमातुर्वा यो ऽशुभं चिन्तयिष्यति ।
सप्तधा भेत्स्यते तस्यार्जकमञ्जरिवच्छिरः ॥ ३१५ ॥
इत्युक्तिं वासवादेशादाभियोगिकनाकिनः ।
उच्चैरुज्जुघुषुर्देवनिकायेषु चतुर्ष्वपि ॥ ३१६ ॥ युग्मम् ॥
अथ पञ्च समादिक्षद्दक्षा अप्सरसः स्वयम् ।
पुरो विश्वगुरोर्धात्रीकर्मनिर्मितये हरिः ॥ ३१७ ॥
गता तदा तु निर्मातुमष्टाह्नीं बहवः सुराः ।
कैश्चिद्दारकैः किञ्चित्क्रीडया निर्मीय चान्यदा ।
कांश्चिद्वगरुडाडोभि ऽर्पयन्कार्थं निजाश्रयः ॥ १२७ ॥
सधर्मचारिणी तस्य धन्याख्या धर्मचारिणी ।
अभून्मार्गोद्यमे विनाशीलानिजानुवर्तिनी ॥ १२८ ॥
पदे पदे स्फुरन्तीभिर्विचार्याभिर्भूरिभिः ।
वार्द्धिभिः कृतिभीर्नूतनार्थैः भगवता ॥ १२९ ॥
रत्नाभमध्यवर्तिन्या सुरत्नाभ्यार्थिरूपया ।
अनन्यपुण्यसम्प्राप्यधनानुगामया ॥ १३० ॥

धीदेव्या जिनमर्चन्त्या हृद्यं पद्महृदं हृदम् ।
स्वप्ने ऽपश्यद्विमाने सा नृत्यद्धंसाचलोर्मिकम् ॥ ३३१ ॥
त्रिभिर्विशेषकम् ॥

स्वप्नं मेऽस्य प्रमोदेन यान्भेजे पुलकाङ्कुरान् ।
तैरेवाह्लीकनाह्लीयं मधुदारूपस्थितिं प्रति ॥ ३३२ ॥
सो ऽपि व्याख्यत्प्रियं पुत्रः श्रेयाञ्श्रीमान्महागुणः ।
त्वदङ्गजो जिनाधीशभक्तस्तव भविष्यति ॥ ३३३ ॥
श्रीनाथ धर्ममभ्यासी धन्यार्हद्ध्यानमानसा ।
दूरविद्राणनिद्रा तं निशाशेषमवाहयत् ॥ ३३४ ॥
तस्मिन्नह्नि विनिष्कुल्य कर्म ग्रामान्तराधिकम् ।
क्रयविक्रयतो लाभं स लेभे द्विगुणं वणिक् ॥ ३३५ ॥
इति व्यवहृतिक्रीडावर्धमानधनः क्रमात् ।
सुधर्मः सुखलेशानां प्रथमातिथितां गतः ॥ ३३६ ॥
धन्यायास्तनुकान्त्यैव गर्भो ऽथ पुपुषे शुभः ।
शारदाम्भोदलेखायां गर्भस्थ इव भानुमान् ॥ ३३७ ॥
सीमन्तोन्नयने विधाविन्मार्गैः सो ऽन्यदा वणिक् ।
पादाङ्गुष्ठेन गेहान्तर्विलसो व्यलिखन्महीम् ॥ ३३८ ॥
तदुल्लेखनस्थानायां स च स्थायां व्यलोकयत् ।
कान्तकल्याणमाणिक्यमण्डलैरानिले बिलम् ॥ ३३९ ॥
निस्समानन्दसंरम्भी मणिहर्म्यमयं वणिक् ।
अगारं कारयामास पाश्रावासवसथः ॥ ३४० ॥
रूपलास्ये ऽप्सरस्तुल्यो दास्ये विनयवामनः ।
तस्य सद्मनि दासीनां संघः संघटितस्तनः ॥ ३४१ ॥
तस्मिन्दागारि दातव्यपणिचालन्दर्शनात् ।

दातारो ऽप्यर्थितां जग्मुः सीमन्तोन्नयनोत्सवे ॥ ३४२ ॥
कूपं जलेष्विव बिलं स्वर्णरत्नगणेषु तत् ।
कृप्यमाणेष्वपि वणिक् पूर्णमेव न्यरूपयत् ॥ ३४३ ॥
तद्भूतिमुदिता चिन्तासमकालाप्तदोहदा ।
सुमुहूर्ते ऽद्भुतं धन्या सुखेन सुषुवे सुतम् ॥ ३४४ ॥
दानाभिनयेन गीतादिचारुत्वेन स च व्यधात् ।
सुतजन्मोत्सवे श्रेष्ठी विस्मयं सुसदामपि ॥ ३४५ ॥
लक्ष्मीपुञ्जमिवालोक्य तं सुतं कान्तिभिः पिता ।
महेन महता लक्ष्मीपुञ्जनामानमातनोत् ॥ ३४६ ॥
कालकालोचितैर्भोगैरार्तिनोपस्थितैः शिशुः ।
अज्ञातचिन्तादुःखो ऽयं कामं कामवदैधत ॥ ३४७ ॥
अस्पृष्टक्लेशलेशमप्यर्थोऽदीप्त कदाप्यसौ ।
नित्यानन्दस्मितमुखः पित्रोः सुखकरो ऽभवत् ॥ ३४८ ॥
कलाः प्रतिदिनं शुक्लकृता ऽप्युडुपतेः सिताः ।
दधिस्तांमननुः सोम इवार्धेन हरिमपः ॥ ३४९ ॥
तत्रादिकल्पमप्रश्रीकन्यागुणगणोदधेः ।
कन्याप्नमागमपत्री दिग्भ्यो ऽभूतः स्वयंवराः ॥ ३५० ॥
नित्य रत्नाल्ये भीतो दर्शनस्पर्शनादिभोः ।
नासुप्तन स्वकरं [illegible] नमितस्तनतिष्ठिपोः ॥ ३५१ ॥
यत्कर्णोनिकरं सर्वं स तत्कुप्पमुकवान् ।
यत्कुन्यकरं तत्स्वप्नेऽपि सत्यापि न ॥ ३५२ ॥
दिव्याभिभेव संदृष्टकृतगीतादिसिद्धः ।
कार्यं पात्रं स नार्थाति यथोपितगुणी यथा ॥ ३५३ ॥
सर्वभक्तिताः कुर्वा भोगाः स्पृशंश्चेति कदाप्यसौ ।

अङ्के प्रसुप्तः कान्तानां गुर्वी यावदचिन्तयत् ॥ ३५४ ॥
तावद्दिव्यतनुर्दिव्यचीराभरणभासुरः ।
कश्चित्पुमान्पुरः स्पष्टीभूय बद्धाञ्जलिर्जगौ ॥ ३५५ ॥
॥ युग्मम् ॥

धन्याङ्कशिरोरोहंस गृहं सर्वश्रियां गृहन् ।
विद्यते विपदां दूरं मणिपूरं महापुरम् ॥ ३५६ ॥
तत्रासीत्सार्थपः पुण्यधरो गुणधराभिधः ।
सोऽन्यदा विमलाख्यस्य मुनेः पार्श्वे वने ऽगमत् ॥३५७॥
जन्तोः स्याद्दुःखदं द्रव्यहरणं मरणादपि ।
अथ सुकृतिभिः कार्यं चौर्यचर्याविमोचनम् ॥ ३५८ ॥
एवमाकर्ण्य पुण्यात्मा स विद्याधरसंसदि ।
अदत्तादानविरतिं व्यधाच्च तदा मुदा ॥ ३५९ ॥
पुरं मासः कदाप्येष विशेषधनकाङ्क्षया ।
देशान्तराय कर्मैविद्भूरिभाण्डभरो ऽचलत् ॥ ३६० ॥
स्वदेशान्ते महाटव्यामस्मिन्सार्थे विलम्बय ।
अश्वारूढः कचित्लीटपदद्वण्डे भ्रमन्पुरः ॥ ३६१ ॥
दृष्टवान् पतितां स्वर्णकलशपूर्णां मणिमृगम् ।
व्रतभङ्गभयाचस्यां न मुर्दृष्टिमप्यदात् ॥ ३६२ ॥
युग्मम् ॥

किं सार्थो याति दूरे यच्छ्रूयते तुमुलो ऽपि न ।
इत्यर्मा जानहृदाहस्ततो वाहमवाहयत् ॥ ३६३ ॥
मार्गे हरिखुरोत्खाते स्वर्णपूर्णं स भूतले ।
ताम्रकुम्भं निभाल्याशु व्रतभङ्गभयापयौ ॥ ३६४ ॥
सहसाश्वे मृते पापभीरुः सो ऽचिन्तयत्तदा

मम वाहयतो वाहः भीतो ऽयं हतो ऽस्मि हा ॥ ३६५ ॥
य एनं जीवयत्यश्वं दद्दे तस्मै निजं धनम् ।
इति ध्यायंश्चचालांघ्रिचारेणैष त्वराभरात् ॥ ३६६ ॥
तृषातुरस्तरौ बद्धां वीक्ष्य वारिभृतां दृतिम् ।
कस्येयं दृतिरित्युच्चैरुच्चचार मुहुर्मुहुः ॥ ३६७ ॥
दूरे गतस्य वैद्यस्य विभोर्वीक्षितुमौषधम् ।
नैवाहं ज्ञापयिष्यामि पिब तन्निर्मलं जलम् ॥ ३६८ ॥
इत्यसौ शाखिशाखाग्रपञ्जरस्थशुकाननात् ।
आकर्ण्य कर्णौ पाणिभ्यां प्रच्छाद्य शुकमभ्यधात् ॥ ३६९ ॥
युग्मम् ॥

तृष्णा गृह्णातु मे प्राणांस्तेनादत्तं पुनः पयः ।
न पिबामि महापापमदत्तादानमुच्यते ॥ ३७० ॥
शाखाग्रादुपसंहृत्य शुकरूपं सपञ्जरम् ।
उत्तीर्याग्रेचरः को ऽपि नरः स्मित्वा मुदावदत् ॥ ३७१ ॥
वैताढ्ये विपुलापुर्यां भूपाख्यः खेचरो ऽस्म्यहम् ।
स्वपुरे विशदं तावं मुनिं नन्तुं वने ऽगमम् ॥ ३७२ ॥
ममासंख्यधनस्यापि परद्रव्ये हृते गुरुम् ।
अतो मामप्युद्दिश्यादिदेशाम्लेयवर्णनाम् ॥ ३७३ ॥
अदत्तादानविरतिस्वरूपां यके तु तद्गुरुः ।
गिरं चिन्तितवानस्मि तदा सम्मयविस्मयः ॥ ३७४ ॥
दूरं देशं विगन्त्येते सार्थपाः श्रीमचापिनः ।
नाहि एतं गुणेनाप्यदत्तं नैव हरन्त्यमी ॥ ३७५ ॥
तदहत्वं करिष्ये ऽस्य सार्थपस्य परीक्षणम् ।
मत्स्येन मया सानि भस्मारण्यप पत्तनात् ॥ ३७६ ॥

नृत्य रत्नमालां ते निधिं चाहमदर्शयम् ।
न जितस्त्वं तु लोभेन वस्तूनां महतामपि ॥ ३७७ ॥
कृत्वा चाहं मृतं पादगत्या तृष्णातुरस्य ते ।
मयाम्भो दर्शितं नीतं कीरमेरणयान्वितम् ॥ ३७८ ॥
कार्ये पर्यन्तमे मेऽद्य प्राणरसगलत्क्षणे ।
लोभेन न पराभूतस्त्वमल्पस्यापि वस्तुनः ॥ ३७९ ॥
तमित्युक्त्वा निजान्सूर्यः खेचरानयमाह्वयत् ।
तत्राभीरमहस्यास्ते बभूवुः मर्कटाः पुरः ॥ ३८० ॥
एभिः सूर्यः समानीय मणिमालां निधिं हयम् ।
अन्यच्च प्रचुरं द्रव्यं सार्थपस्य पुरोऽमुचत् ॥ ३८१ ॥
मथनाढ्यं तथा सार्थं सार्थपाविरहार्दिते ।
स निनाय जनप्रीतिकरं गुणधरं क्षणात् ॥ ३८२ ॥
किमेतद्धनमित्युक्तः सार्थपेनाथ सोऽवदत् ।
किंचिन्मदीयं किंचिच्च कौतुकाज्जनतो हृतम् ॥ ३८३ ॥
चौर्यं तानस्य राजपर्वौधमुक्तं न यन्मया ।
तत्त्वद्धनावलोकेन स्वयमेवाद्य तत्त्यजे ॥ ३८४ ॥
इत्थं त्वं मे गुरुस्तत्ते ऽर्थायामेतद्धनं कृतम् ।
इति जल्पन्तं विद्याधरं गुणधरो ऽभ्यधात् ॥ ३८५ ॥
धनं यस्य हृतं यत्तत्तस्मै देहि समग्निछिद्रे ।
इत्युक्तस्तत्तथा चान्यं सूर्यश्चक्रे स्वसेवकः ॥ ३८६ ॥
गृहाणेदं धनं मे त्वमिति जल्पंश्च खेचरः ।
अमाणि सार्थपेन स्वं मुक्त्वा सर्वस्वमग्रतः ॥ ३८७ ॥
स्वीकुरु त्वमिदं वित्तं मन्मयेति प्रतिश्रुतम् ।
यो मेऽश्वं जीवयत्येनं तस्मै सर्वं ददे धनम् ॥ ३८८ ॥

किंच पात्रं न दानार्हमहं तत्ते धनं शुभम् ।
न गृह्णामीति जल्पन्तं सार्थपं खेचरो जगौ ॥ ३८९ ॥
॥ त्रिभिर्विशेषकम् ॥
अहं त्वदुपदेशस्य नेहानृण्यं भवे भजे ।
तस्त्यपायाकृते कार्ये कथं गृह्णामि ते धनम् ॥ ३९० ॥
मद्धनं त्वं न गृह्णासि नाददे ऽहं तु ते धनम् ।
ततः सार्थेश कः स्वामी श्रियामासां भविष्यति ॥ ३९१ ॥
सो ऽप्याह धर्म एवैकः प्रभुस्त्रिभुवनश्रियाम् ।
न्यस्ते यस्मै प्रदत्ते स तस्य तस्य भवन्ति ताः । ३९२ ॥
तदेहि यावः सर्वत्र धर्मे सर्वज्ञदर्शिते ।
विश्वस्वामिनि विन्यस्य कृतार्थां कुर्वहे श्रियम् ॥ ३९३ ॥
वचस्यङ्गीकृते तेन खेचरेण प्रमोदिना ।
ददतुर्मुदितौ वित्तं सप्तक्षेत्र्यामुभौ शुभौ ॥ ३९४ ॥
ततो गुणधरः क्षित्वा भवं धर्मः सुखादसौ ।
लक्ष्मीपुञ्ज प्रभापुञ्ज पुण्यपुञ्जो भवानभूत् ॥ ३९५ ॥
सच्छिक्षयैव सूर्यो ऽपि व्यक्तस्तयो धनं ददत् ।
पूर्णायुः पुण्यमानेन जातो ऽस्मि व्यन्तराधिपः ॥ ३९६ ॥
त्वद्भाग्यदेवताशक्तिलुब्धो गर्भात्प्रभृत्यपि ।
अपूरयं रयात्ते ऽहं कालकालोचितं हितम् ॥ ३९७ ॥
इति व्यन्तरयागन्ते मूर्छामाप्य प्रबोधभाक् ।
संजातजातिस्मरणो लक्ष्मीपुञ्जः परं मुदाम् ॥ ३९८ ॥
विशुद्धं धर्ममाराध्य लब्ध्वा देवत्वमच्युते ।
स्तुत्यं वितत्य मर्त्यत्वं श्रेयःश्रियमशिश्रियत् ॥ ३९९ ॥
॥ युग्मम् ॥

तत्प्रभो तत्प्रमोल्लासनिर्विलासमनोभुवे ।
रतिनिर्जयिनीं कामं तामङ्गीकुरु सूनवे ॥ ५५२ ॥
तं भूपभुत्सवाभोगाचां कन्यां वरन्नभतः ।
दौत्यसाफल्यतो मां च स्वामिन्ननुगृहाण नन् ॥ ५५३ ॥
इदं वादिनि दूते ऽस्मिन्नानन्दी मेदिनीपतिः ।
सिंहश्रेष्ठिमुखाम्भोजे न्यस्तनेत्रयुगो जगौ ॥ ५५४ ॥
नाथयोरन्तरं किंचिदमुपादाय नन्दनम् ।
व्रज नागपुरं धन्यो संबन्धो ऽयं विधीयताम् ॥ ५५५ ॥
अनर्थदण्डाद्दुदण्डाद्दूतः स चक्रिनः कृती ।
किंचिन्यश्चन्नुग्वः सिंहो नोत्तरं नृपतेर्ददौ ॥ ५५६ ॥
किंचित्कोपकडाराक्षस्ततः क्ष्मादयितो ऽवदत् ।
संबन्धो ऽयं न किं साधुर्यद्दत्से मित्र नोत्तरम् ॥ ५५७ ॥
अथ पृथ्वीपतिं कोपकणाङ्कमवलोकयन् ।
वाचलां कलयामास सिंहः पीयुषपेशलाम् ॥ ५५८ ॥
न योजनशतादूर्ध्वं व्रजामीति व्रतं मम ।
अतस्तु योजनशतं सार्धं नागपुरं पुरम् ॥ ५५९ ॥
तदहं न विवाहे ऽस्मिन्व्रजामि व्रतभङ्गभीः ।
एवंविधेषु कार्येषु दिश्यन्ते न च मादृशाः ॥ ५६० ॥
इत्युक्तिघृतहोमेन ज्वलत्कोपमहानलः ।
तज्ज्वालाजालसंतप्तामिव भूपो ऽभजद्गिरम् ॥ ५६१ ॥
स्याद्गन्तुं यत्र मे युक्तं मया तत्र निदिश्यसे ।
कार्यं तदप्यदेश्यं ते तन्महामहिमासि भोः ॥ ५६२ ॥
न यासि योजनशतादूर्ध्वमित्यस्ति ते व्रतम् ।
सहस्रयोजनेभ्यो ऽग्रे त्वां मोक्ष्याम्यौष्ट्रिकैस्ततः ॥ ५६३ ॥

सिंहः श्रुत्वेत्यथ क्रोधाद्विपविदितम्मिनः ।
ऊचे अग्नौ तृणां पत्युः मत्युत्पथपतिः कृती ॥ ५६४ ॥
स्वापिमगरपानस्ने निरहं निरहंकृतिः ।
अपतर्पमुनराण्येव देवादेशः शिरोमणिः ॥ ५६५ ॥
नृपः मीनो ऽथ नद्वाणा विवादाय व्यदाग्यत् ।
महासैन्यपरामन्त्रिमहामस्युतं गुरुम् ॥ ५६६ ॥
पृथग्भूतमिवात्मानं सुहृदं हृदयमिणम् ।
नृसिंहः सिंहपराक्रोशय सर्वशिल्पागुरुम् ॥ ५६७ ॥
कृतपापग्मनः सिंहो गुरुर्मनगवाग्भरः ।
अप्रोद्यत्तुपारस्य संसारावासरासनाम् ॥ ५६८ ॥
व्यक्तमुक्तिवधूलोभः शोभमानः श्रियोऽथ सः ।
तृणवद्रणपापान महीवासवनन्दनः ॥ ५६९ ॥
कृतव्यालोपरः श्रेष्ठी त्रिविरामग्रसंस्थितः ।
न योजनशतादूर्ध्वं स प्रयाणमकारयत् ॥ ५७० ॥
यामाविरमाम्नानेषु पञ्चपेषु दिनेष्वथ ।
कुमारमृनुः गणिका रहसि महत्त्विरः ॥ ५७१ ॥
याभां कुमापि सिद्धर्थेविपेशनि विविक्तस्नान् ।
महत्याशपि दुर्बन्मो न मृगमपगाधिनः ॥ ५७२ ॥
इत्यभ्यानानिपदृमं प्रयाणसमये नृपः ।
महत्दमाप्यपुना सिद्धे याभो नागपुरं न किम् ॥ ५७३ ॥
॥ युग्मम् ॥

इत्याप्तवाक्यः सांधिवानथाह नृपनन्दनः ।
स्वः सर्वस्यमिदं यावा नाथ निर्जितमेव मदि ॥ ५७४ ॥
अथवान्ते महीसान्तमन्या सन्मानसाधिपम् ।

वचो ऽवोचत सिंहस्य पुरो धर्मकलागुरोः ॥ ५७५ ॥
धर्माम्बुधिसुधाधामा सिंहनामा महामतिः ।
ततः कुमारमारब्धसंसारअमनो ऽभ्यधात् ॥ ५७६ ॥
नेदं मे ऽङ्गमपीत्युक्त्वा भूतले मनिर्लेखिने ।
पतित्वा पादप इव प्रस्थिरात्रयवग्रजः ॥ ५७७ ॥
शुचौ कचिद्वनोद्देशे पादपोपगमाभिधम् ।
ग्रहीष्यामि व्रतं तच्चे वद्ध्व नेष्यन्ति किं मम ॥ ५७८ ॥
॥ युग्मम् ॥
इत्युक्त्वा सिंहवत्सिंहः काननं निशि जग्मिवान् ।
त्वमेव मे गतिरिति क्ष्मापजो ऽप्यनु तं ययौ ॥ ५७९ ॥
निशान्ते तावपश्यन्तः शयनादिषु मन्त्रिणः ।
पदश्रेण्यनुसारेण ध्रुवं भूरितरां ययुः ॥ ५८० ॥
तौ गृहीतपरिग्रज्यौ पादपोपगमस्थितौ ।
नित्यव्योमश्रमश्रान्तौ सूर्या मृगाङ्काविव ॥ ५८१ ॥
कचिच्छैलतले वीक्ष्य वैलक्ष्यकलुषाननाः ।
मन्त्रिणः प्रणिपत्योचुश्चद्रूचयमयं वचः ॥ ५८२ ॥
क्षम्यतामपराधो नः सकृद्भक्तिपटूकृतः ।
उत्तिष्ठतं द्रुतं यामः स्वामिनी नागपत्तनम् ॥ ५८३ ॥
मत्वा वृत्तमिदं भूपः कुप्यन्यन्त्रे तिलानिव ।
दुःखयन्त्रमतनूनस्मान्सान्वयान्पीलयिष्यति ॥ ५८४ ॥
तत्कृपाब्धी कृपां कृत्वा पश्यतं जल्पतं च नः ।
दृग्भिः प्रसादसार्द्राभिः स्मितधौताधरैर्मुखैः ॥ ५८५ ॥
व्यर्थीभूयाय सचिवैरित्यादिचटुवादिभिः ।
स्वरूपमाशु भूपस्तज्ज्ञापितः सत्वरैश्चरैः ॥ ५८६ ॥

यद्भ्यो विवादस्तत्तुजः सिंहो वध्यस्तु वैरिवत् ।
इति क्रुध्यन्नृपो ऽप्यागाद्वाहनैर्वेगवत्तरैः ॥ ५८७ ॥
देहृग्विरुद्धपुद्दिष्टौ ददर्श महामुनी ।
सेव्यमानपदौ व्याघ्रद्वीपिसिंहादिजन्तुभिः ॥ ५८८ ॥
प्रभाविनाविमौ नयौ न परापवितुं बलात् ।
भक्त्यैव साध्यावित्यन्तर्ध्यायन्राजा जगाम तौ ॥ ५८९ ॥
श्वापदैर्दत्तमार्गौ तं मार्गन्तं वीक्षणान्यपि ।
नमन्तं चटुमन्तं च नेक्षांचक्रतुरप्यमू ॥ ५९० ॥
तौ तु मासोपवासान्ते दृश्यमानौ सुराङ्कुरैः ।
शुद्धध्यानवशीभूतां भेजाते मुक्तिवल्लभाम् ॥ ५९१ ॥
न योजनशतादूर्ध्वं यामीति मम निश्चयः ।
असंख्यैर्योजनैर्मित्र मां मुक्त्वा किंगताः शिवम् ॥ ५९२ ॥
इति क्रन्दन्नृपः सिंहनाम्नो मित्रस्य विग्रहम् ।
पुत्रस्य चाग्नौ चिक्षेप स्वं च शोकमहानले ॥ ५९३ ॥
तयोः सख्यातिरेकोत्था विबुधैर्बोधितस्ततः ।
धर्मकर्मठधीः प्राप स्वपुरं भूपुरन्दरः ॥ ५९४ ॥
वरं तत्याज यः प्राणान्न पुनः स्वीकृतं व्रतम् ।
स सिंह इव सेवध्वं जना दिग्विरतौ रतिम् ॥ ५९५ ॥

॥ इति दिग्विरतिविचारे सिंहकथा ॥

यद्भोग्यमुपभोग्यं च पारिमित्येन रूप्यते ।
भोगोपभोगमानाख्यं तद्द्वितीयं गुणव्रतम् ॥ ५९६ ॥
सुकृतश्रीनिवासैकसरोजं समयं व्रतम् ।
चित्रमत्र परत्रापि सुखीकुरुते मनः ॥ ५९७ ॥
कृती मितीकृताहारः सप्तप्रनन्दीव्यथा ।

मुच्यते संचितेनापि कर्मरोगेण धर्मवत् ॥ ५९८ ॥

तथाहि सिद्धं साहित्यमिव विद्यासु मानुषम् ।
नगरीषु गुरुश्रीकमस्ति श्रीकमलं पुरम् ॥ ५९९ ॥
तत्राजनिष्ट राजेन्दुः सत्याख्यो राजशेखरः ।
कालरात्रिरिवादर्शो यदसिर्ददृशे ऽरिभिः ॥ ६०० ॥
सकलैः स कलापात्रैः सात्रैरिव गुणैः श्रितः ।
कस्य कस्य नमस्यत्वं भूभुजङ्गो न जग्मिवान् ॥ ६०१ ॥
संभावि भुवि दुर्भिक्षं देव द्वादशवार्षिकम् ।
इत्येकदा पुरस्तस्य ज्योतिःशास्त्रविदो ऽवदन् ॥ ६०२ ॥
सर्वथा नान्यथादृष्टगिरामेषां मनीषिणाम् ।
चकम्पे वचसा तेन स वातेन तृणं यथा ॥ ६०३ ॥
रौप्यकाञ्चनरत्नादिसर्वस्वव्ययतस्ततः ।
कणानां च तृणानां च स चक्रे संग्रहं बहुम् ॥ ६०४ ॥
अथान्नसंग्रहव्यग्रे समग्रे ऽपि जने ऽभितः ।
विवेश मध्ये देशस्य कापि दुर्भिक्षवर्णिका ॥ ६०५ ॥
अन्नसंग्रहविक्रीतसर्वालंकरणो जनः ।
फाल्गुनच्युतपत्रालिशालजालयदाबभौ ॥ ६०६ ॥
निर्धान्या निर्धनाः काश्चिद्विपत्स्यन्ति प्रजाः मे ।
शुचेत्यचिन्तयद्राजा प्राजापत्येन रञ्जितः ॥ ६०७ ॥
इति नित्यं ज्वलच्चिन्तातप्तस्योर्वीशितुर्मुदे ।
आषाढस्याथ पक्षादि पौरस्त्यपवनो ववौ ॥ ६०८ ॥
अथाङ्कुर इव प्राच्यां सुभिक्षफलशालिनः ।
अभ्युदस्य ववो ऽदर्शि मुदितेन महीभुजा ॥ ६०९ ॥
... जन्मभूरयः ।

पुरे पुरिमतालाख्ये नरः भवर इत्यभूत् ।
महारोगैः पराभूतः स युवापि स्वकर्मतः ॥ ६२२ ॥
सोऽप स्वाद्यं रसस्वादविलोलरसनारसः ।
जग्राह यं यमाहारं विकारमकरोत्स सः ॥ ६२३ ॥
सो ऽथ दध्यौ न आहारः शरीरारतिकारकः ।
प्रत्याख्यानादनाहारफलं किं तस्य नाददे ॥ ६२४ ॥
शूकासंकोचितदृशो भजन्ति सुदृशो न माम् ।
ताः प्रत्याख्याय किं साक्षात् गृह्णे मर्त्यताफलम् ॥ ६२५ ॥
इत्युज्ज्वलीकृतमतिर्मनिमार्गां मतल्लिका ।
गुरुर्गुणगुरूनेष साक्षीकृत्येदमब्रवीत् ॥ ६२६ ॥
स्निग्धाम्लमधुरक्षारानाहारानाहमाहरे ।
कटुतिक्तकषायांस्तु गृह्णाम्यूनोदरस्थितः ॥ ६२७ ॥
पदामत्तास्वगन्धमुक्तिर्शीर्षेक्षते ऽपि न ।
ताः प्रत्याख्यापि वामाक्षीर्भवाम्भोराधिदेवताः ॥ ६२८ ॥
इत्यादतं व्रतं सम्यग्विनाल्पः पाल्यमपम् ।
क्रमेण मुमुचे रोगैस्तस्मात् मुक्तमस्य किम् ॥ ६२९ ॥
तदसुभस्यतं धीरं नीरोगत्वं गतो ऽपि सः ।
क्रमेणाभूद्विमूर्तीनां प्रभूतानामपि प्रभुः ॥ ६३० ॥
तद्दृष्टे व्ययमन्तराय्यः स्मरत्याम्यल्पसूनुः ।
स्वर्गवेश्या इव स्वर्गसुन्मुण्यात्माभिभूतिकम् ॥ ६३१ ॥
स॰मयपगुणमात्मानाग्रहमस्मभयस्थितः ।
नाग्रहं किंचैः तेहे सर्प्यन्द्रियगतः स तैः ॥ ६३२ ॥
यावर्वा मार्गरोगीर्भवेन यमस्य निस्पृहः ।
पर्याः वाचर्यानिन्दरासमार्गवर्तेन मनु ॥ ६३३ ॥

अप्रार्थविग्रहव्ययपितृमातृसुतोद्गतम् ।
एकदा रङ्कदुःखेशं दुर्भिक्षं समभूद्भुवि ॥ ६३४ ॥
विलीनं दानिनां दानैस्तदानं ववृधे नदा ।
ग्रीष्मे सरोम्भः शुष्येत स्याद्वृद्धाविस्तु वारिधिः ॥ ६३५ ॥
दुर्भिक्षभीरुभिर्भेजे स एवैको जगज्जनैः ।
सर्वज्ञदिष्टः संसारभीतैर्धर्म इवाभितः ॥ ६३६ ॥
प्रासुकैः पेयपक्वान्नदधिदुग्धघृतादिभिः ।
स दिगन्तागतान्साधूंल्लुब्धः सत्पात्राभयत् ॥ ६३७ ॥
पितृमातृमुखीकृत्य श्राद्धानन्यान् वचःक्रमात् ।
प्रत्यहं स्वहं पयोधैरसंख्यानानभोजयत् ॥ ६३८ ॥
इत्यखण्डव्रतः श्रीमान्भवरस्तु वरस्तुतिः ।
दानैककल्पसन्नः कालयोगतस्त्रिदिवं गतः ॥ ६३९ ॥
शाश्वतार्हन्महायात्रानित्यनिर्माल्यधर्मधीः ।
पूर्णायुर्धिल्लयामास स वासवसमः गुरुः ॥ ६४० ॥
श्राद्धो युगप्रधानोऽस्ति यः कश्चिद्भुवि तत्सुतः ।
भूपालं सार्वभौमोऽपि मा भूत्वं कन्दरे कुले ॥ ६४१ ॥
इतश्च चित्रशालाख्ये लम्पुरोपपुरे पुरे ।
श्राद्धोऽस्ति शुद्धबुद्धाख्यो विमलात्मा मनःप्रियः ॥६४२॥
द्वादशव्रतनिष्पीतपात्रनोऽऽत्मजीवितः ।
ईदृग्दुर्भिक्षवेलायामपि न चक्रे योऽसमंग्रहम् ॥ ६४३ ॥
देवस्तस्य प्रियाकुक्षिमाप शुभस्वप्नसूचितः ।
साऽसूत सती पुत्रं पवित्रं प्रशस्ते दिने ॥ ६४४ ॥
महाभाग्यवतो जन्म तस्य जित्वाशु दुर्धरान् ।
बभञ्ज यत्र दुर्भिक्षमपि द्वादशवार्षिकम् ॥ ६४५ ॥

इति श्रुत्वाद्भुतमीतिर्नत्वा केवलिनं नृपः ।
तत्राशु गत्वा तं बालं भाले न्यस्येदमूचिवान् ॥ ६४६ ॥
दुर्भिक्षमज्जज्जगदुद्धारधीर नमो ऽस्तु ते ।
राजा त्वमेव मे राज्ये तत्पारक्षो ऽस्मि तावकः ॥६४७॥
मूर्तिमानिव धर्मो ऽयमित्यं दुर्भिक्षभङ्गकृत् ।
इति तस्याभिधा धर्म इति धात्रीभृता कृता ॥ ६४८ ॥
चरैर्मत्वेदमन्ये ऽपि भूभुजः स्वस्वभूमिषु ।
धर्माज्ञां वर्तयित्वाशु वर्षयामासुरम्बुदान् ॥ ६४९ ॥
वयःकालोचितैश्चित्रैः माभृतैः सर्वभूभुजाम् ।
अश्रान्तानन्दसंदर्भैः सो ऽर्भकः समवर्धत ॥ ६५० ॥
समस्तभूभृतां पुत्र्यः सकलाः कमलेक्षणाः ।
पतिंवरास्तमाजग्मुः समुद्रमिव निम्नगाः ॥ ६५१ ॥
धर्मः समग्रभूगोल्लोलाज्ञो गुरुभक्तिभाक् ।
धर्मी कर्माण्यसंचिन्त्यन्संभोगान्बुभुजे ऽद्भुतान् ॥ ६५२ ॥
भुक्तभोगस्त्वसौ योगवल्मुज्ज्वलमाश्रितः ।
उत्पन्नकेवलज्ञानमहिमा मुक्तिमाप्तवान् ॥ ६५३ ॥
इति धन्यस्य धर्मस्य भवद्वयनिदर्शनात् ।
जितसंपत्तिसंपातैः सेव्यतां सप्तमं व्रतम् ॥ ६५४ ॥

इति भोगोपभोगव्रतविचारे धर्मनृपकथा ॥

रौद्रार्तध्यानपापोपदेशाप्रमादिताः ।
अनर्थदण्डस्त्यागः स्यात्तृतीयं गुणव्रतम् ॥ ६५५ ॥
अनर्थदण्डधीरासमव्रतधीरा महोदयम् ।
लभन्ते शुभसंभारभासुराः सुरसेनवत् ॥ ६५६ ॥
तथाहि देवपुर्व्योयहत्पार्थ्यर्मधुर्यैर्मुहुः ।

गीतनृत्यैर्निरन्तं धीबन्धुरा बन्धुरा पुरी ॥ ६५७ ॥
श्रीवीरसेन इत्युर्वीसेनाशिरोमणिः ।
गुणैः पवित्रितस्तस्यामस्यामजनि भूधवः ॥ ६५८ ॥
अन्तरारिमदोषेषु धर्मकार्याद्भुतौ सुतौ ।
सुरसेनमहासेनौ तस्याभूतामुभौ शुभौ ॥ ६५९ ॥
उपमानोपमेयत्वमभिधानाभिधेयता ।
रूपे च साहचर्ये च व्यधायि न तयोर्मिथः ॥ ६६० ॥
इतौ सहस्रयोधेषु वाहे मोहादिमर्दने ।
अग्रण्यौ मर्यादिप्रेषु तौ धर्मस्य व्यराजताम् ॥ ६६१ ॥
अजायत रसज्ञायामन्येद्युः श्वयथुः पृथुः ।
अकस्माद्विस्मयकरो महासेनस्य दुःसहः ॥ ६६२ ॥
उपचारैश्च प्राघूर्णवा मन्दीभवमुपागतः ।
वर्धते येन येनापि निदाशोफः सत्योऽभवत् ॥ ६६३ ॥
औषधं धर्म एवास्य शुक्रमत्युक्तपस्ततः ।
तं वैद्या मुमुचुर्निःस्वं भुजङ्गं गणिका इव ॥ ६६४ ॥
क्रमेण कुथिना तस्य रसज्ञा राजजन्मनः ।
मक्षिकाणामनिर्वारगम्यागारत्वमाययौ ॥ ६६५ ॥
उग्रदुर्गन्धभूः कान्तापितृमातृभिरप्यसौ ।
चण्डालपाटक इवाध्वगैर्दूरादमुच्यत ॥ ६६६ ॥
तं तथाभूतमुद्वीक्ष्य भ्रातृस्नेहवशंवदः ।
दुर्गन्धं दुःसहं जित्वा सुरसेनः समीपगः ॥ ६६७ ॥
रोगोऽसौ यावदस्यास्ति न किंचित्तावदाहरे ।
म्रियते यद्यनेनैव म्रिये ऽनशनतस्ततः ॥ ६६८ ॥
इति व्यचिन्तयत् भ्रातृस्नेहे स दृढनिश्चयः ।

वीजयन्वसनान्तेन मक्षिका मुखपातिनीः ॥ ६६९ ॥

॥ त्रिभिर्विशेषकम् ॥

नमस्कारास्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः ।
ते मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥ ६७० ॥
सेके सेके व्यथाशान्तिर्विशेषं समजायत ।
क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥ ६७१ ॥
निर्व्यथं निर्व्रणं नोरुनिर्गन्धं च सुगन्धि च ।
मुहूर्तात्तन्मुखं जज्ञे क न धर्मः प्रभावभाक् ॥ ६७२ ॥
धर्मेणास्तः स रोगः प्राग्मुक्तो वैद्यगणेन यः ।
भानुच्छेद्यं तमश्छेत्तुं खद्योताः क किल क्षमाः ॥ ६७३ ॥
राहुमुक्तं रविमिव प्राक्पूर्वच्छविच्छटम् ।
सं रोगमुक्तं वीक्ष्याभूल्लोकः सर्वोऽपि सोत्सवः ॥६७४॥
विशेषतस्ततस्तौ धर्मभारे सहोदरौ ।
तौ बभूवतुरुल्लासौ शरदीन्दुभास्करौ ॥ ६७५ ॥
श्रीभद्रबाहुराचार्योऽवधिज्ञानमधिष्ठितः ।
कदापि तत्पुरोद्यानं धामिवेन्दुरभूपयत् ॥ ६७६ ॥
प्रदक्षिणात्रयेणोपश्रेमतुर्नेमतुश्च तम् ।
उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥ ६७७ ॥
सुरसे सुरसेनेन निपीते देशनामृते ।
अपृच्छयत गुरुर्भ्रातृरसनारोगकारणम् ॥ ६७८ ॥
स च प्रवचनक्षीरार्णववीचीनिभं वचः ।
उपाददे भवदवोद्भवक्लेशहरं गुरुः ॥ ६७९ ॥
भूभूषाभूतमाहूतपुरुहूतपुरप्रभम् ।
पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥ ६८० ॥

वत्समो सत्प्रभोल्लासनिर्विलासमनोभुवे ।
रतिनिर्जयिनीं कार्यं वामश्रीकुरु सूनवे ॥ ५५२ ॥
त्वं नृपपुत्रताभोगाढ्यां कन्यां वरलाभतः ।
दौत्यसाफल्यतो मां च स्वामिन्ननुगृहाण तत् ॥ ५५३
इदं वादिनि दूते ऽभिमानन्दी मेदिनीपतिः ।
सिंहश्रेष्ठिमुखाम्भोजे न्यस्तनेत्रयुगो जगौ ॥ ५५४ ॥
तावयोरन्तरं किंचिदमुमादाय नन्दनम् ।
व्रज नागपुरं धन्यो संबन्धो ऽयं विधीयताम् ॥ ५५५
अनर्थदण्डादुद्दण्डादतः स चकितः कृती ।
किंचिन्न्यग्भवन्मुखः सिंहो नोत्तरं नृपतेर्ददौ ॥ ५५६ ॥
किंचित्कोपकडारास्यस्ततः क्ष्मादयितो ऽवदत् ।
संबन्धो ऽयं न किं साधुर्यद्दत्से पि नोत्तरम् ॥ ५५७
अथ पृथ्वीपतिं कोपकणाङ्कमवलोकयन् ।
वाक्सुधां कल्पयामास सिंहः पीयूषपेशलाम् ॥ ५५८ ॥
न योजनशतादूर्ध्वं प्रजामीति व्रतं मम ।
अनन्तु योजनशतं सार्धं नागपुरं पुरम् ॥ ५५९ ॥
तदहं न विचारे ऽस्मिन्प्रभवामि व्रतभङ्गभीः ।
एवंविधेषु कार्येषु दिशन्ते न च मादृशाः ॥ ५६० ॥
इत्युक्तिघृतहोमेन ज्वलत्कोपमहानलः ।
नज्वालाज्वालमालं तश्चापिव भूपो ऽभनद्दिरम् ॥ ५६१ ॥
स्थाकुन्तुं यत्र मे युक्तं मया तत्र निदिश्यसे ।
कार्यं मदन्यदेशं ते तन्महामहिमाणि भोः ॥ ५६२ ॥
न यामि योजनशतादूर्ध्वमित्यस्मि ते व्रतम् ।
गद्यायोजनेभ्यो ऽग्रे त्वां मोचयाम्यधिरिदं तनः ॥५६३॥

सिंहः श्रुत्वेत्यथ कोपादवहित्थविहितस्मितः ।
ऊचे भ्रातो गृणां पत्युः प्रत्युत्पन्नमतिः कृती ॥ ५६४ ॥
स्वाधिपसहमानस्ते विरहं निरहंकृतिः ।
अकार्षमुत्तराण्येवं देवादेशः शिरोमणिः ॥ ५६५ ॥
नृपः प्रीतो ऽथ मद्वाचा विवाहाय व्यचारयत् ।
महासैन्यमहामन्त्रिमहाभटयुतं शुभम् ॥ ५६६ ॥
पृथक्पृथगिवात्मानं सुहृदं हृदयप्रियम् ।
नृसिंहः सिंहमकरोत्तत्र सर्वनियोगगुरुम् ॥ ५६७ ॥
कृतयात्रस्ततः सिंहो सुमहीवेगवाग्भरैः ।
अथोद्यत्कुमारस्य संसारावासवासनाम् ॥ ५६८ ॥
व्यस्तमुक्तिवधूलोभः क्षोभमानः श्रियो ऽत्र सः ।
तृणवद्गणयामास महीपालकनन्दनः ॥ ५६९ ॥
कृतव्यासोपरः श्रेष्ठी शिबिरावनिसंस्थितः ।
न योजनशतादूर्ध्वं स प्रयाणमचारयत् ॥ ५७० ॥
याम्याभिगामिभावनेषु पञ्चसु दिनेष्वथ ।
कुमारमूचुः सचिवा रहसि प्रहाद्रिरः ॥ ५७१ ॥
यामां कुत्रापि सिद्धेऽभिषेधानि विधिपसन्नात् ।
तस्मादपि कुर्वतो न नृपयत्नाधिनः ॥ ५७२ ॥
त्वत्स्नानविरहतं प्रयाणसमये नृपः ।
तद्दृष्टाप्यधुना सिंहे यामो नागपुरं न किम् ॥ ५७३ ॥
॥ युग्मम् ॥
इत्याकर्ण्य वचः सचिवानथाह नृपनन्दनः ।
यः कर्तव्यमिदं यात्रा याम निर्णीयते यदि ॥ ५७४ ॥
एवैतान्ते महीपालजन्मा मन्त्रानसांविदम् ।

ययौ ज्योतिः गिरिस्थ पुरीं पर्यन्तगामिनीः ॥ ५७५ ॥
पर्यन्त्यां गुणानामा गिरनामा महामतिः ।
ततः कुमारमाल्यर्गागमनमनो ऽप्यगात् ॥ ५७६ ॥
नैवं ये ऽद्भुतगौरान्मुग्धा मूलके मनिवेशिते ।
गलिता पादप इव मस्थिराराधनाः ॥ ५७७ ॥
शून्यां कचिद्वनोद्देशे पादपोपगमाभिधम् ।
ग्रहीष्यामि व्रतं नवे यद्वत्र नेप्यन्ति किं मम ॥ ५७८ ॥
॥ युग्मम् ॥

इत्युक्त्वा गिरिर्गिरिदः काननं निशि जग्मिवान् ।
त्वमेव मे गतिरिति स्मापतो ऽप्यनु तं ययौ ॥ ५७९ ॥
निशान्ते नागपत्तनः शयनादिषु मन्त्रिणः ।
पदश्रेण्यनुसारेण ध्रुवं भूरिनगं ययुः ॥ ५८० ॥
तौ गृहीतपरित्यक्तौ पादपोपगमस्थितौ ।
नित्यव्योमभ्रमश्रान्तौ शून्यौ सूर्योडुपाविव ॥ ५८१ ॥
कचिच्छिन्नतन्ने वीक्ष्य वैलक्ष्यकलुषाननाः ।
मन्त्रिणः प्रणिपत्योचुश्चटूद्गमयं वचः ॥ ५८२ ॥
क्षम्यतामपराधो नः सकटूक्तिपदकृतः ।
उत्तिष्ठतं द्रुतं यामः स्वामिनौ नागपत्तनम् ॥ ५८३ ॥
मत्वा वृत्तमिदं भूपः कुप्यन्नन्ते तिलानिव ।
दुःखरयामतनूनस्मान्सान्वयान्पीडयिष्यति ॥ ५८४ ॥
तत्कृपाब्धी कृपां कृत्वा पश्यतं जल्पतं च नः ।
दृग्भिः प्रसादसार्द्राभिः स्मितधौताधरैर्मुखैः ॥ ५८५ ॥
व्यर्थीभूयाथ सचिवैरित्यादिचटुवादिभिः ।
स्वरूपमाशु भूपस्तज्ज्ञापितः सत्वरैश्चरैः ॥ ५८६ ॥

यदृच्छा विशारदस्तनुजः सिंहो वध्यस्तु वैरिवत् ।
इति कुप्यन्नृपो ऽप्यागाद्वाहनैर्वेगवत्तरैः ॥ ५८७ ॥
ईदृग्विरुद्धबुद्धिस्तौ स ददर्श महामुनी ।
सेव्यमानपदौ व्याघ्रद्वीपिसिंहादिजन्तुभिः ॥ ५८८ ॥
प्रभाविनाविमौ शक्यौ न पराभवितुं बलात् ।
भक्त्यैव भाव्याविरयन्नध्यायन्राजा जगाम तौ ॥ ५८९ ॥
भार्यैर्द्वैतमार्गे तं मार्गन्तं वीक्षणान्यपि ।
नमन्तं चतुमन्तं च नेक्षांचक्रतुरप्यनू ॥ ५९० ॥
तौ तु मासोपवासान्ते त्यक्तप्राणौ मुनीश्वरौ ।
शुद्धध्यानवशीभूतौ भेजाते मुक्तिवल्लभाम् ॥ ५९१ ॥
न योजनशतादूर्ध्वं यातीति मम निश्चयः ।
अमंगलमयोजनेनापि मां पृच्छा किमगाः निरम् ॥ ५९२ ॥
इति क्रुद्धनृपः सिंहनाम्नो भिक्षस्य विग्रहम् ।
पुत्रस्य चाग्नौ चिक्षेप स्वं च शोकमहानले ॥ ५९३ ॥
तयोः सन्यासिरक्ततया विबुधैर्बोधितस्ततः ।
धर्मकर्मठधीः प्राप स्वपुरं भूपुरन्दरः ॥ ५९४ ॥
वरं तत्याज यः प्राणान्न पुनः स्वीकृतं व्रतम् ।
स सिंह इव सेवध्वं जना दिग्विरतौ रतिम् ॥ ५९५ ॥
॥ इति दिग्विरतिविचारे सिंहकथा ॥
यद्भोग्यमुपभोग्यं च पारिमित्येन गृह्यते ।
भोगोपभोगमानाख्यं तद्द्वितीयं गुणव्रतम् ॥ ५९६ ॥
गृहमध्यानिवार्यकर्मरोजं सदयं व्रतम् ।
विस्मय परस्यापि गुरवीकुरुते मनः ॥ ५९७ ॥
कृती मितीकृताहारः सहसजनानीन्यथा ।

मुच्यते संचितेनापि कर्मरोगेण धर्मवत् ॥ ५९८ ॥
तथाहि सिद्धं साहित्यमिव विद्यासु भासुरम् ।
नगरीषु गुरुश्रीकमस्ति श्रीकमलं पुरम् ॥ ५९९ ॥
तत्राजनिष्ट राजेन्दुः सत्याख्यो राजशेखरः ।
कालरात्रेरिवादर्शो यदसिर्ददृशे ऽरिभिः ॥ ६०० ॥
सकलैः स कलापात्रैः सात्रैरिव गुणैः श्रितः ।
कस्य कस्य नमस्यत्वं मृगुजङ्गो न जग्मिवान् ॥ ६०१ ॥
संभावि भुवि दुर्भिक्षं देव द्वादशवार्षिकम् ।
इत्येकदा पुरस्तस्य ज्योतिःशास्त्रविदो ऽवदन् ॥ ६०२ ॥
सर्वथा नान्यथादृष्टगिरामेषां मनीषिणाम् ।
चकम्पे वचसा तेन स वातेन तृणं यथा ॥ ६०३ ॥
रौप्यकाञ्चनरत्नादिसर्वस्वव्ययतस्ततः ।
कणानां च तृणानां च स चक्रे संग्रहं बहुम् ॥ ६०४ ॥
अथान्नसंग्रहव्यग्रे समग्रे ऽपि जने ऽभितः ।
विवेश मध्ये देशस्य कापि दुर्भिक्षवर्णिका ॥ ६०५ ॥
अन्नसंग्रहविक्रीतसर्वालंकरणो जनः ।
फाल्गुनच्युतपत्राढ्यशालजालवदाबभौ ॥ ६०६ ॥
निर्धान्या निर्धनाः कश्चिद्भविष्यन्ति प्रजाः क मे ।
शुचेत्यचिन्तयद्राजा प्राजापत्येन लज्जितः ॥ ६०७ ॥
इति नित्यं ज्वलच्चिन्तातप्तस्पोर्वीशितुर्मुदे ।
आषाढस्याथ एवाह्नि पौरस्त्यपवनो ववौ ॥ ६०८ ॥
अथाङ्कुर इव प्राच्यां सुभिक्षफलशालिनः ।
अभ्युदस्य भवो ऽदर्शि मुदितेन महीभुजा ॥ ६०९ ॥
भीरिवाभ्युदयप्राग्भारस्य जलभृद्वरः ।

अन्तर्धनातिपात्रं स प्राचीश्वरमुदा समम् ॥ ६१० ॥
अवग्रहप्रहान्विमुद्दृल्पा गर्जयन्निव ।
धन्याकाद्दर्भज्योनिर्विद्रा घाघो दर्शयन्निव ॥ ६११ ॥
दर्शनादेव दुर्भिक्षं द्विपं सिंह इव निर्दहन् ।
धाराम्बुजलसंपातैः स्यादुःस्वमिव खण्डयन् ॥ ६१२ ॥
अविच्छिन्नजलाकर्षणात्स्यन्द्यामरकार्मुकः ।
स ववर्षे महार्णवमकर्षाम्बुघनं घनः ॥ ६१३ ॥

॥ विभिर्विनोपक्रम् ॥

अन्योन्यसरसामाभिर्ज्योतिषद्मोपगतस्वन ।
इष्टधान्यैव निष्पन्नः काले इत्याश्रयजनः ॥ ६१४ ॥
कृतार्थां पृथिवीं कृत्वा लोकसन्तर्पणादिव ।
अम्भो ऽथ ताप्यगाद्देव धर्मेव परमां गतिः ॥ ६१५ ॥
निहतविन्यासेनापि ततः स्वापे परे ऽहनि ।
एत्य हर्म्यमलङ्काभ्यो जलपात्र्या व्यजिज्ञपत् ॥ ६१६ ॥
स्वद्वाने चतुर्मासवाससमागत्य तरधुपः ।
पुनन्धरमुनेर्यशोवित्तः केवलमुज्ज्वलम् ॥ ६१७ ॥
अथागमितमापूर्व पार्श्वैः पाणिनोपिवैः ।
आगात्याप जगामाथमकापमुहूनः पूर्णा ॥ ६१८ ॥
स त्रिः प्रदक्षिणीकृत्य प्रणिपत्य च तं मुनिम् ।
सद्धर्मदेशनां श्रुत्वा पप्रच्छेति कृताञ्जलिः ॥ ६१९ ॥
प्रभो ज्योतिर्विदो वेणावारहिरिवर्षं वदः ।
कथं विसंवादितं पृष्टदायक स दाह वेदर्भा ॥ ६२० ॥
द्वादशाधिक दुर्भिक्षं भवताद्दासवाहिकम् ।
कालेन न येनाभूत्तदर्ह वदतादरम् ॥ ६२१ ॥

पुरे पुरिमतालाख्ये नरः मदर इत्यभूत् ।
महारोगैः पराभूतः स पुराणि स्वकर्मतः ॥ ६२२ ॥
सैष स्वार्थं रसास्वादविलोलरसनारगः ।
जग्राह यं यथाहारं विकारमकरोत्स सः ॥ ६२३ ॥
सोऽथ दध्यौ स आहारः शरीरार्तिकारकः ।
प्रत्याख्यानादनाहारफलं किं तस्य नाददे ॥ ६२४ ॥
शूकासंकोचितस्तो भजन्ति मूढा न माम् ।
ताः प्रत्याख्याय किं साक्षान्न गृह्णे मर्त्यनाफलम् ॥ ६२५ ॥
इत्युज्ज्वलीकृतमतिर्मुनिभाजां मतल्लिका ।
गुरून्गुणगुरुत्वेन साक्षीकृत्येदमग्रहीत् ॥ ६२६ ॥
स्निग्धाम्लमधुरक्षारानाहारानाहमाहरे ।
कटुतिक्तकषायांस्तु गृह्णाम्यूनोदरव्रतः ॥ ६२७ ॥
यद्वासक्तान्नरान्मुक्तिरीर्ष्ययेवेक्षतेऽपि न ।
ताः प्रत्याख्यामि वामाक्षीर्भवाब्धेरधिदेवताः ॥ ६२८ ॥
इत्यादत्तं व्रतं सत्त्वविशालः पालयन्नयम् ।
क्रमेण मुमुचे रोगैरसाध्यं सुकृतस्य किम् ॥ ६२९ ॥
तदमुञ्चन्व्रतं धीरो नीरोगत्वं गतोऽपि सः ।
क्रमेणाभूद्विभूतीनां प्रभूतानामपि प्रभुः ॥ ६३० ॥
तद्गृहे व्यालसन्दास्यः स्मरलास्यलसद्दृशः ।
स्वर्गवेश्या इव स्वर्गभुग्भुजपालयविभूतिकम् ॥ ६३१ ॥
सत्संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः ।
नाक्रष्टुं विषयैः शेके तस्येन्द्रियगणः स तैः ॥ ६३२ ॥
आययौ मार्गकोटीभिर्धनं यत्तस्य नित्यशः ।
ययौ पात्रदयौचित्यदानमार्गत्रयेण तत् ॥ ६३३ ॥

अमार्थेत्रिग्रहव्ययपितृमातृगुणोदयम् ।
एकदा रङ्कदुःप्रेक्षं दुर्भिक्षं समभूत्क्वचित् ॥ ६३४ ॥
विलीने दानिनां दानेऽन्यदाने यशे सदा ।
ग्रीष्मे सरोऽम्भः शुष्येत स्यात्तदैवोचितं वारिभिः ॥ ६३५ ॥
दुर्भिक्षपीडितैर्भेजे स एकको जगज्जनैः ।
सर्वतदिष्टः संसारार्भानिर्वेदं इवाभिनः ॥ ६३६ ॥
मातृवैः पेयपानादिभिर्दुग्धपूनादिभिः ।
स शिशुर्नागतान्नाद्यैस्तनाः सन्यानमगात् ॥ ६३७ ॥
पितृमातृगुणीकृत्य धायकान्ते पयःप्रसात ।
सम्पर्ह गृहे पयोधिरसंन्यासानमोजयत् ॥ ६३८ ॥
इत्यवगतमनः श्रीमान्मघवन्धु वसुभूतिः ।
दानेशत्यमनः सात्मशोभनमिदिदं गतः ॥ ६३९ ॥
[illegible]
पूर्णाङ्गुलिर्नयामास स सागरगतः गुरः ॥ ६४० ॥
धात्री पुनमधानो ऽपि यः कथितुमि न गुणः ।
भूपाले सार्वभौमो ऽपि सा भुवं वस्तुं पुरे ॥ ६४१ ॥
इतश्च विषशाल्यां स्यापुरीपवृ पुरे ।
धात्री ऽपि शुद्धपुद्गलापी विमल्या मनःशिवः ॥ ६४२ ॥
द्वादशव्रतनिर्माणमपात्मनोऽव्रवपर्शाविनः ।
ईदृग्दुर्भिक्षवापापि म यत्र पोऽयमंदरम् ॥ ६४३ ॥
स देवसन्निमवाहुलिदाय गुरुषस्पाद्गविनः ।
सम्प्रगृम रामी पूर्व पविवे दम्पते दिने ॥ ६४४ ॥
महाभाग्यवनी जन्म मस्य शिम्वातु दुर्दशाम् ।
कथय यत दुर्भिक्षादिद दारुणादिदम् ॥ ६४५ ॥

वीजयन्वसनान्तेन मक्षिका मुखपातिनीः ॥ ६६९ ॥

॥ त्रिभिर्विशेषकम् ॥

नमस्काराख्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः ।
तं मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥ ६७० ॥
सेके सेके व्यथाशान्तिविशेषं समजायत ।
क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥ ६७१ ॥
निर्व्यथं निर्व्रणं नीरुग्निर्गन्धं च सुगन्धि च ।
मुहूर्तात्तन्मुखं जज्ञे क्व न धर्मः प्रभावभाक् ॥ ६७२ ॥
धर्मेणास्तः स रोगः प्राग्मुक्तो वैद्यगणेन यः ।
भानुच्छेद्यं तमश्छेत्तुं खद्योताः क्व किल क्षमाः ॥ ६७३ ॥
रा[illegible]
तं [illegible] ॥६७४॥
विशेषतस्ततस्तारे धर्मभारे सहोदरौ ।
तौ बभूवतुरुल्लासौ नर्मदाबिन्दुभास्करौ ॥ ६७५ ॥
श्रीभद्रबाहुराचार्यो ऽवधिज्ञानमधिष्ठितः ।
कदापि तत्पुरोद्यानं द्यामिवेन्दुरभूषयत् ॥ ६७६ ॥
प्रदक्षिणात्रयेणोपश्रेमतुर्नेमतुश्च तम् ।
उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥ ६७७ ॥
सुरसे सुरसेनेन निपीते देशनामृते ।
अपृच्छ्यत गुरुर्भ्रातृरसनारोगकारणम् ॥ ६७८ ॥
स च प्रवचनक्षीरार्णवर्वाचीनिभं वचः ।
उपाददे भवस्रोतोऽब्धिकेशरी गुरुः ॥ ६७९ ॥
भूभृताभूतमाहात्म्यपुरुहूतपुरसमम् ।
पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥ ६८० ॥

हरिचन्द्रमन्त्रिणागानिवदनो मदनो भटः ।
बभूव भगवद्धर्मसुधाम्बुधिसुधाकरः ॥ ६८१ ॥
तुल्याकृती तुल्यशक्ती तुल्यार्थौ तुल्यतेजसौ ।
धीरवीराभिधौ तस्य सुतौ जातौ भुजाविव ॥ ६८२ ॥
जिनवचनस्याद्यानन्दस्यन्दसुधारसम् ।
तौ भवारिमुखा यस्गौ न मोहविषमूर्छया ॥ ६८३ ॥
कदाप्येतौ गतावात्योद्याने ददृशतुर्मुनिम् ।
स्वमातुलं मलस्नात्यं पुंस्त्वं पतितं भुवि ॥ ६८४ ॥
किममुत्तिकमभूदेतदिति व्याकुलचेतसि ।
धीरे ऽथ पृच्छति सुमानेकस्त्राश्रुमुग्नगौ ॥ ६८५ ॥
मतिमास्थायिमं साधुं दष्टवान् दुष्टपन्नगः ।
दुर्गे नृपापराधीव सविष्टो ऽभिन्नसहान्तिके ॥ ६८६ ॥
अथ मातुलमोहेन क्रुधा धीरानुजो ऽभ्यधात् ।
रे रङ्काः किमसौ नरपमाहिः पापी हतो न हि ॥ ६८७ ॥
धीरस्तमभ्यधात्सर्पे गते जीवति कर्षनः ।
हहा महात्मन् किं पापं मुधा बध्नासि जिह्वया ॥ ६८८ ॥
क्रुधाभ्यधित वीरो ऽपि दुष्टे दष्टमहामुनौ ।
तस्मिन्हते ऽपि धर्मः स्याद्धनितोऽथवा क पातकम् ॥ ६८९ ॥
क्षत्रधर्मो यथं साधुपालने दुष्टनिग्रहे ।
इत्यसत्यं यदि ततो मज्जिह्वायेतु पातकम् ॥ ६९० ॥
धीरस्त्वचिन्तयन्नार्चं वस्यापारकवारसः ।
गर्जीत्वं जीवगणाय [illegible] ॥ ६९१ ॥
[illegible] ।
[illegible] ६९२ ॥

पालयन्तौ शुभं धर्मं ज्वालयन्तौ च पातकम् ।
क्षालयन्तौ च कीर्त्या स्वं सुचिरं तौ ननन्दतुः ॥ ६९३ ॥
युग्मम् ॥

धीरः क्रमेण पूर्णायुः सुरसेन भवानभूत् ।
अनालोचिततादृग्वाग्वीरस्त्वेष तवानुजः ॥ ६९४ ॥
असाध्यः सर्ववैद्यानामनवद्यौषधीविदाम् ।
सर्पमहतिवाक्पापाज्जिह्वारोगो ऽस्य आगतवान् ॥६९५॥
यतिसंजीवनादेव लब्धसम्भद्रलब्धिना ।
निरासि रसनारोगो महासेनस्य स त्वया ॥ ६९६ ॥
इति ज्ञात्वा स्ववृत्तान्तं जातजातिस्मृती तदा ।
सुरसेनमहासेनौ भवार्तौ भेजतुर्व्रतम् ॥ ६९७ ॥
व्रतं व्रतनिवृत्तिक्का तौ चारुचरितामृतैः ।
धर्ममभूनमं मुक्तिफलं कालादवापतुः ॥ ६९८ ॥
सुरसेनमहासेनदृष्टान्तेनामुना जनाः ।
अनर्थदण्डं दुःखौघहेतुं त्यजत दूरतः ॥ ६९९ ॥
॥ इत्यनर्थदण्डव्रतविचारे सुरसेनमहासेनकथा ॥

सुध्यानानामसावद्यकृतां मौहूर्तिकं हृदि ।
यत्साम्यमाधं तच्छिक्षाव्रतं सामायिकाभिधम् ॥७००॥
आभाति यतिधर्मश्रीक्षणखेलनभूमिका ।
दुरितोर्मिविरामाय व्रतं सामायिकं पुनः ॥ ७०१ ॥
मोक्षश्रीमयनारम्भः समताभ्यासरङ्गभूः ।
करुणारससिन्धूर्मिराद्यं शिक्षाव्रतं मतम् ॥ ७०२ ॥
क्रूराचारो ऽपि संसारकाराया मुच्यते द्रुतम् ।
केसरीव त्रुटत्कर्मदामा सामायिकव्रती ॥ ७०३ ॥

तथाहि शत्रुलोकाहिबर्हणः क्षीणगर्हणः ।
नृपो ऽभूद्विजयो नाम धर्मी कामपुरे पुरे ॥ ७०४ ॥
तं श्रेष्ठी सिंहदत्ताख्यो नत्वाचख्यौ कदाचन ।
केशरी नाम मे स्वामिन्पुत्रो ऽभूच्चौर्यभूरिति ॥ ७०५ ॥
अथ स्यास्थाने मद्भूयो यदि तद्वध्य एव मे ।
इति केशरिणं देशान्नेशो निरकाशयत् ॥ ७०६ ॥
सो ऽपि भूपभयाक्रान्तः श्रान्तो देशान्तरं व्रजन् ।
क्वाप्यपश्यद्वने स्वच्छलीनस्वादुरसं सरः ॥ ७०७ ॥
अचौर्याहृतमात्रैर्न पयो ऽपि पपे मया ।
अहो कार्यं तदप्यद्य धिग्धिग्दैवविपर्ययम् ॥ ७०८ ॥
इति ध्यायन्नयं तत्र श्रान्तः कान्तारपल्वले ।
चौरश्चक्रे पयःपानं स्नानं च विदधे ऽधिकम् ॥ ७०९ ॥
॥ युग्मम् ॥

निःसृत्य स गतश्रान्तिरारोहत्फलिशालिनम् ।
क्षुधाकुलः फलस्फीततरं चूततरुं ततः ॥ ७१० ॥
फलैस्तृप्तस्ततो दध्यौ स चिन्तां वल्गमवानिति ।
हहा मम किमद्याहर्विना चौर्येण यास्यति ॥ ७११ ॥
इति चिन्तापरे तत्र मन्त्रसाधितपादुकः ।
उत्ततार सरस्तीरे को ऽपि योगीश्वरो ऽम्बरात् ॥ ७१२ ॥
स व्योमगमनायासजनितातपतापितः ।
दत्त्वा दिक्षु दृशं मुक्त्वा पादुके उदके ऽविशत् ॥ ७१३ ॥
मन्येदं पादुकाद्वन्द्वमस्याकाशगतौ क्षमम् ।
यदेतदिह मुक्त्वासौ मज्जनायैव जले ऽविशत् ॥ ७१४ ॥
तदेतच्चोरयामीति ध्यात्वोत्तीर्य द्रुतं द्रुमात् ।

पादुके पादयोः क्षिप्त्वा चौरो ऽगाद्गगनाध्वना ॥ ७१५ ॥
स निर्गम्य दिने क्वापि नक्तं तत्पादुकापदः ।
चिन्तासमानसमयः व्योम्ना धाम्नि ययौ निजे ॥ ७१६ ॥
राज्ञे विज्ञप्य चौरं मां त्वं पुराभिरकाशयः ।
इत्युक्त्वाताडयद्दण्डैः पितरं नितरामसौ ॥ ७१७ ॥
परासुं पितरं त्यक्त्वा महर्द्धीनि गृहाणि सः ।
प्रविवेश पदार्थांश्च सारं सारं जहार च ॥ ७१८ ॥
अन्त्ये यामे त्रियामायाः स समायातवान्पुनः ।
सरोवरं तदेवाशु दुर्गमारण्यमण्डनम् ॥ ७१९ ॥
नित्यमित्यपमुद्दामकार्यचौर्यलसद्रसः ।
तदेव नगरं गत्वालुण्टद्विविधलुण्टनः ॥ ७२० ॥
लोकं साधुसतीमुख्यं संतापयति पापिनि ।
यमागम इव भिये ऽभवत्तत्र निशागमः ॥ ७२१ ॥
तत्स्वरूपं परिज्ञाय राज्ञाय व्यथितात्मना ।
परिपृष्टः पुरीरक्षो वैलक्ष्यान्नम्रमुखो ऽवदत् ॥ ७२२ ॥
प्रभो नभोध्वगः को ऽपि पुरं मथ्नात्यदः सदा ।
न पौरचरणन्यासः क्वापि चाप्यत्र पत्तुरि ॥ ७२३ ॥
ततः क्षितिपतिः कोपसंतप्तं लोचनद्वयम् ।
व्यधात्पुरःपुरेशाक्षमाशु निमज्जयन् ॥ ७२४ ॥
ततोऽनन्तरःश्रीमन्त्रनीतिज्ञमभाषत ।
तस्करगोचरः सो ऽत्र मम धार्ते ऽस्तु गोचरे ॥ ७२५ ॥
इत्युक्त्वान्तःपरीवारः पुरीधैर्यमलोकत ।
मन्त्रिस्थानं मतिप्रज्ञामयं प्रतिभूतमयम् ॥ ७२६ ॥
॥ पिपीलिकाः ॥

पादुकाद्वयमादाय सो ऽथ वामेन पाणिना ।
गत्वा गर्भगृहं चण्डीमानर्च मणिभिः शुभैः ॥ ७३९ ॥
जगौ च स्वामिनि स्वैरचारिणश्चौर्यकारिणः ।
स्यान्ममेयममेयर्द्धिदायिनी क्षणदा मुदे ॥ ७४० ॥
इत्युक्त्वा वलमानो ऽयं द्वारमारुध्य भूभुजा ।
कृपाणपाणिना जीवन् रे न यासीति धर्षितः ॥ ७४१ ॥
इति भाषिणि भूपाले तत्कालं प्रति कालवित् ।
पादुकाद्वयमेवायमङ्गीकृत्य क्रुधामुचत् ॥ ७४२ ॥
तद्भावबद्धनव्यग्रे महीभुजि महाभुजः ।
अयं जीवन्नयामीति वदन्नेवैष निर्ययौ ॥ ७४३ ॥
यात्यसौ केशरी चौर इति भूपगिरा भटाः ।
तमाशु दूरे नश्यन्तमन्वधावन्नृपाज्ञया ॥ ७४४ ॥
चौरलोप्त्रावनीं गन्तुं मन्त्रेणादिष्टशक्तिवत् ।
प्रदाय पादुकाद्वन्द्वं भूपो ऽप्यनुययौ भटान् ॥ ७४५ ॥
स तु चौरस्त्वरा दूरमुक्तशूरसमुच्चयः ।
पुरग्रामान्तरैर्मार्गैरेवागात्स्वदगुप्तये ॥ ७४६ ॥
भयाकुलितचित्तो ऽसौ किंचिद्वैराग्यवांस्ततः ।
दध्याविन्यत्र मे पापमित्युग्रं फलितं ध्रुवम् ॥ ७४७ ॥
ग्रामारामावनौ क्वापि कस्यापि दिग्नतो मुनेः ।
ध्यानतत्त्वं वचश्चौरः शुश्रुवेत्यमृगोत्तरा ॥ ७४८ ॥
सर्वत्र ध्यानसमताहविर्मुच्येत पातकैः ।
जनः सद्यो ऽपि निर्मिरैः कृतदीप इवालयः ॥ ७४९ ॥
इति इन्मर्मनिर्मग्नं चौरस्तद्भावयन्वचः ।
वपुरुत्पुलकं बिभ्रद्ध्वंसनैव नास्तिवान् ॥ ७५० ॥ युग्मम् ॥

सारासाराखिलजगत्स्तुतिनिन्दाविमुक्तधीः ।
तस्थौ मध्यस्थतामग्नः स भग्नदुरितक्रमः ॥ ७५१ ॥
शेषां रात्रिं दिनं चास्थादेष साम्यलयस्तथा ।
यथा स्थिरं मनो लीनं पवित्रे परमात्मनि ॥ ७५२ ॥
घातिकर्मक्षये सायं ज्ञानं जज्ञे ऽस्य केवलम् ।
सर्वज्ञान्वेषयंस्तत्र श्रद्धा नृपतिरप्यगात् ॥ ७५३ ॥
इतश्चान्वपतद्भूपस्तं हन्तुं भटभारभाक् ।
इतश्चागान्मरुद्वर्गो नन्तुं दधग्रतध्वजः ॥ ७५४ ॥
सुरैः कृते सुवर्णाब्जमासीने केसरिण्यथ ।
ते हन्तारो ऽपि नन्तारो भूपप्रभृतयो ऽभवन् ॥ ७५५ ॥
दन्तांशुभिः सुभिक्षाणि कुर्वाणश्चन्द्ररोचिषाम् ।
स व्यधादेशनां पापतमसः पूर्णिमां मुनिः ॥ ७५६ ॥
क्व तत्ते चरितं नाथ क्व चायं केवलोदयः ।
इति क्षितिभुजा पृष्टस्ततो व्याचष्ट केवली ॥ ७५७ ॥
रामसा जन्म तथादृक् पापभाजो ऽप्यभून्मम ।
धीरियं मुनिवाग्लब्धसामायिकमनोलयात् ॥ ७५८ ॥
यद्वर्षकोटितपसामप्यच्छेद्यं तदप्यहो ।
कर्म निर्मूल्यते चित्तसमत्वेन क्षणादपि ॥ ७५९ ॥
इति श्रुत्वा प्रमुदितो जगाम नगरीं नृपः ।
बोधयन्वसुधां सोऽपि विजहार महामुनिः ॥ ७६० ॥
विनिपातकरे सर्वजनसंतापकारिणि ।
घोरे ऽपि दुःखनिर्वाणं सेव्यं सामायिकं बुधैः ॥ ७६१ ॥

इति सामायिकव्रतविचारे केसरिकथा ॥

क्रियते दिग्व्रते मानसंक्षेपो यो दिवानिशम् ।

द्वितीयं तदिदं शिक्षाव्रतं देशावकाशिकम् ॥ ७६२ ॥
देशावकाशिकं यावत्कुरुते श्रद्धया सुधीः ।
तदन्यत्रात्मनां तेनाभयं दत्तं भवेत्तदा ॥ ७६३ ॥
प्रभावादस्य नश्यन्ति विघ्नाः शुद्धात्मनामिह ।
सुमित्रस्येव जायन्ते परत्र च शुभश्रियः ॥ ७६४ ॥
श्रुत्या पुरीततास्ति भुवस्तिलकवत्पुरी ।
चन्द्रिकेति चतुर्वर्गश्रीनिरर्गलनागरा ॥ ७६५ ॥
नासीरवीरभासोऽपि सम्भुग्नारिमण्डलः ।
तारापीड इति क्ष्मापस्तामपालयदुत्सवैः ॥ ७६६ ॥
तन्मन्त्री कीर्तिकुसुमं सुमित्राख्यः समन्ततः ।
विश्वसौरभ्यकृद्भेजे जिनभक्तिलताद्रुमः ॥ ७६७ ॥
शारपङ्क्त्यर्द्दीपो यद्धाम्नि द्माममधामनि ।
यस्यालीनौ भुजस्तम्भतोरणे मतिविक्रमौ ॥ ७६८ ॥
नृपतिर्नवनाख्यः पुण्यकर्मपराङ्मुखः ।
उवाच सचिवाधीशं कदाचिद्धार्मिकाग्रिमम् ॥ ७६९ ॥
देवार्चास्नात्रसामदानव्याख्याश्रवादिभिः ।
धर्मकृत्यैरधर्मैस्त्वं किं मुधा खिद्यसेऽधुना ॥ ७७० ॥
क एभिर्निष्फलैर्धर्मकर्मकृद्भिर्भवादृशैः ।
अराक्रान्तमविभ्रान्तमिति देहं दहत्यहो ॥ ७७१ ॥
इत्युक्तः स्मितवक्त्रोऽयं मन्त्री धार्मिकाग्रणी ।
किं नृदेव त्वमप्येवमवलिप्तेन भाषसे ॥ ७७२ ॥
इच्छामि धर्मकृत्येषु त्वां कारयितुमुद्यमम् ।
मामपि त्वं तु किं नाथ निषेधयसि तेषु ॥ ७७३ ॥
धर्मः किं विफलः स्यात्प्रमादेन धीधनैः ।

निर्विघ्नैः स्वर्गमोक्षाणामपि सौख्यमवाप्यते ॥ ७७५ ॥
अथोचे सचिवो राज्ञा मम ज्ञापय मन्त्रिप ।
विघ्नोच्छित्त्यार्थ संपत्त्या प्रत्यक्षं धर्मजं फलम् ॥ ७७६ ॥
इत्युक्तिभाजं राजानं सचिवस्तमुवाच सः ।
त्वं नाथो ऽन्ये तु ते भृत्याः साक्षादेतद्धि तत्फलम् ॥७७६॥
ततो ऽमात्यं जगौ राजा पाषाणे द्विदलीकृते ।
भवत्येकेन सोपानं द्वितीयेन तु देवता ॥ ७७७ ॥
तत्किं तस्यैकदेशेन धर्मश्चक्रे परेण न ।
सिद्धा स्वभावाद्विश्वस्य भव्याभव्यव्यवस्थितिः ॥७७८॥
॥ युग्मम् ॥

अथाह मन्त्री नास्तीको प्रायात्र स्वामिदर्शनम् ।
सति धर्मिणि धर्माणां स्थापना युज्यते ततः ॥ ७७९ ॥
इत्युक्तस्तं नृपः किंचित्सवैलक्ष्यास्मितो ऽवदत् ।
अहं मन्त्रिन्वचःचतुरया त्वया चक्रे निरुत्तरः ॥ ७८० ॥
परं मत्प्रसादेन प्रभावेणैव कुत्रचित् ।
निःसंशयं करिष्यामि धर्मं मन्त्रीन नान्यथा ॥ ७८१ ॥
इति भाषमनयोर्नित्यं संलापः सत्यमन्त्रिणोः ।
अजायत प्रजामध्ये प्रसिद्धिमधुरो ऽधिकम् ॥ ७८२ ॥
निर्वर्त्य सर्वकृत्यानि कदाचित्सचिवेश्वरः ।
पाक्षिकावश्यकं कर्तुं सार्धं स्वावासमपासदत् ॥ ७८३ ॥
गृहान्महिर्न नियामीत्यादेशेनावकालिकः ।
सत्यसंधो महामात्यः प्रत्याख्यानविधिं व्यधात् ॥७८४॥
आवश्यके कृते शुद्धश्रद्धानध्यानबन्धुरः ।
मन्त्रीश्वरो नमस्कारपरावर्तपरो ऽभवत् ॥ ७८५ ॥

समाह्वयति वः स्वामी गुरुकार्यतयेत्यथ ।
नृपतिप्रतिहारस्तं तदागत्य व्यजिज्ञपत् ॥ ७८६ ॥
आ प्रभाताद्गृहद्बहिर्गतिमत्याख्यया स्थितः ।
एष्यामि प्रातरित्युक्त्वा वेत्री प्रैष्यत मन्त्रिणा ॥ ७८७ ॥
परमेष्ठिनमस्कारसुधासेकविवेकतः ।
पुनर्मानुषजन्मद्रुं सचिवः सफलं व्यधात् ॥ ७८८ ॥
समुपेत्य पुनर्वेत्री मन्त्रीन्दुमिदमभ्यधात् ।
युष्मदुक्तैर्नृपः स्वाज्ञालोपात्कोपान्धतामधात् ॥ ७८९ ॥
इह नायाति मायातिचित्रधीः सचिवः स चेत् ।
तत्सर्वंभर्यमुद्रा मे याच्येति प्रतिपाद्य माम् ॥ ७९० ॥
इति श्रुतमनीहारव्याहारः सचिवो हसन् ।
तत्क्षणं प्रैषयन्मुद्रां दुःशीलामिव दासिकाम् ॥ ७९१ ॥
मन्त्री श्रेयःसमुद्रो ऽस्मिन्समुद्रे समतो गते ।
राज्यचिन्तानल्पनाशाकृष्टधर्मभरो ऽभवत् ॥ ७९२ ॥
मुद्रां कौतुकतो वेत्री परिधाय करे तदा ।
मन्त्री जातो ऽस्मीत्यात्मप्रदानितु जगौ हसन् ॥ ७९३ ॥
मन्त्रैर्मन्त्रिशिरोरत्न कुरु पापापहारणम् ।
इति हास्यपरैः पुम्भिर्मर्त्यो गेहाच्चचाल सः ॥ ७९४ ॥
तदैव दैवतः कैश्चिद्दुष्टैः प्रकटिताभिधैः ।
आहत्य पातितो नीतश्चार्यं यामार्धनश्वरताम् ॥ ७९५ ॥
प्रत्यनीकैस्तदा तस्य सुभटैर्जज्ञिरे जयः ।
वेत्री हतो हत इति नूपुरस्य महानभूत् ॥ ७९६ ॥
.. धार्मिकः श्रुत्वा क्षोभयुक्तः समादुरः ।
दैवेनरक्षितो ऽत्र प्राणाद्यन्वयकल्पयत् ॥ ७९७ ॥

अस्मत्कार्यमिदं कुर्वन्ननुच्छृङ्खलमना ।
संहारितः मनोहारस्तेनामी मन्त्रिणा ध्रुवम् ॥ ७९८ ॥
एतस्य यदि वृद्धस्य शिरश्छिन्द्यां स्वपाणिना ।
उच्छ्वासस्यापि छन्निमस्मान्मे मनसि निर्वृतिः ॥ ७९९ ॥
एवमुच्चैर्नृपस्योपः कोपाटोपभटोत्कटः ।
तथासाधव ते सन्ति घातानां येऽभियानताः ॥ ८०० ॥
अमात्यभृत्या नैते स्युः केऽपि चैटेशिता इव ।
इति ध्यात्वा नरेन्द्रस्तान्दिष्टोनभाषत ॥ ८०१ ॥
के यूयं किं हतो येषामनुर्धानार्थे ऽथ पृच्छति ।
ऊचुस्ते अपि दण्डोत्था घण्टाः कण्टागमानगाः ॥ ८०२ ॥
विमनास्तृष्णजाति ध्याय देवं पृच्छ दुरासयम् ।
असद्दीशस्य येनैव यातः व्यर्थो मनोरथः ॥ ८०३ ॥
धराधारपुरार्थाशः नृपसेनः स्वर्णदत्तान ।
सुमिर्भ मन्त्रिणं हन्तुं मदीदस्मान्मदेयथा ॥ ८०४ ॥
यदर्थं दण्डपयरमक्षेणार्थं प्रतिबन्धनम् ।
स्वामपस्मद्विषोः शत्रु सर्वदा पोषयत्यलम् ॥ ८०५ ॥
स्वाम्यादेशादिहास्माभिर्वध्ये ऽस्वाय मन्त्रिणः ।
कुतो ऽस्मभगनिसहस्त्यर्थं जम्पुतो यथा ॥ ८०६ ॥
इत्युक्तिविकलावेशाः सुभगा मकटानयाः ।
ते चत्वारो ऽपि यमत्वं अम्बुधनैव पातकाः ॥ ८०७ ॥
नृपः कृतानुतापो ऽथ गत्वा पौरवर्गीत्तः ।
अमात्यं समपायात बाहू धृत्वा वदन्निति ॥ ८०८ ॥
मया ते ऽपि सुबन्धुस्य वचितो यो ऽल्पबुद्धिना ।
सर्वं क्षमस्व क्षमस्व स्वमपराधमद्यं मयि ॥ ८०९ ॥

व्रतं चेन्नाचरिष्यस्त्वं नाजीविष्यस्ततः पितः ।
त्वां विना नैव राज्यं मे ऽभविष्यद्राज्यवैभवम् ॥ ८१० ॥
तदयातुल्यकल्याणकारिणः पुण्यकर्मणः ।
फलं प्रत्यक्षमद्राक्षमहं पापापहं चिरात् ॥ ८११ ॥
सुकृतं जीवितव्यं ते व्रतेनानेन पोषितम् ।
शोषितं त्वत्कृतेनाथ दुष्कृतं दुर्यशश्च मे ॥ ८१२ ॥
तत्सहस्वापराधं मे प्रसीद वद सात्त्विक ।
धर्मं कारय मां तात तारयाशु भवार्णवात् ॥ ८१३ ॥
उवाच सचिवो ऽप्येदं नापराधो ऽस्ति ते ध्रुवम् ।
यस्मात् सानुतापस्त्वं धर्मे धत्से ऽधुना धियम् ॥ ८१४ ॥
ततः संलब्धमुद्रेण मन्त्रिणा प्रेरितो नृपः ।
जगृहे गृहिणां धर्मं पूर्णचन्द्रगुरोः पुरः ॥ ८१५ ॥
मन्त्रिणः शङ्कमानो ऽथ निजे कण्ठे कुठारवान् ।
आपातः शूरसेनो ऽपि भूभुजा भूषितः श्रिया ॥ ८१६ ॥
देवार्चादानसद्ध्यानस्वाध्यायादिकर्मभिः ।
नृपो मन्त्रिगरिष्ठः स्वं दिवं जग्मतुरच्युतम् ॥ ८१७ ॥
तत्र स्वामिनि बालो ऽपि षण्डाख्यो ऽपि न सो ऽभवत् ।
न यो जिनाधिनाथोक्तधर्मकर्मठतां गतः ॥ ८१८ ॥
इत्यं मन्त्रीव भूपश्च कृत्वा धर्मं विशुद्धधीः ।
महाविदेहे मर्त्यत्वं प्राप्य लेभे शिवश्रियम् ॥ ८१९ ॥
ततः सुप्रियदीपेन गमिते ऽस्मिन्नकाननताम् ।
देशावकाशिकव्रते संचरन्तु सुखं बुधाः ॥ ८२० ॥
इति देशावकाशिकव्रतविचारे सुप्रियकथा ॥
कृत्यार्त्तानां स्नानादेस्त्यागो ब्रह्मव्रतं तपः ।

आहुः शिक्षाव्रतमिदं तृतीयं पौषधाभिधम् ॥ ८२१ ॥
ननु शुद्धोक्तचारित्रिवत्परिपाल्यते ।
अहोरात्रमपापेषो रात्रिं यावज्जितेन्द्रियैः ॥ ८२२ ॥
भवोरगगदच्छेदे पौषधत्पौषधव्रतम् ।
आपत्तापभिदे मिथानन्दमन्त्रिपतेरिव ॥ ८२३ ॥
तद्यथा ।
धर्मनिर्मलमत्यर्थमर्थविद्योति विद्यते ।
पुरं पुष्पपुरं पुष्पचापचापल्पेशलम् ॥ ८२४ ॥
तत्र पुत्रसुधासद्ममभिभवत्सुधाभृताम् ।
बभूव भूविभुर्भानुर्जितभानुः स्वतेजसा ॥ ८२५ ॥
मन्त्री तस्य धरित्रीन्दोर्मित्रानन्द इति श्रुतः ।
अजायत धियां पात्रं छात्रीकृतबृहस्पतिः ॥ ८२६ ॥
मध्येसदः कदाप्युर्वीनरेन्द्रसचिवेन्द्रयोः ।
व्यवसायस्य पुण्यस्य प्रतिष्ठाने ऽभवत्कलिः ॥ ८२७ ॥
कुपाय वसुधानाथः प्रोवाच सचिवं प्रति ।
व्यवसायः प्रमाणं न प्रमाणं पुण्यमेव चेत् ॥ ८२८ ॥
ततः स्वपुण्यमाहात्म्यपात्त्वं पुण्यवत्पार्थितः ।
गृहाण मम राज्यर्द्धिमित्यं संवर्धितमत्सरः ॥ ८२९ ॥
॥ युग्मम् ॥
यश्च कश्चित्पुरीमध्याऽत्वन्त्यामनुपास्यति ।
तत्कण्ठात्तृषितो असौ मन्त्रद्रुमः पास्यति शोणितम् ॥८३०॥
गच्छ तुच्छमते मूर्ध्ने पूर्णं कुरु निजं वचः ।
गृहे न हन्त गन्तव्यमित्र पथान्यतो मम ॥ ८३१ ॥
इति क्षितिपतेराज्ञां विज्ञाय सचिवाग्रणीः ।

एकाक्येव दशवेशो ऽप्यलोकयान्तरं मति ॥ ८३२ ॥
पद्मामेवादिभूचारनिषद्रपामनुलोमगः ।
स निःससार नगरादभिराम इवोपमः ॥ ८३३ ॥
गच्छन्नतुच्छपुण्यो ऽसौ श्रान्तो मध्यन्दिने ऽधिकम् ।
ददर्शेन्दोरिव कलाकोटीभिर्निर्मितं सरः ॥ ८३४ ॥
पद्मोल्लसद्दीर्घिकागर्भं भृङ्गघनस्वनाः ।
भाखानुं [illegible]कोटीरत्नरञ्जयारणी ॥ ८३५ ॥
स कृतस्नानपानो ऽथ स्थितः पाल्यां सरोवरे ।
[illegible]र्णपत्र[illegible] पुरः ॥ ८३६ ॥
[illegible] निविष्टं [illegible] मणिमत् ।
[illegible] भुवि [illegible] ॥ ८३७ ॥
[illegible] ॥ ८३८ ॥
॥ युग्मम् ॥

[illegible] ।
[illegible] ॥ ८३९ ॥
[illegible] ।
[illegible] ॥ ८४० ॥
[illegible] ।
[illegible] ॥ ८४१ ॥
[illegible] ।
[illegible] ॥ ८४२ ॥
[illegible] समागमत् ।
[illegible] ॥ ८४३ ॥

एवमाभाष्य संभूय महिताः सचिवेन ते ।
गत्वा व्यज्ञपयन्राज्ञे सर्वमथ यथातथम् ॥ ८४४ ॥
स्वस्थीभूयाथ भूजानिः कैश्चित्परिवृतो जनैः ।
कृती तत्र ययौ यत्र मित्रानन्दः स्वयं स्थितः ॥ ८४५ ॥
अभ्युत्तस्थौ तदा मन्त्री निभाल्य नृपतिं पुरः ।
दृष्टे हि दर्शने यावद्विरोधो युज्यते सताम् ॥ ८४६ ॥
मणिपत्याथ पृथ्वीन्दुर्निष्कपीठे निवेशितः ।
स्वार्धासने न्यस्य सचिवं न्यस्य सोऽवदत् ॥ ८४७ ॥
वरेण्यं पुण्यमस्त्येव शौर्यादिव्यवसायतः ।
पुण्यभाजो हि जायन्ते किंकरा व्यवसायिनः ॥ ८४८ ॥
भवद्भाग्योदयः कश्चिदयमप्रतिमभूधपः ।
येनाहं तव भर्तापि भृत्यवद्ज्ञापितोऽग्रतः ॥ ८४९ ॥
किं त्वसावियती भूतिर्बभूव भवतः कुतः ।
इत्युक्तो भूभुजा मन्त्री स्वचरित्रमचीकथत् ॥ ८५० ॥
अथ विस्मयविस्मेरनेत्रपत्रजनेक्षितः ।
मित्रानन्देन सानन्दः पृथ्वीन्दुः प्राविशत्पुरम् ॥ ८५१ ॥
उपायैः कल्पितं धीभिर्मणिमाहात्म्यतोऽधिकम् ।
बबुधे च नरेन्द्रेण मन्त्रिणो मैत्र्यमद्भुतम् ॥ ८५२ ॥
कदापि भानुभूपेन सहोपासितसंसदम् ।
आरादारामिकोऽभ्येत्य तं धर्मज्ञं व्यजिज्ञपत् ॥ ८५३ ॥
दिष्ट्याद्य वर्धसे स्वामिन्नद्य धर्म इवागमत् ।
मुनिः सुमन्धरो नाम ज्ञानी लीलावनी तव ॥ ८५४ ॥
प्रीत्याथ तस्मै दत्त्वाङ्गभूषणानि क्षणेन सः ।
जगामारामभगता जगतीपतिना समम् ॥ ८५५ ॥

मुनिं नेत्रामृतं नेत्रैरापीय नृपमन्त्रिणौ ।
नत्वाथ न्यविशेतां तौ पातुं कर्णामृतं वचः ॥ ८५६ ॥
मुनीशं देशनान्ते ऽथ पप्रच्छ पृथिवीपतिः ।
धन्यस्य कथमस्यासन्विपत्काले ऽपि संपदः ॥ ८५७ ॥
अथाचष्ट मुनिः स्पष्टविभवा भुवि भाति पूः ।
धन्यभारच्युतेव द्यौः पद्मनेयेति विश्रुता ॥ ८५८ ॥
तत्रादित्य इति क्ष्मापस्तत्प्रसादास्पदं धनी ।
श्रेष्ठी सुदत्त इत्यासीज्जिनधर्मधुरन्धरः ॥ ८५९ ॥
सो ऽन्यदा पापरोगाणामौषधं पौषधं श्रितः ।
तस्थौ निशि निशान्ते ऽसौ शान्तेन मनसा रसात् ॥८६०॥
तदा कश्चिदवस्वापविशारदो तद्वेश्मनि ।
भूरिभीमपरीवारः प्राविशत्तस्कराग्रणीः ॥ ८६१ ॥
विद्या चौरस्मृता लोकं तत्रामूर्छयताखिलम् ।
सुदत्ते सा नमस्कारमन्त्रध्याने तु नास्फुरत् ॥८६२ ॥
तं पश्यन्तमपश्यन्त एकान्तस्थं मलिम्लुचाः ।
जगृहुस्तद्गृहद्रव्याण्यखिलान्यस्खलन्मुदः ॥ ८६३ ॥
प्रागभञ्जन्ति स्म मञ्जूषाः कपाटीयमपाटयन् ।
द्रव्याय स्पृष्टयामासुरमी भूमिगृहाण्यपि ॥ ८६४ ॥
असौ महात्मनस्तस्य धर्मावष्टम्भपञ्जिरम् ।
जाते ऽप्युत्पातमाने ऽस्मिन्न ध्यानाच्चलितं मनः ॥८६५॥
अनागतेन्वयागत्य एतेषु धनपद्मीः ।
तेषु पात्रेषु च ध्यानभेदो ऽमुष्य न कश्चित् ॥ ८६६ ॥
अने लोपन्यथाभिदे धननाशे निशात्यये ।
यत्नादिनरुसेषु श्रेष्ठी पारितोषितः ॥ ८६७ ॥

क्रमादर्जयतो भाग्यभङ्गीसङ्गीकृतात्मनः ।
धनधोरणयस्तस्य भूयसो ऽप्यभवन्पुनः ॥ ८६८ ॥
स कदाचिदवस्वापविद्याविचौरचक्रराट् ।
एकं तद्गेहतो हारं विक्रेतुं प्राप तां पुरीम् ॥ ८६९ ॥
तं हारं श्रेष्ठिनस्तस्य वणिक्पुत्रो धनाभिधः ।
उपलक्ष्यार्पयामास तलारक्षाय तस्करम् ॥ ८७० ॥
तद्विज्ञाय द्रुतं गत्वा श्रेष्ठी तत्र कृपामयः ।
स्वं वणिक्पुत्रमाक्षिप्य तलारक्षपुरो ऽवदत् ॥ ८७१ ॥
धनो ऽयं नैव जानाति चौरव्यतिकरात्पुरा ।
अस्मै महात्मने मूल्यान्मया हारो ऽयमर्पितः ॥ ८७२ ॥
तदयं मुच्यतां मास्मिन्नुच्यतां चौर्यदूषणः ।
रौहिणीयोपमात्सात्किं स्यात्कलङ्कीन्दुवद्रविः ॥ ८७३ ॥
द्वादशव्रतधर्मोऽयं नासत्यं वदतीत्यथ ।
श्रद्दधद्वचसामुष्य तलारक्षो मलिम्लुचम् ॥ ८७४ ॥
असत्यमपि सत्सत्यं यत्प्राणिहितमित्यसौ ।
असत्ययापि वाचामुं श्रेष्ठी चौरममूमुचत् ॥ ८७५ ॥
श्रेष्ठी तं भोजयित्वा च वरे दत्त्वा च चीवरे ।
नाकृत्येषु मतिः कार्येत्युक्त्वा च प्राहिणोत्कृती ॥ ८७६ ॥
श्रेष्ठीन्दोरुपकारेण शिक्षया च द्रवन्मनाः ।
किं स्यादकृत्यमित्येष विज्ञातुं धारयन्धियम् ॥ ८७७ ॥
निर्यन्पुराद्बहिर्भागभूमौ शुभ्रप्रभाभिधम् ।
धर्मोपदेशान्ददतं मुनिराजमपश्यत ॥ ८७८ ॥ युग्मम् ॥
श्रुत्वा तद्वचनं ज्ञातकृत्याकृत्यविवेचनः ।
मुनीन्द्रोस्तस्य पादान्ते दीक्षां दक्षो ऽयमग्रहीत् ॥ ८७९ ॥

चारित्रं शुद्धमासेव्य सौधर्मे ऽसौ सुरो ऽभवत् ।
सुदत्तस्तु विपर्यासमभजत्सेवितव्रत ॥ ८८० ॥
संपत्सु ह्रियमाणासु यद्भग्नं न पौषधम् ।
पदे पदे तत्त्रायं त्रिविधाः प्राप संपदः ॥ ८८१ ॥
स तु चौरः सुरीभूतः स्वरत्नुपकृतीः कृती ।
चिन्तार्ताय ददौ रत्नं प्रस्तावं प्राप्य मन्त्रिणे ॥ ८८२ ॥
प्रभो द्रक्ष्यति ते मन्त्रीत्युक्ते राज्ञा मुनिर्जगौ ।
मन्त्रिणो जीवितान्ते तद्दर्शनं भावि मुक्तये ॥ ८८३ ॥
यतो नन्दीश्वरे देवानन्तुमस्याभिलाषिणः ।
समयज्ञसुरानीतविमानस्थस्य गच्छतः ॥ ८८४ ॥
शुद्धध्यानलयस्यान्तःकृतकेवलितायुजः ।
लवणाब्धेरुपर्येव मुक्तिर्भूप भविष्यति ॥८८५॥ युग्मम् ॥
इत्याकर्ण्य मुनेर्वाचमुद्यच्छ्रद्धर्मसुद्धयः ।
सर्वे ऽप्युर्वीश्वराद्यास्ते सानन्दा मन्दिराण्ययुः ॥ ८८६ ॥
एवं प्राक्पुण्यपूर्णर्द्धिमित्रानन्दनिदर्शनात् ।
भजन्तु भवपोषाय पौषधे सुधियो धियम् ॥ ८८७ ॥

इति पौषधव्रतविचारे मित्रानन्दकथा ॥

दानं चतुर्विधाहारवस्त्रपात्रौकसां मुनौ ।
शिक्षाव्रतं तदतिथिसंविभागं तुरीयकम् ॥ ८८८ ॥
एकाग्रयत्नो ऽप्येतत्सेवितं श्रद्धयाधिकम् ।
सुमित्राया इवोन्नत्यै जायते द्वादशं व्रतम् ॥ ८८९ ॥
तद्यथा पृथिवीभूषा श्रीवसन्तपुराभिधम् ।
पुरन्दरपुरश्रीणां विजेतृ वर्तते पुरम् ॥ ८९० ॥
विक्रमाक्रान्तदिक्चक्रः क्ष्मापचक्रे विक्रमाभिधः ।

नृपः कृपाश्रितो ऽभूत्तत्र क्षत्रशिरोमणिः ॥ ८९१ ॥
तन्मन्त्रीशो यशोनन्दो यद्बुद्धिभवनीरजे ।
राज्यलक्ष्मीः सुखं तस्थौ विकासाद्ये दिवानिशम् ॥८९२॥
जिनदासाभिधः श्रेष्ठी तस्य पृथ्वीपतेः प्रियः ।
यस्य तीर्थकृदर्चार्थं धनस्तं निधिः ॥ ८९३ ॥
सद्जिनवरसंख्यातैः स्वर्णरत्नैरपि ध्रुवम् ।
निष्पादितेन जिना मेरुकल्पेनोच्चतरावपि ॥ ८९४ ॥
यशराजो धनाध्यक्ष इत्येव ख्यातिमर्हति ।
धनदो जिनदासस्तु न ह्यूनो ऽर्थिजनेष्वपि ॥ ८९५ ॥
धनस्य सार्थवाहस्य सुता कान्तिविशालिनः ।
तस्यास्ति सत्कर्णी नाम्ना प्रियकारी स्नुषा सतः ॥८९६॥
जिनदासस्य विख्यातयशोधर्मार्थसिद्धिदः ।
विधि बभूव भ्रात्रेव पापः पापः सुहृत् ॥ ८९७ ॥
न धर्मो न कर्मैव न पुण्यं धार्मिकः पुनः ।
नास्तिकोऽपि च नराधमो जिनदास इव द्विषन् ॥ ८९८ ॥
जिने नृपः यशोधर प्रतिवासरमपि दानवत् ।
राजकर्मणि तं हन्तुं छिद्रं वीक्षते सदा ॥ ८९९ ॥
जिनदासस्तु दानेन प्राणिनामुपकारकः ।
पक्षे दोषविशालेन तं विरुद्धमपुष्यत ॥ ९०० ॥
ततो नृपान्तिकानुगत तीर्थयात्राप्रवेशतः ।
दर्शयन् स्वर्णचौरं पृथ्वीशं जिनदासं तम् ॥ ९०१ ॥
अथ पौरजनेऽन्यान्यो यदाऽस्तु क्षणमन्तरः ।
दम्भी जिने महाराजस्य दर्शयामास ॥ ९०२ ॥
[illegible]

मभावयन्ति रत्नानि गृहीत्वा निःसृतः पुरात् ॥ ९०३ ॥
अजानन्नपि पन्थानं गच्छन्नेष निरन्तरम् ।
अरण्ये पतितः क्वापि तृष्णातरललोचनः ॥ ९०४ ॥
तत्र वस्त्रलवाबद्धां रत्नालीं सुहृदः करे ।
रीणो ऽयमर्पयामास जीवितव्यमिवात्मनः ॥ ९०५ ॥
क्वापि पश्यन्पयः कूपे रत्नलोभाद्द्विजेन सः ।
कराभ्यां पातितः प्रेयं विश्वासः को ऽस्तु जीवताम्॥९०६॥
स तदा पतितः कूपे को ऽयमित्यशृणोद्वचः ।
उपलक्ष्य स्वरेणाथ प्राह रत्नवतीं प्रियाम् ॥ ९०७ ॥
अयि त्वमपि कूपे ऽत्र पतितासि कुतः प्रिये ।
स ते परिजनः क्वास्ति धिग्धिग्विधिविडम्बितम् ॥९०८॥
साप्यवस्थागतं कान्तं वीक्ष्य प्राप्तं च संनिधौ ।
बाष्पं दृशि दधौ दुःखानन्दसंकरसंकटम् ॥ ९०९ ॥
मन्वाना धन्यमात्मानं तत्रापि प्रियदर्शनात् ।
ऊचे सतीशिरोरत्नमियं रत्नवती ततः ॥ ९१० ॥
तत्सर्वमस्त्रीमध्ये गृहीतामिह तस्करैः ।
कान्दिशीकः समस्तो ऽपि ययौ परिजनः क्वचित् ॥९११॥
तेषु मद्योगलुब्धेषु वेगादहमिहापतम् ।
वरं हि मरणं स्त्रीणां न पुनः शीलखण्डनम् ॥ ९१२ ॥
कृतान्तमुखरूपे ऽस्मिन्कूपे ऽपि पतिता प्रिय ।
जीवितास्मि भवद्दृष्याऽलोकपोतव्यकर्मभिः ॥ ९१३ ॥
कथ्यतां च कथं पातः कूपे ऽत्र भवतामपि ।
राचिरः स च विद्वेषी विरुधे किं विरोधतः ॥ ९१४ ॥
भगाद जिनदासो ऽथ राचिरे मारणोत्सुके ।

गृहतः कर्मकृल्लूटादेको ऽहं निशि निःसृतः ॥ ९१५ ॥
निरन्तरविहारेण कान्तारे ऽत्र समागतः ।
तृषितो ऽस्मिन्पयः पश्यन्पादस्खलनतो ऽपतम् ॥ ९१६ ॥
अनुकम्पिथदाक्ष्यस्य तदा तस्यानिसत्त्वतः ।
कूपे ऽस्मिन्निर्जले ऽप्यम्भो नाभिदघ्नं ददुः स्थिराः ॥ ९१७ ॥
अथ तौ मथितस्वेदखेदतृष्णापरम्परौ ।
जितशीतेन नीरेण तेन प्रीतिं परां गतौ ॥ ९१८ ॥
अथ कूपे ऽत्र केनापि सञ्चारज्जुनियन्त्रितः ।
क्षिप्तो ऽम्भःकृतये कुम्भः पुण्यकुम्भ इवैतयोः ॥ ९१९ ॥
ततो ऽन्तःकुम्भरोपेण तौ मत्वा तेन धीमता ।
मेलयित्वा जनान्कृष्टौ कूपान्मृत्योर्मुखादिव ॥ ९२० ॥
यावत्तौ निःसृतौ सार्थस्तावदग्रे स्थितो महान् ।
निर्गतं मिथुनं कूपादिति कोलाहलं व्यधात् ॥ ९२१ ॥
तच्छब्दात्कौतुकी सार्थवाहो ऽपि द्रुतमागतः ।
सुतां पतिसुतामग्रे पश्यन्मनसि विस्मितः ॥ ९२२ ॥
धनाढ्यं जिनदासो ऽपि सार्थवाहं निरीक्ष्य तम् ।
श्वशुरो ऽयमिति ज्ञात्वा नमश्चक्रे चमत्कृतः ॥ ९२३ ॥
ननाम जिनदा प्रीत्या पितरं रत्नवत्यपि ।
अहो भाग्यस्य सौभाग्यं चिन्तयन्ती स्वचेतसि ॥ ९२४ ॥
अथास्मै सार्थवाहाय किमेतदिति पृच्छते ।
जिनदासः स्ववृत्तं तदादितो ऽपि न्यवेदयत् ॥ ९२५ ॥
सादरस्वजनसंपर्कनिपीतव्यापदूर्मयः ।
अथ ते सोपयोगेन तस्थुर्वसनवेश्मनि ॥ ९२६ ॥
अथास्मिन्नथिते चित्रे गन्धार्केणेव दर्शिते ।

तद्वीक्षाकौतुकेनेव संध्यायां विधुरुद्ययौ ॥ ९२७ ॥
तोयपात्रं गृहीत्वाथ जिनदासो निशागमे ।
तरूनन्तरयामास देहचिन्ताकृते बहून् ॥ ९२८ ॥
अथेन्दुद्युतिभिर्वीक्ष्य सुप्तं कंचिदसौ नरम् ।
यावद्यात्यप्रतस्तावन्मृतो लक्ष्मीधरः पुमान् ॥ ९२९ ॥
मृतमक्षतमेवैनं वीक्ष्यासौ मित्रवत्सलः ।
भुजङ्गदशनं तस्मिन्निश्चिनोति स्म दुःखितः ॥ ॥९३०॥
आदाय स्वान्मणींस्तस्मात्कृष्णा फणिमणिं ततः ।
तदीयस्पर्शपूतेन पयसा तमजीवयत् ॥ ९३१ ॥
उपकृत्युपकुर्वाणा म्रियन्ते धरया न के ।
अपकृत्युपकारी यस्तेन तु म्रियते धरा ॥ ९३२ ॥
वीक्ष्य लक्ष्मीधरो जीवञ्जिनदासमथाग्रतः ।
अपानतमुखाम्भोजस्तत्सौहार्दमिपानमत् ॥ ९३३ ॥
अथैनमाह माहात्म्यमयो रत्नवतीपतिः ।
अन्तःप्रेमसुधासिन्धुतरङ्गोत्तरया गिरा ॥ ९३४ ॥
पादस्खलनतः कूपे पतितो ऽहं त्वयोज्झितः ।
